८८

अथभावार्थदीपिकाप्रारंभः ।

इति श्रीरामचंद्रभट्टगुर्जोत्कायां मानवशास्त्रं पूर्णं इति श्रीमनुस्मृतसमाप्तं शुभमस्तु

॥ सिद्धिः श्रीगणेशाय नमः ॥ गं गां गणेशं गरुडाधिरूढं सिद्धेश्वरीं सिद्धिसरस्वतीं च नमामि भक्त्या परया च नित्यं विश्वेश्वरं विश्वविबोधरूपं
श्रुत्वा कुल्लूकभट्टीयं टीकां चैव मिताक्षरां कृता वै रामचंद्रेण मनुर्भावार्थचंद्रिका २ हनूमानेव जानाति श्रमं सागरलंघने तथैव ग्रंथ
कर्तैव ग्रंथकर्तुः परिश्रमं ३ ये केचिद् व्रसगुरूणान पिदृश्यंते सन्तोऽप्यसंनद्धतितेन विचारणीयाः प्रेतु प्रगल्भमतयः कृतसारवि
सा लोकेषु ते कृतिमिमामवधारयंतु ऋषीणां समवायं भृगुरुवाच मनुप्रणीतान् स्वायंभुवेन मनुना प्रणीतान् प्रवर्तितान् ध
र्मान् वक्ष्यामि कीदृशान् धर्मान् शाश्वतान् पारंपर्यक्रमागतान् पुनः कीदृशान् विविधान् षड्विधान् तद्यथा वर्णधर्मः १ आ
श्रमधर्मः २ वर्णाश्रमधर्मः ३ गुणधर्मः ४ निमित्तधर्मः ५

स्वयंभुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे मनुप्रणीतान् विविधान् धर्मान् वक्ष्यामि शाश्वतान् १ मनुमेकाग्रमासीनमभिगम्य
महर्षयः प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् २

साधारणधर्मश्चेति तत्र धर्मः कथ्यते नित्यं मद्यं ब्राह्मणो वर्जयेदित्यादि आश्रमधर्मः अग्नींधनभैक्षचर्यादिः २ स्ववर्णाश्रमधर्मः
पालाशो दंडो ब्राह्मणस्येत्येवमादिः ३ गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः ४ निमित्तधर्मः विहिताकरणे
प्रतिषिद्धसेवने निमित्तं प्रायश्चित्तं ५ साधारणधर्मः अहिंसादिः नहिंस्यात्सर्वभूतानीति श्रुतेः तथा शौचाचारांश्चाशिक्षये
दित्यादि किंकृत्वा ब्रह्मणे व्यापकाय नमस्कृत्य कीदृशाय ब्रह्मणे स्वयंभुवे स्वयंभवतीति स्वयंभूस्तस्मै स्वयंभुवे अजन्मत्वात्
पुनः कीदृशाय अमिततेजसे परिपूर्णतेजसे इत्यर्थः १ मन्विति महर्षयः अवराधारणयोग्याः एकाग्रे एकांते आसीनं मनुं अ
भिगम्य प्राप्य इदं वचनं वक्ष्यमाणलक्षणं अब्रुवन् उक्तवंतः किंकृत्वा यथान्यायं प्रतिपूज्य पूजयित्वा यथान्यायं येन न्यायेन यादृशी
पूजा कर्तुं शक्यते तेन तथेति २

भगवन्निति तत्र प्रश्नमाह हे भगवन् सर्ववर्णानां ब्राह्मणक्षत्रियविट्शूद्राणां यथावत् यथायोग्यं अनुपूर्वशः अनुक्रमेण नः अस्माकं धर्मान् वक्तुं अर्हसि च पुनः अंतरप्रभवानां अनुलोमजातीनां मूर्द्धाभिषिक्तानां धर्मान् वक्तुं त्वं अर्हसि ३ प्रश्नांतरमाह जरायुजेति हे स्वयंभो अस्य सर्वस्य भूतग्रामस्य चतुर्विधानां जरायुजानां उत्पत्तिं प्रलयं नाशं वक्तुम् अर्हसि च पुनः सर्वेषां ब्राह्मणादीनां तथा अनुलोमजातीनां आचारं वक्तुं त्वं अर्हसि तथा कार्यस्य कर्त्तव्यस्य अकार्यस्य विनिर्णयं वक्तुं अर्हसि यथाक्रमं ब्राह्मणादिवर्णक्रमं क्रमानुसारेण यथायोग्यं वक्तुं अर्हसि ४ ५ त्वामिति एकः अद्वितीयः हि हेतौ त्वं अस्य विधानस्य सर्वस्य चतुर्विधस्य भूतग्रामस्य उद्भिद् स्वेदज अंडज जरायुजस्य इत्यर्थः कार्यतत्त्वार्थवित् वेत्तासि हे प्रभो अमनीयः प्रभुः सर्वं जानाति इत्यर्थः

भगवन् सर्ववर्णानां यथावद् अनुपूर्वशः अंतरप्रभवानां च धर्मान् नो वक्तुम् अर्हसि ३ जरायुजांडजानां च तथा संस्वेदजोद्भिदां भूतग्रामस्य सर्वस्य उत्पत्तिप्रलयं तथा ४ आचारांश्चैव सर्वेषां कार्याकार्यविनिर्णयं यथाक्रमं यथायोग्यं वक्तुम् अर्हसि अशेषतः ५ त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः अचिंत्यस्याप्रमेयस्य कार्यतत्त्वार्थवित् प्रभो ६ स तैः पृष्टः स तैः सम्यग् अमितौजा महात्मभिः प्रत्युवाचार्च्य तान् सर्वान् महर्षीन् श्रूयताम् इति ७ आसीद् इदं तमोभूतं अप्रज्ञातम् अलक्षणं अप्रतर्क्यम् अविज्ञेयं
प्रसुप्तम् इव सर्वतः ८

तथा स्वयंभुवः अपौरुषस्य कार्यतत्त्वार्थवित् कीदृशस्य स्वयंभुवः अचिंत्यस्य वाङ्मनयोर्भ्यां अचिंत्यस्य प्रभावस्य पुनः कीदृशस्य अप्रमेयस्य ६ स इति तैर्महर्षिभिः सः मनुः सम्यक् यथा स्यात् तथा पृष्टः स न तान् सर्वान् महर्षीन् प्रति श्रूयताम् इति अभ्यर्च्य संपूज्य उवाच कीदृशः मनुः अमितौजाः अमितं ओजः प्रभावो यस्य सः ७ आसीद् इति मनुरुवाच इदं विश्वं पूर्वं तमोभूतं आसीत् कीदृशं विश्वं न प्रज्ञातं केश्चित् न प्रकर्षेण ज्ञातं लक्षणेन लक्षणं पूर्वापरं वा यस्य तत् अलक्षणं पुनः कीदृशं विश्वं अप्रतर्क्यं तर्कागोचरं तथा अविज्ञेयं किमिव सर्वतः प्रसुप्तम् इव ८

मनुस्मृ० टी
२

ततइति ततः तस्मात्कारणात् अव्यक्तः भगवानिदंविश्वंव्यंजयन् प्रादुरासीत् यतः स्वयंभूः कीदृशः तमोनुदः प्रकाशकर्ता पुनः कीदृशः महाभूतादिः महदादीन्भूतानि तेषांआदिः पुनः कीदृशः वृत्तौजाः महदादीनांभूतानां आदौप्रधाने वृत्तौजाः हतबलः ६ यइति सएवः ईश्वरः स्वयंउद्भौस्वयंउत्पन्नः यः असौ अतीन्द्रियः मनोअग्राह्यइंद्रियाणि अतिक्रम्यवर्ततेसः पुनः कीदृशः मनोवाक्कायकर्मभिः अग्राह्यः सूक्ष्मः पुनः कीदृशः अव्यक्तोनव्यक्तः अव्यक्तः पुनः कीदृशः सनातनः लयेपियः वर्तते १० सइतिईश्वरः अभिध्यायध्यानंकृत्वाकुर्वतोसृष्टिंकरोमि इतिध्यात्वास्वात्शरीरात् विविधाः प्रजाः सिसृक्षुः सन्आदौ सृष्ट्यादौ अपएवससर्जतासुअप्सुबीजंचिच्छक्तिंअवासृजत ११ तदंडमिति ततबीजंहैमंसुवर्णमयंप्रकाशरूपं

ततःस्वयंभूर्भगवानव्यक्तोव्यंजयन्निदं महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ६ योसावतीन्द्रियोग्राह्यः सूक्ष्मोव्यक्तः सनातनः सर्वभूतमयोचिंत्यः सएवस्वयमुद्बभौ १० सोभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अपएवससर्जादौतासुबीजमवासृजत ११ तदंडमभवद्धैमंसहस्रांशुसमप्रभं यस्मिन्जज्ञेस्वयंब्रह्मासर्वलोकपितामहः १२ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः तायदस्यायनंप्रोक्तंतेननारायणःस्मृतः १३ यत्तत्कारणमव्यक्तंनित्यं सदसदात्मकं तद्विसृष्टः सपुरुषः लोकेब्रह्मेतिकीर्त्यते १४

अंडंअभवत् कीदृशंअंडंसहस्रांशुसमप्रभं यस्मिन्अंडेस्वयंईश्वरः ब्रह्मायज्ञे कीदृशः ब्रह्मासर्वलोकपितामहः १२ आपइति नाराइतिआपः प्रोक्तावैनिश्चयेनआपः नरसूनवः वायस्यपरमात्मनः नाराः जीवसमूहाः ताः आपः यत यस्मात् अस्यईश्वरस्यपूर्वंअयनंशयनस्थानं आसीत् तेननारायणः स्मृतः नारायणोपरोव्यक्तात् अंडस्यांतास्त्विमेलोकाः सप्तद्वीपाचमेदिनी पिप्पलबीजन्यायेनेत्यर्थः १३ यत्तदितियत अव्यक्तंकारणंतत् नित्यंब्रह्म कीदृशंब्रह्म सदसदात्मकं कार्यकारणात्मकं तद्ब्रह्मततद्ब्रह्मणोविशिष्टः विशेषेणसृष्टोसन् सः पुरुषः लोकेब्रह्माइतिकीर्त्यते १४

राम
२

तस्मिन्नितिपंचभिराह सः कर्त्तासर्वत्रेतिसंबंध्यते सभगवान् आत्मनः ध्यानात् किं कार्यमिति चिंत्य तदंडं स्वयमेव द्विधा अकरोत् किं कृत्वा तस्मिन्नंडे उपरिवत्सरं सहस्रवत्सरं उषित्वा वसित्वा १५ ताभ्यामिति सः ब्रह्मा ताभ्यां सकलाभ्यां खंडाभ्यां दिवं स्वर्गं भूमिं निर्ममे तयोः सकलयोर्मध्ये व्योम च पुनः अष्टौ दिशः कीदृशं व्योमसाश्वतं अपां जलानां स्थानं आस्पदं १६ उद्ववर्हेति सः आत्मनः सकाशात् सदसदात्मकं कार्यकारणात्मकं मनः उद्ववर्ह उद्धृतवान् आविरकरोत् अपि निश्चयेन मनसः सकाशात् अहंकारं असृजत् कीदृशं अहंकारं अभिमंतारं अहमस्मीतिभावः पुनः कीदृशं ईश्वरं से छ्यादि कार्यप्रभुं १७

तस्मिन्नंडे स भगवानुषित्वा परिवत्सरं स्वयमेवात्मनो ध्यानात्तदंडमकरोद्द्विधा १५ ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतं १६ उद्ववर्हात्मनश्चापि मनः सदसदात्मकं मनसश्चाप्यहंकारमभिमंतारमीश्वरं १७ महांतमेव चात्मानं सर्वाणि त्रिगुणानि च विषयाणां ग्रहीतॄणि शनैः पंचेन्द्रियाणि च १८ तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसां सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे १९ यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयंति षट् तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः २० तदाविशंति भूतानि महांति सह कर्मभिः मनश्चावयवैः

महांतमिति सः आत्मानं महांतमेव महत्तत्त्वरूपं चाकरोत् च शब्दात् सर्वाणि अहंकारादीनि त्रिगुणानि त्रिगुणात्मिकानि राजसाहंकार तामसाहंकार सात्विकाहंकाररूपाणि तेषामिति तेषां षण्णां इंद्रियाणां मध्ये षष्ठं मनः अहंकारात् पंचतन्मात्राणां अवयवान् आत्ममात्रासु शब्दादि पंचसु विकारेषु सन्निवेश्य सर्वाणि भूतानि निर्ममे १९ यन्मूर्तिरिति यद्यस्मात् कारणात् मूर्तं अहंकाररूपं आत्मनः अवयवाः सूक्ष्माः अन्यविषयाः इंद्रियाणि षट्पंचतन्मात्राः आश्रयंतीति २० तदेति तस्मिन् काले कर्मभिः सह महांति महत्तत्त्वादीनि भूतानि पृथिव्यादीनि अहंकारात्मनः शरीरं आविशंति च पुनः षष्ठं मनः कर्तृभूतं सूक्ष्मैः अवयवैः सह प्रविशंति कीदृशं मनः सर्वभूतकृत् पुनः कीदृशं मनः अव्ययं विनाशरहितं पुनः कीदृशं वासनात्मकं २१

मनु स० टी.
३

तेषामिति तेषां सप्तानां पुरुषाणां महदहंकारपंचतन्मात्राणां अवयवाः सूक्ष्मास्तत्सूक्ष्माभ्यो मूर्तिमात्राभ्यः शब्दरूपरसस्पर्शगंधादिभ्यः अव्ययात् ईश्वरात् व्ययं विश्वं संभवतीति २२ आद्यादिति एषां पंचमहाभूतानां आद्याद्यस्य आद्यस्य परः परः अवाप्नोति तद्यथा आकाशस्य शब्दगुणं वायोः स्पर्शगुणं वायोः शब्दस्पर्शौ भवतः तेजसः रूपगुणाः तेजसि शब्दस्पर्शरूपाणि भवंति एवमप्स्वग्नेरूह्यं एषां पंचमहाभूतानां मध्ये यः यावतिथः यावत्संख्यावान् सः सतावत्संख्याकः गुणयुक्तः स्मृतः तद्यथा शब्दस्पर्शरूपरसगंधाः पंचगुणाः पृथ्व्यादि २३ सर्वेषामिति सः ब्रह्मा सर्वेषां प्राणिनां ब्राह्मणादीनां वर्णानां नामानि एवं पृथक् २ निर्ममे आदौ सर्ग्यादौ वेदशब्देभ्यः वेदाभ्यासेभ्यः ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृत इत्यादिभ्यः श्रुतिभ्यः संस्थापृथ

तेषामिदं तु सप्तानां पुरुषानां महौजसां सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवद्व्ययमव्ययं आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परं यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः २२ सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे २४ कर्मात्मनां च देवानां सोसृजत्प्राणिनां प्रभुः साध्यानां च गुणं सूक्ष्मं यज्ञं चैव सनातनं अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनं दुदोह यज्ञसिध्यर्थमृग्यजुःसामलक्षणं २५ कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा सरितः साग

कर्माणि ब्राह्मणादीनां निर्ममे पृथक् संस्थाः स्थितिः त्रैलोक्याः संस्थां मर्यादां निर्ममे २४ कर्मेति सः प्रभुः हिरण्यगर्भः कर्मात्मानां गणमसृजत् च पुनः प्राणिनां गणमसृजत् साध्यानां गणं असृजत् सनातनं अविनाशं सूक्ष्मं अतीन्द्रियं यज्ञं अपूर्वं चैवासृजत् अग्निरिति सनातनं ब्रह्म त्रयं वेदत्रयं अग्निवायुरविभ्यः दुदोह यज्ञसिध्यर्थं कीदृशं ब्रह्म ऋग्यजुःसामलक्षणं अग्नेः सकाशात् ऋग्वेदः वायोः सकाशात् यजुर्वेदः रवेः सकाशात् सामवेदः इति निर्ममे तथा इति सिद्धं कालमिति युग्मं सः ब्रह्मा इमाः प्रजाः स्रष्टुं इच्छन् तदा पूर्वं इमां सृष्टिं ससर्ज कालादिसृष्टिं ससर्ज तद्यथा पूर्वं कालं कालात्मकं संवत्सररूपं कलिं असृजत् च पुनः कालविभक्तं कालस्य विभागान् षट् ऋतून् अयनादींश्च पुनः नक्षत्रादि अश्विन्यादीनि नक्षत्राणि ध्यानवद्ग्रहांश्च सूर्यादीन् ससर्ज सरितादींश्च ससर्ज २९

राम: ३

कर्मणामिति ब्राह्मणादीनां विवेकाय ब्राह्मणस्य इदं कर्म क्षत्रियस्य इदं कर्म इति विवेकाय धर्माधर्मौ व्यवेचयेत् विचारयत् च पुनः इ
माः प्रजाः द्वंद्वैः सुखदुःखादिभिः अयोजयत् संयोजयत् २६ अण्व्यः इति दशार्द्धानां पंचतन्मात्राः याः अविनाशिन्यः मात्राः विषयाः
ताः मात्राः अणवः सूक्ष्माः स्मृताः तु पुनः ताभिः सार्द्धं सर्वं इदं विश्वं अनुपूर्वशः क्रमशः संभवति उत्पद्यते २७ यमिति सः
यमिति प्रभुः समर्थः यस्मिन्कर्मणि यं पुरुषं प्रथमं प्रथमतः न्ययुंक्त संयुक्तम् अकरोत् पुनः पुनः सृज्यमानः सन् सः जातिविशेषः तदेव क
र्म जन्मांतरकर्मस्वयं भेजे भजती त्यर्थः इति सिद्धं हिंस्रेति जन्मांतरकर्म आह प्रात्मनः कर्मस्वभावमाह सः ब्रह्मा यस्य पुंसः यत्स्वभावं त
त्सर्गे जन्मकाले तस्य अदधात् तत्स्वभावः स्वयं हि स्वाहिंस्रेति ऽविशत् तत्र दृष्टांतमाह यथानि ऋतवः पर्यये ऋतूनां पर्यये स्वचं

तपो वाचं रतिं चैव कामं च क्रोधमेव च सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः २५ कर्मणां तु विवेकाय धर्माधर्मौ व्यवेच
यत् द्वंद्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः २६ अण्व्यो मात्रा विनाशिन्यो दशार्द्धानां तु याः स्मृताः ताभिः सार्द्धमिदं सर्वं
संभवत्यनुपूर्वशः २७ यं तु कर्मणि यस्मिन्स न्ययुंक्त प्रथमं प्रभुः स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः २८ हिंस्राहिंस्रे
मृदुक्रूरे धर्माधर्मावृतानृते यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् २९ यथर्तुलिंगान्यृतवः स्वयमेवर्तुपर्यये स्वानि
स्वान्यभिपद्यंते तथा कर्माणि देहिनः ३० लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त
यत् ३१ द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः ३२

ते यथा ऋतवः स्वानि ऋतुलिंगानि स्वयमेव भवंति केश्विरनोद्यमानत्वात् तथा देहिनः प्राणिनः कर्माणि प्राक्कृतानि स्वानि स्वानि अभिपद्यंते प्राप
द्यंते ३० मुखबाहूरुपादतः लोकानां विवृद्ध्यर्थं ब्राह्मणादीनि वर्णान् निरवर्तयत् प्रवर्तयत् ३१ द्विधेति प्रभुः ब्रह्माऽऽत्मनः स्वं स्वं दे
हं द्विधा कृत्वा अर्द्धेन दक्षिणांगेन पुरुषः अभवत् अर्द्धेन वामांगेन नारी स्त्री अभवत् तस्यां नार्यां सः पुरुषः विराजं विराट् पुरुषं
स्वायंभुवसंज्ञं मनुं असृजत् उत्पादयत् ३२

तपइतिसः पुरुषः विराट्तपः तप्त्वायंपुरुषंअसृजत हेद्विजसत्तमाः तंमांजंवित्तजानीति कीदृशंमां अस्यविश्वस्यस्रष्टारं ३३ अहमितिप्रजाः सिसृक्षुः अहंप्रजानांपतीन्महर्षीन् आदितः प्रथमतः दशअसृज्यं२ जितवान् मरीच्यादीन् देवानिकायान्देवसमूहान् ३४।३५।३६।४०।४१।४२।४३। यथोतियथायुगंयुगानुसारेण ४४ एवमिति एवंमन्निर्योगात् एतैःमरीचिभिर्मरीच्यादिभिः तपोयोगात्स्थावरजंगमंसर्वंससर्जयथाक्रमंपूर्वमथ्यादिक्रमेण ४५ तेषामितितेषांभूतानांचतुर्विधानंयादृशंकर्मइहकीर्तितं

तपस्तप्त्वासृजद्यंतुसः स्वयंपुरुषोविराट् तंमांवित्तास्यसर्वस्यस्रष्टारंद्विजसत्तमाः ३३ अहंप्रजाः सिसृक्षुस्तुतपस्तप्त्वासुदुश्चरं पतीन्प्रजानामसृजन्महर्षीनादितोदश ३४ मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुं प्राचेतसंवशिष्ठंचभृगुंनारदमेवच ३५ एतेमनूंश्चसप्तान्यानसृजन्भूरितेजसः देवान्देवनिकायांश्चमहर्षींश्चामितौजसः ३६ यक्षरक्षःपिशाचांश्चगंधर्वाप्सरसोसुरान् नागान्सर्पान्सुपर्णांश्चपितॄणांचपृथग्गणान् ४० विद्युतोशनिमेघांश्चरोहितेन्द्रधनूंषिच उल्कानिर्घातकेतूंश्चज्योतींष्युच्चावचानिच ४१ किन्नरान्वानरान्मत्स्यान्विविधांश्चविहंगमान् पशून्मृगान्मनुष्यांश्चव्यालांश्चोभयतोदतः ४२ कृमिकीटपतंगांश्चयूकामत्कुणमाक्षिकान् सर्वंचदंशमशकंस्थावरंचपृथग्विधं ४३ यथाकर्मयथाकालंयथाप्रज्ञंयथाश्रुतं यथादेशंयथोत्पत्तिंयथायोग्यंयथाक्रमं ४४ एवमेतैरिदंसर्वंमन्नियोगान्महात्मभिः यथाकर्मतपोयोगात्सृष्टंस्थावरजंगमं ४५ तेषांतुयादृशंकर्मभूतानामिहकीर्तितं तत्तथावोभिधास्यामिक्रमयोगंचजन्मनि पशवश्चमृगाश्चैवव्यालाश्चोभयतोदतः रक्षांसिचपिशाचाश्चमानुषाश्चजरायुजाः ४७ अंडजाःपक्षिणःसर्पान् क्रमत्स्याःसकच्छपाः यानिचैवंप्रकाराणिस्थलजान्योदकानिच ४८

तथातत्कर्मवःयुष्माकंअभिधास्यामिचपुनः जन्मनिक्रमयोगंक्रमानुसारेणकथयिष्यामि पशवइतिपश्वादिमनुष्यांताःजरायुजाःस्मृताः ४७ अंडजानितिअंडजाःपक्षिणः आदिग्रोदकानि जलजानान्यनंतानि अंडजाःस्मृताः द्विविधाःस्थलजाउदकजाः ४८

स्वेदजमिति ऊष्मणः सकाशात् स्वेदजं दंशादिशत्कुणान्तं उपजायते यच्चान्यत्किंचित् ईदृशं स्वेदजं स्मृतं ४९ उद्भिज्जेति द्वाभ्यां
सर्वे स्थावरस्तत्जातयः उद्भिज्जाः उद्भिज्जातीयाः एकानि बीजानि जातानि एकानि काण्डरुहाणि वल्ल्यादीनि वंशरुहाणि च
प्याछेदनजातानि लताप्रतानानि वीरुदित्यमरः ५०।५१।५२ तमसेति कर्महेतुना बहुरूपेण एते उद्भिज्जाः अंतःसंज्ञाः सुखदुःखसम

स्वेदजं दंशमशकं यूकामक्षिकमत्कुणं ऊष्मणश्चोपजायंते यच्चान्यत्किंचिदीदृशं ४९ उद्भिज्जाः स्थावराः सर्वे बीजकांड
प्ररोहिणः ओषध्यः फलपाकांताः बहुपुष्पफलोपगाः अपुष्पाः फलवंतो ये ते वनस्पतयः स्मृताः पुष्पिणः फलिनः
श्चैव वृक्षास्तूभयतः स्मृताः ५१ गुच्छगुल्मं च विविधं तथैव तृणजातयः बीजकांडरुहाण्येव प्रताना वल्ल्य एव च ५२
तमसा बहुरूपेण वेष्टिताः कर्महेतुना अंतःसंज्ञा भवंत्येते सुखदुःखसमन्विताः ५३ एतदंतास्तु गतयो ब्रह्माद्याः स
मुदाहृताः घोरेऽस्मिन्भूतसंसारे नित्यं सततयायिनि ५२ एवं स सर्वं सृष्ट्वेदं मां चाचिंत्यपराक्रमः आत्मन्यंतर्दधे भूयः
कालं कालेन पीडयेत् ५३ यदा स देवो जागर्ति तदेदं चेष्टते जगत् तदा स्वपिति शांतात्मा तदा सर्वं निमीलति ५४ त
स्मिन्स्वपति तु स्वस्थे कर्मात्मनः शरीरिणः स्वकर्मभ्यो निवर्तंते मनश्च ग्लानिमृच्छति ५५ युगपत्तु प्रलीयंते
यदा तस्मिन्महात्मनि तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ५६

न्विताः भवंति मोक्षधर्मे युक्तं सीतोसग्राहिणः भवंति ५३ एतदिति अस्मिन्भूतसंसारे ब्रह्माद्यागतयः एतदंताः स्थावरांताः पा
पपुण्यानां गतयः ब्रह्मादिस्तंभपर्यंता उदाहृताः कीदृशेऽस्मिन् घोरे पुनः कीदृशे नित्यं सततयानि जननि गच्छति अनित्यत्वात् ५३
एवमिति सः ईश्वरः इदं विश्वं सर्वं एवं हिरण्यगर्भं च सृष्ट्वा आत्मनि भूयः अंतर्दधे किं कुर्वन् कालं पूर्वकालं कालेन उत्तर
कालेन प्रयानकालेन पीडयन् ५३ यदेति स देवः ईश्वरः यदा जगर्ति तदा इदं जगत् चेष्टते उत्पद्यते यदा शांतात्मा स स्वपिति
लीनचेष्टो भवति तदा सर्वं जगत् निमीलति लयं प्राप्नोति ५४ तु पुनः तस्मिन् ईश्वरे स्वपिति सति कर्मात्मनः शरीरिणः स्वर्वक

र्मभ्यो निवर्तते च पुनः मनः ग्लानिं लयं गच्छति प्राप्नोति ५५ युगपदिति तस्मिन्महात्मनि महत्तत्त्वे युगपत्तदा शरीरिणः प्र
लीयंते लीना भवंति ५६ तम इति यदा तमः समाश्रित्य सेन्द्रियः सचिरं तिष्ठति स्वं कर्म न कुरुते तदा मूर्तितः उत्क्रामति मू
र्तितः निर्गत एव भवति ५७ यदेति देहत्यागो वर्ण्यते यदा अनुमात्रको भूत्वा स्थाणुमुस्थावरेषु चरिष्णुचरेषु बीजं बीजरूपं समा
विशति संसृष्टः संयुक्तः तदा मूर्तिं शरीरं मुंचति ५८ एवमिति स ईश्वरः जाग्रदवस्था सुस्थितः सन् इदं चराचरं सर्वं एवं अ
जस्रं संजीवयति स्वप्नस्थितः सन् अजस्रं इदं प्रमापयति नाशयति स्वयं अव्ययः दृशतः कालतश्च ५९ मनुरुवाच

तमोयदा समाश्रित्य चिरं तिष्ठति सेन्द्रियः न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ५७ यदानुमात्रिको भूत्वा बीजं
स्थास्नु चरिष्णु च समाविशति संसृष्टस्तदा मूर्तिं विमुंचति ५८ एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरं संजीवय
ति चाजस्रं प्रमापयति चाव्ययः ५९ इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः विधिवद्ग्राहयामास मरीच्यादींस्त्वहं
मुनीन् ६० एतद्वोयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः एतद्धि मत्तोधिजगे सर्वमेवाखिलं मुनिः ६१ ततस्तथा स
तेनोक्तो महर्षिर्मनुना भृगुः तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ६२ स्वायंभुवस्यास्य मनोः षड्वंश्या म
नवोपरे सृष्टवंतः प्रजाः सर्वा महात्मानो महौजसः स्वारोचिषश्चोत्तमिश्च तामसो रैवतस्तथा चाक्षुषश्च महाते
जा विवस्वत्सुत एव च ६३

असो ईश्वरः इदं शास्त्रं कृत्वा मामेव आदितः विधिवत् स्वयं ग्राहयामास तु पुनः मरीच्यादीन् मुनीन् ग्राहयामास ग्राहयतिस्म ६०
एतदिति अयं भृगुः एतत् शास्त्रं धर्मशास्त्रं च अशेषतः श्रावयिष्यति मुनिः भृगुः एतत् शास्त्रं सर्वमेव अखिलं सरहस्यं मत्तः
सकाशात् अधिजगे ज्ञातवान् गेशब्दे इत्यस्य धातोः रूपं अधिजगे येन त्वयोक्तं सोनार्थाः ६१ तत इति भृगुरुवाच भृगुः धर्मा
नाह ततः मनुवचनानंतरं स महर्षिः भृगुः तान् सर्वान् ऋषीन् श्रूयतामिति अब्रवीत् कीदृशः प्रीतात्मा प्रफुल्लितात्मा तथा
तेन मनुना उक्तः ६२ अस्य मनोः षड्वंश्याः अपरे मनवः पश्चसेन ६३

स्वेति तेषां मनूनां नामान्याह द्वाभ्यां स्वारोचिष इत्याद्या विवस्वत्सुत एव स्वतः इत्यादि स्वायंभुवमनु १ स्वारोचिष २ उत्त
म तामस रैवत ५ चाक्षुष वैवस्वत ७ एते स्वायंभुवाद्याः सप्त मनवः स्वे स्वेंतरे इदं सर्वं चराचरं उत्पाद्य आपुः आगमन् ६५
मन्वंतरस्य परिमानार्थं कालस्य परिमाणमाह निमेषेति अष्टादश निमेषैः काष्ठा संज्ञा उच्यते ताः त्रिंशत्तु काष्ठाः
कलाः त्रिंशत्कलात्मको कालो मुहूर्तः स्यात् तावता मुहूर्तेन त्रिंशदिति त्रिंशन्मुहूर्तात्मकेन कालेन अहोरात्रं स्यात्
मानुषाणां ६६ अह इति सूर्यः स्वगत्या मानुषदैविके अहोरात्रे अहश्च रात्रिश्च अहोरात्रे विभजते विभागं करोति भूता

स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः स्वे स्वेंतरे सर्वमिदमुत्पाद्यापुश्चराचरं ६५ निमेषा दश चाष्टौ च काष्ठा त्रिं
शत्तु ताः कलाः त्रिंशत्कला मुहूर्तः स्यात् अहोरात्रं तु तावता ६६ अहोरात्रे विभजते सूर्यो मानुषदैविके रात्रिः स्वप्नाय
भूतानां चेष्टायै कर्मणामहः ६७ पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्व
री ६८ दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं ६९ ब्राह्मस्य तु क्षयाहस्य
यत्प्रमानं समासतः एकैकशो युगानां च क्रमशश्चतपाविधः ७०

नां प्राणिनां रात्रिः स्वप्नाय शयनार्थं कर्मणां चेष्टायै कर्मणां क्रियायै अहः संज्ञा ६७ पितृणामहोरात्रमाह पित्र इति मासः कृ
ष्णादि मासः पित्र्ये पितृणां रात्र्यहनी रात्रिश्च अहश्च रात्र्यहनी च कृष्णशुक्लपक्षयोः प्रविभागः कर्मचेष्टासु अहः स्मृतः कृष्ण
पक्ष अहः स्मृतः शुक्लः शुक्लपक्षः स्वप्नाय निद्रायै सर्वरी रात्रिसंज्ञेति ज्ञेयं इति ६८ दैव इति देवानां अहः परिमाणमाह वर्षं
संवत्सररूपं कालं देवानां रात्र्यहनीत्युच्यते पुनस्तयो रात्र्यहन्योः प्रविभागः क्रियते तत्र विभागे उदगयनं उत्तरायणं देवा
नां अहः उच्यते दक्षिणायनं रात्रिः स्यात् ६९ ब्रह्मणः दिवसपरिमाणकालमाह ब्राह्मेति ब्राह्मस्य क्षयाहस्य क्षया रात्रिः
अहः दिवसः एतयोः यत्प्रमाणं वर्षाणां यत्परिमाणं अहं कथयिष्ये समासतः कृतादीनां एकैकशः परिमाणं क्रमशः वक्ष्ये ७०

राम नुस्मृ॰टी॰
६

युगानां परिमाणमाह चत्वार्याहुरिति वर्षाणां चत्वारि सहस्राणि तत्कृतं युगं आहुः तस्य कृतयुगस्य संध्या तावती चत्वारिंशत ४०
तानि भवंति तथाविधः तेन प्रकारेण संध्यांशश्च तावती चतुःशतानि भवंति ७१ इतरेषु त्रेतादिषु त्रिषु संध्येषु संध्यांशेषु स
हस्राणि शतानि च एकपादेन एकचरणेन न्यूनेन प्रवर्तंते तथा च त्रेतायुगं त्रीणि सहस्राणि त्रिशतानि पूर्वसंध्या तथा सं
ध्यांशश्च त्रिशतानि च द्वापरं युगं द्विसहस्राणि द्विशतानि संध्या तथा संध्यांशः द्विशतानि कलिः कलियुगे एकसहस्रं ए
कशतं संध्या तथा संध्यांशः एकशतं ७२ एतद्द्वादशसहस्रं द्वादशसहस्रकं कालं देवानां युगमुच्यते ७२ देवानां युगानां सहस्रसं

चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगं तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ७१ इतरेषु ससंध्येषु ससंध्यांशेषु च
त्रिषु एकापायेन वर्तंते सहस्राणि शतानि च ७२ यदेतत्परिसंख्यातमादावेव चतुर्युगं एतद्द्वादशसाहस्रं देवानां युगमुच्यते
दैविकानां युगानां तु सहस्रं परिसंख्यया ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिरेव च ७४ तद्वै युगसहस्रांतं ब्राह्मं पुण्यमहर्वि
दुः रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ७५ तस्य सोऽहर्निशस्यांते प्रसुप्तः प्रतिबुध्यते प्रतिबुद्धश्च सृजति मनः सदसदा
त्मकं ७६ मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ७७ आकाशात्तु विकुर्वाणा
त्सर्वगंधवहः शुचिः बलवान्जायते वायुः स वै स्पर्शगुणो मतः ७८

ख्यया ब्राह्मं अहः ब्रह्मणः एकं ज्ञेयं रात्रिरेव एतावती संख्या युगानां सहस्रसंख्या रात्रिर्ज्ञातव्या ७४ दैविकेपि अन्यन्मतांतरे ब्र
ह्मलोकनिवासिनो जनाः अहोरात्रविदः ब्रह्मणः अहोरात्रं जानंति ७५ तस्येति स ब्रह्मा तस्य सहस्रार्निशस्यांते अवसाने प्रसुप्तः शयनं
करोति निद्रया अंते प्रतिबुध्यते जागर्ति प्रतिबुद्धः सन् सदसदात्मकं कार्यकारणात्मकं मनः सृजति मन इति स्वयं सिसृक्षया
सिसृक्षया नोद्यमानं नाम सा हंकारात्मकं मनः सृष्टिं विकुरुते करोति तस्मात् नाम सा हंकारात् आकाशं आकाशसंज्ञं प्रथमं जायते
तस्याकाशस्य गुणं शब्दं विदुः शब्दगुणमाकाशं इत्यर्थः ७७ आकाशादिति आकाशात्तु विकुर्वाणात् रूपांतरं प्राप्नुवतः वायुः जायते स वै वा

मनुस्मृतिटीका पृ॰ ६

राम
६

वायोरिति विकुर्वाणात् रूपांतरं प्राप्नुवतः सकाशात् ज्योतिरुत्पद्यते तस्य ज्योतिषः रूपं गुणमाह: अन्यत्सर्वं विशेषणं ज्ञातव्यं ७६ ज्योतिष इति ज्योतिषस्तु विकुर्वाणात् आपः उत्पद्यंते कीदृशाः आपः रसगुणात्मकाः रसः गुणो यासां ता: रसगुणात्मकाः अद्भ्यः सकाशात् भूमिरुत्पन्ना जाता कीदृशी भूमिः गंधगुणा आदितः प्रथमतः एषा सृष्टिः उदिता: ८० परस्परेति महाभूतानां आकाशादीनां परस्परानुप्रवेशात् परस्परं धारयंति तद्यथा कारणस्य आकाशस्य कार्ये वायो प्रवेशः एवमग्न्यादिषु पूर्वस्य २ उत्तरोत्तरं गुणं धारयंति तद्यथा आकाशस्य शब्दगुणं वायोः स्पर्शगुणं वायोः शब्दस्पर्शौ भवतः तेजसः रूपगुणं तेजसि शब्दस्पर्शरूपाणि भवंति एवमपि अ

वायोरपि विकुर्वाणात् विरोचिष्णु तमोनुदं ज्योतिरुत्पद्यते भास्वत् तद्रूपगुणमुच्यते ७६ ज्योतिषस्तु विकुर्वाणादापो रसगुणात्मिकाः अद्भ्यो गंधगुणा भूमिरित्येषा सृष्टिरादितः परस्परानुप्रवेशाद्धारयंति परस्परं गुणं पूर्वस्य २ धारयंत्युत्तरोत्तरं ७९ यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगं तदेकसप्ततिगुणं मन्वंतरमिहोच्यते ८२ मन्वंतराण्यसंख्यानि सर्गः संहार एव च क्रीडन्निवैतत्कुरुते परमेष्ठी पुनः पुनः ८३ चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे नाधर्मेणागमः कश्चिन्मनुष्यानुपवर्तते ८४ इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ८५

अग्रे दृष्टं ८१ यदिति तत् दैविकं युगं एकसप्ततिगुणं मन्वंतरसंज्ञकं कालं इहोच्यते अन्यादिशेषणं परमेष्ठी पितामहस्त्वमरः ८२।८३ चतुरिति कृतयुगे चतुष्पात् चतुश्चरणः सकलः पूर्णः धर्मः सत्यसंज्ञकः अधर्मेण कश्चिदपि आगमः स्वीकारः मनुष्यान्प्रति नउपवर्तते ८४ इतरेष्विति इतरेषु त्रेतादिषु युगेषु अधर्मस्य आगमात् अधर्मात् पादशः एकचरणः धर्मः अवरोहितः न्यूनचरणः कृतः तद्यथा त्रेतायुगे चौरिकारूपेणाधर्मेणाधर्मः पादशः अपैति एकचरणन्यूनो भवति द्वापरे अनृताख्येनाधर्मेण द्वितीयः पादः धर्मस्य अपैति नाशं इति कलौ मायाख्येनाधर्मेण धर्मस्य तृतीयः पादः नाशं इति ८५ ७ ७ ७ ७ ७ अरोगेति कृतयुगे चतुर्वर्षशतायुषः प्रजा भवंति त्रेतादिषु युगेषु एषां प्रजानां वयः पादशः ह्रसति तद्यथा त्रेतायुगे प्रजानां आयुः त्रिश

मनुस्मृ० टी०
७

तानि द्वापरे युगे प्रजानां आयुर्विशेषानेकलोशतमित्यर्थः वेदोक्तमिति अनुयुगं युगानुरूपं लोके सर्वं फलमित्यर्थः ८४ अन्ये
इति कृतादीनां युगानां धर्माः युगह्रासानुरूपतः भवंति तत्राह तपइति कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः द्वापरे
शंखलिखिताः कलौ पाराशराः स्मृताः ८५ ८६ ब्राह्ममिति कृतयुगं ब्राह्मं प्रोक्तं सत्वगुणसंज्ञमित्यर्थः त्रेतायु
गं क्षत्रियाधिष्ठितं सत्वरजोगुणमित्यर्थः द्वापरं वैश्यः वैश्याधिष्ठितः रजस्तमोभ्यां युक्तः कलियुगः शूद्रः शूद्राधिष्ठितः
तमोगुणरूपः एवं तद्रूपं आचार्या आहुः ८७ अतः परं चतुर्वर्णादीनां कर्माण्याह प्रथमं ब्राह्मणस्य धर्ममाह सर्वस्येति मु

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः कृते त्रेतादिषु त्वेषां वयो ह्रसति पादशः ८३ वेदोक्तमायुर्मर्त्यानामाशि
षश्चैव कर्मणां फलंत्यनुयुगं लोके प्रभावाश्च शरीरिणाम् ८४ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे अन्ये कृतयुगे
नृणां युगह्रासानुरूपतः ८५ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते द्वापरे यज्ञमित्याहुर्दानमेकं कलौ युगे ८६ ब्राह्मं कृतयुगं
प्रोक्तं त्रेता तु क्षत्रियं युगं वैश्यो द्वापरमित्याहुः शूद्रः कलियुगः स्मृतः ८७ सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः मुखबा
हूरुपज्जानां पृथक्कर्माण्यकल्पयत् अध्यापनं चाध्ययनं यजनं याजनं तथा दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् ८८ प्र
जानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियाणामकल्पयत् पशूनां रक्षणं दानमिज्याध्ययनमेव च
वाणिज्यं च कुसीदं च वैश्यस्य कृषिरेव च ९० एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयया ९१

खबाहूरुपज्जानां ब्राह्मणक्षत्रविट्शूद्राणां कर्माणि पृथक् २ प्रकल्पयत् सः कल्पयामास ८८ ब्राह्मणस्य षट्कर्माण्याह अध्येति स्वयं अध्येति
शिष्यान् अध्यापयेदित्यर्थः स्वयं यजेत अन्यान् याजयेत् दानं दद्यात् स्वयं गृहीयाच्च ८९ क्षत्रस्य धर्मानाह प्रजेति प्रजानां रक्षणं दानं इज्या
यागः अध्ययनं वेदाध्ययनं विषये अप्रसक्तिं अनासक्तिं सब्रह्मा आदिसति ८९ पशूनामिति वैश्यस्य धर्मानाह कुसीदं वृद्धिजीविक
मित्यमरः ९० एकमिति एतेषां चतुर्वर्णानां सेवा अनसूयया निःकपटेनेत्यर्थः ९१

दि

राम:
७

ऊर्द्ध्वमिति नाभेरूर्द्ध्वं मेध्यतरः अतिशयेन मेध्यः मेध्यतरः हृदयमध्ये पुरुषः पुरुषसंज्ञकः कीर्तितः सर्वतः स्पृत्वा ऽत्यतिष्ठद्दशांगुलमि तिश्रुतिः तस्मात्पुरुषाधिष्ठितात् तस्य स्वयंभुवः मुखं मेध्यतमं मतं ९२ उत्तमांगेति उत्तमांगात् उद्भवो यस्य स उत्तमांगोद्भवः तस्मात् उत्तमांगोद्भवात् ब्राह्मणोस्य मुखमासीदिति श्रुतिः ज्येष्ठ्यात् प्रथमोत्पन्नत्वात् ब्रह्मणः वेदस्य धारणात् अस्य सर्वस्यैव सर्गस्य विश्वस्य ब्राह्मणः धर्मतः प्रभुः स्मृतः ९३ तमिति स्वयंभूः तपस्तप्त्वास्यात् आस्यात् मुखात् आदितः तं ब्राह्मणं हव्यकव्याभिवाह्याय असृजत् हव्यकव्यानां अभिवाह्यः हव्यकव्याभिवाह्यः तस्मै हव्यं देवानां कव्यं पितॄणां प्रापकायेत्यर्थः ९४ यस्येति यस्य ब्राह्मण

ऊर्द्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवः ९२ उत्तमांगोद्भवाज्ज्यैष्ठ्यात् ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३ तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य तु गुप्तये यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः कव्यानि चैव पितरः किंभूतमधिकं ततः ९५ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः बुद्धिमत्सु नराः श्रेष्ठाः नरेषु ब्राह्मणाः स्मृताः १०० ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः उत्पत्तिरेवा विप्रस्य मूर्तिर्धर्मस्य शाश्वती स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते २ ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये २ सर्वस्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतं श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति ४

यस्य ब्राह्मणस्य आस्येन मुखेन देवाः पितरश्च हव्यकव्यानि अश्नन्ति भुंजंते ततः ब्राह्मणात् अधिकं किंभूतं कः प्राणाधिक इत्यर्थः ९५ भूतानां चराचरादीनां मध्ये प्राणिनां प्राणमतः श्रेष्ठाः ब्राह्मणेष्विति सम्यक्कृता बुद्धिर्यैस्ते कृतबुद्धयस्तेषु कृतबुद्धिषु कर्मकर्तारः श्रेष्ठाः कर्मकर्तृषु ब्रह्मवेदिनः श्रेष्ठाः ९ उत्पत्तीति विप्रस्य मूर्तिः धर्मस्य मूर्तिरित्यर्थः शाश्वती एषा उत्पत्तिः उदितोः सः ब्राह्मणः ब्रह्मभूयाय ब्रह्मरूपाय कल्पते समर्थो भवेदित्यर्थः २ ब्राह्मणेति जायमानो उत्पन्नमात्रो ब्राह्मणः पृथिव्यां सर्वभूतानां धर्मकोशस्य धर्म एव भांडागारः तस्य गुप्तये रक्षणाय ईश्वरः प्रभुः ३ सर्वेति इदं वस्तु यत्किंचित्स्वल्पमपि वस्तु जगतीगतं सर्वं स्वं ब्राह्मणस्येत्यर्थः इदं सर्वं विश्वस्याधिपत्यं ब्राह्मणः श्रेष्ठेन अर्हति अभिजनेन कुलाभिमानेन ४

स्वमिति ब्राह्मणः स्वमेव वस्तु भुंक्ते भोजनं करोति स्वं वस्ते स्वं वस्तु स्वं वस्त्रं वस्ते आच्छादयति वस आच्छादने इत्यस्य धातोः रूपं ब्राह्मणस्य आ
नृशंस्यात् दयात् इतरे जनाः क्षत्रियादयः भुंजते भोगं कुर्वते इत्यर्थः ५ तस्येति तस्य ब्राह्मणस्य कर्मविवेकार्थं शेषाणां क्षत्रियादीनां क
र्मविवेकार्थं अनुपूर्वशः क्रमेण स्वायंभुवो मनुः इदं शास्त्रं अकल्पयत् कल्पयामासेत्यर्थः ६ विदुषेति ब्राह्मणेन इदं धर्मशा
स्त्रं अशेषतः संपूर्णतः प्रयत्नेः अध्येतव्यं सम्यक् ज्ञानेन सम्यक् प्रकारेण केनचित् विदुषा शिष्येभ्यः वक्तव्यं ७ इदमिति शंशितव्रतः
परिपूर्णव्रतः ब्रह्मचर्ययुक्तः पुनातीति पङ्क्तिवंश्यांश्च वंशे भवा वंश्यास्तान् ९ तथेति त्रिवेदाध्ययनात् त्रयाणां वेदानां अध्ययने यथा

स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च आनृशंस्याद् ब्राह्मणस्य भुंजते हीतरे जनाः ५ तस्य कर्मविवेकार्थं शेषाणां चानुपू
र्वशः स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ६ विदुषा ब्राह्मणेनेदमध्येतव्यमशेषतः शिष्येभ्यश्च प्रवक्तव्यं सम्यक्
ज्ञानेन केनचित् ७ इदं शास्त्रमधीयानो ब्राह्मणः शंशितव्रतः मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ८ पुनाति पङ्क्ति
वंश्यांश्च सप्त सप्त परावरान् पृथिवीमपि चैवेमां कृत्स्नामेकोपि सोर्हति ९ यथा त्रिवेदाध्ययनं धर्मशास्त्रमिदं तथा अ
ध्येतव्यं ब्राह्मणेन नियतं स्वर्गमिच्छता १० इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्द्धनं इदं यशस्यमायुष्यमिदं निःश्रेयसं प
रं ११ अस्मिन् धर्मोखिलेनोक्तो गुणदोषौ च कर्मणां चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः १२ आचारः प्रथ
मो धर्मः श्रुत्युक्तः स्मार्त एव च तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः १३

फलं भवेत् स्वर्गसाधनं भवेत् तथा स्वर्गं इच्छता ब्राह्मणेन नियतं इदं धर्मशास्त्रं अध्येतव्यं १० इदं धर्मशास्त्रं परं उत्कृष्टं नैःश्रेयसं मोक्ष
साधनमित्यर्थः ११ अस्मिन्निति अस्मिन् धर्मशास्त्रे अखिलेन प्रकारेण धर्म उक्तः अस्मिन् धर्मशास्त्रे चतुर्णामपि वर्णानां गु
णदोषौ उक्तौ शाश्वताः पारंपर्यक्रमागताः आचार उक्ताः १२ आचारेति श्रुत्युक्तः स्मृत्युक्त एव आचारः परमो धर्मः उक्तः
तस्मात्कारणात् आचारे सदा उक्तः स्याद्द्विजः नित्यं आत्मवान् भवेत् जितेन्द्रियः भवेत् १३

आचारेति वेदफलं वेदाध्ययनं अश्नुते न प्राप्नोति १४ एवमिति १५ अस्मिन्धर्मशास्त्रे एतद्वस्तूनां संग्रहं अष्टभिः कथयिष्ये जग
दिति प्रथमतः जगदुत्पत्तिं संस्कारविधिं १६ दारेति गम्यागम्यदाराणां अधिगमनं प्राप्तिं अष्ट विवाहानां लक्षणं पंचयज्ञ
विधानं वैश्वदेवविधानं १७ वृत्तीति द्रव्याणां वस्तूनां शुद्धिमेव च १८ स्त्रीति कंटकानां शोधनं चोरप्रायाणां शोधनं २० वै
श्यनि संसारेति संसारस्य गमनागमनं त्रिविधं कर्म कायिकवाचिककर्म संभवं वदेय २१ अस्मिन्शास्त्रे एतेषां वस्तूनां

आचाराद्विच्युते विप्रो न वेदफलमश्नुते आचारेण तु संयुक्तः संपूर्णफलभाक्स्मृतः १४ एवमाचारतो दृष्ट्वा धर्म
स्य मुनयो गतिं सर्वस्य तपसो मूलमाचारं जगृहुः परं १५ जगतश्च समुत्पत्तिं संस्कारविधिमेव च व्रतचर्योपचारं च
स्नानस्य च परं विधिं १६ दाराधिगमनं चैव विवाहानां च लक्षणं पंचयज्ञविधानं च श्राद्धकल्पं च शाश्वतं १७ वृत्तीनां
लक्षणं चैव स्नातकस्य व्रतानि च भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च १८ स्त्रीधर्मयोग्यतापसं मोक्षं संन्या
समेव च राज्ञश्च धर्ममखिलं कार्याणां चाविनिर्णयः १९ साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि विभागधर्मं
द्यूतं च कंटकानां विशोधनं २० वैश्यशूद्रोपचारं च संकीर्णानां च संभवं आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं त
था २१ संसारगमनं चैव त्रिविधं कर्मसंभवं निःश्रेयसं कर्मणां च गुणदोषपरीक्षणं २२ देशधर्मान्जातिधर्मा
न्कुलधर्मांश्च शाश्वतान् पाषंडगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः २३ यथेदमुक्तवान्शास्त्रं पुरा पृष्टो मनु
र्मया तथेदं यूयमप्यद्य मत्सकाशान्निबोधत २४ इति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्ते जगदुत्पत्तिनाम प्रकरणं प्रथमोऽध्यायः १

निर्णयं मनुः उक्तवान्पूर्वम् २२ मत्सकाशात् भृगुः भृगोः सकाशात् यूयं ऋषय निबोधत जानीत इति २२ इति श्रीरामचंद्र
विरचितायां चंद्रिकायां मानवधर्मशास्त्रे जगदुत्पत्तिप्रकरणं नाम प्रथमोऽध्यायः २४ श्री० श्री० ७ ७ श्री० ७ ७

मनुस्मृ·टी·
६

विद्वद्भिरिति विद्वद्भिः सेवितः धर्मः तं धर्मं निबोधत कीदृशैः सद्भिः नित्यं अद्वेषरागिभिः रागद्वेषरहितैः यः धर्मः हृदयेनाभ्यनुज्ञातः मनसा ज्ञातः १ कामेति कामे आत्मा यस्य सः कामात्मनो भावः कामात्मता प्रशस्ता न सकामता ईहाः चेष्टा प्रशस्ता न वेदाधिगमः काम्यवेदानां अधिगमः अध्ययनं काम्यः कामार्हः च पुनः कर्मयोगः कर्ममार्गः वैदिकः वेदैश्चोक्तः काम्यकार्यः २ संकल्पेति कामः इच्छा संकल्पमूलः कामः संकल्पः कर्म मानसमित्यमरः ३ अकामेति कर्हिचित् कदाचित् अकामस्य निष्कामस्य क्रिया दृश्यते ४ तेष्विति तेषु कर्मसु वर्तमानः अमरलोकतां स्वर्गलोकप्राप्तिं गच्छति काम्यस्य चेष्टितं कर्मणश्चेष्टितमित्यर्थः ५

विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातो यो धर्मस्तन्निबोधत १ कामात्मता न प्रशस्ता न चैवेहास्त्यकामता २ अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते किंचित्तत्कामस्य चेष्टितम् ४ तेषु सम्यग्वर्तमानो गच्छत्यमरलोकतां यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ५ वेदोऽखिलो धर्ममूलं स्मृतशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ६ यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ७ सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै ८ श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं ९

वेदेति अखिलं वेदं धर्ममूलं धर्मस्य प्रमाणं च पुनः तद्विदां धर्मविदां स्मृतिशीले स्मृतिश्च शीलं च स्मृतशीले धर्मस्य मूले भवतः शुचौ तु चरिते शीलमित्यमरः आचारः सदाचारः साधुतुष्टिरेव साधुतुष्टिकर्ता च पुनः आत्मनः स्वस्य तुष्टिकर्ता ६ इति यः कश्चिन् धर्मं कस्यचिद्द्विजादेः धर्मः मनुना परिकीर्तितः सः सर्वः धर्मः वेदे अभिहितः उक्तः स वेदः सर्वज्ञानमयः सर्वं जानातीत्यर्थः यद्वा स मनुः सर्वज्ञानमयः ७ सर्वमिति इदं निखिलं सर्वं धर्मं विप्रादीनां धर्मं ज्ञानचक्षुषा अवेक्ष्य विचार्य विद्वान् श्रुतिप्रामाण्यतः वै निश्चयेन निविशेत स्वधर्मे प्रविष्टो भवेत् ८ श्रुतीति श्रुतिस्मृत्युदितं श्रुतिस्मृतिभ्यां

राम
६

यत् उदितं उक्तं धर्मं मानवः अनुतिष्ठन् इह लोके प्रेत्य परलोके कीर्तिं सुखम् अवाप्नोति ९ श्रुतीति श्रुतिः वेदः स्मृतिः धर्मशास्त्रं ते श्रुतिस्मृती सर्वार्थेषु सर्वकार्येषु अमीमांस्ये अविचार्ये मा निविचारणीत्यस्य धातोः रूपं ताभ्यां श्रुतिस्मृतिभ्यां धर्मः निर्बभौ नितरां बभौ १० यः इति यः पुरुषः ते उभे श्रुतिस्मृती हेतुशास्त्राश्रयात् हेतुः तर्कः । विद्यापारखंड शास्त्राश्रयात् अवमन्येत सः साधुभिर्बहिः कार्यः वेदनिंदकत्वात् ११ वेद इति वेदः वेदोक्तधर्मः स्मृतिः स्मृत्युक्तधर्मः सदाचारः सतं आचारः आत्मनः स्वस्य यत्प्रियं तद्यथा स्वस्वकीयस्य वेधोः आत्मनश्च प्रियं यत् चकारः समुच्चये आत्मनः

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ १० योऽवमन्येत ते ते उभे हेतुशास्त्राश्रयाद्द्विजः स साधुभिर्बहिः कार्यो नास्तिको वेदनिंदकः ११ वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणं १२ अर्थकामेष्वशक्तानां धर्मज्ञानं विधीयते धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः १३ श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः १४ उदितेऽनुदिते चैव समयाध्युषिते तथा सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः १५

प्रियः परिहाराभिमर्शी तत्प्रियं भवेत् चेत् भवंधूनां तत्प्रियं न तस्मात् स्वस्य आत्मनः प्रियं एतच्चतुर्विधं धर्मं प्राहुः १२।१३ श्रुतीति यत्र यस्मिन्कार्ये श्रुतिद्वैधं भवेत् तत्र तस्मिन्कार्ये उभौ धर्मौ स्मृतौ उभावपि तौ धर्मौ महर्षिभिः सम्यगुक्तौ श्रुतिद्वैधे दृष्टांतमाह उदिते जुहुयात् अनुदिते जुहुयात् तथा समयाध्युषितं उदितसमये जुहुयात् यतः सर्वथा वर्तते इयं इति वैदिकी श्रुतिः १५ कात्यायनः रात्र्याः षोडशमे भागे ग्रहनक्षत्रभूषिते कालं च नुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः १ तथा प्रातः समये नष्टे नक्षत्रमंडले रविर्यावन्न दृश्येत समयाध्युषितं च तत् रेखामात्रं च दृश्येत रश्मिभिश्च समन्वितः उदितं तं विजा

नीयात्तत्रहोमंप्रकल्पयेत् ३ बोधायनापस्तंब आश्वलायनप्रभृतिभिरुदिते उदयानंतरं होमः कार्यः माध्यंदिनिवाजसनेयिभिर
नुदिते उदयात्पूर्वं होमः कार्य इत्युक्तं १५ निषेकादिति यस्य पुंसः मंत्रैर्निषेकादिगर्भाधानादिश्मशानांतः विधिः तस्य पुंसः
अस्मिन् शास्त्रे अधिकारो भवेत् कस्यचिदन्यस्य नाधिकारः १६ सरस्वतीति पुण्यदेशानाह सरस्वती दृषद्वत्योर्यदंतरं देव
नद्योः गंगायमुनयोः अंतरं देशं देवनिर्मितं ब्रह्मावर्तसंतं प्रचक्षते १७ तस्मिन्ब्रह्मावर्तैकदेशे पारंपर्यक्रमागतः यः आ
चारः सदाचारः वर्णानां ब्राह्मणादीनां तथा आंतरालानां वर्णसंकरजातानां अनुलोमप्रतिलोमजातीनां सः सदाचारः १८ ब्र

निषेकादिस्मशानांतो मंत्रैर्यस्योदितो विधिः तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् १६ सरस्वती दृषद्वत्यो
र्देवनद्योर्यदंतरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते १७ यस्मिन्देशे य आचारः पारंपर्यक्रमागतः वर्णानां सांतराला
नां स सदाचार उच्यते १८ कुरुक्षेत्रं च मत्स्याश्च पांचालाः शूरसेनजाः एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरः १९ एत
द्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः २० हिमवद्विंध्ययोर्मध्यं यत्प्राग्विन
शनादपि प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः २१ आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात् तयोरेवांतरं गिर्योरार्या
वर्तं प्रचक्षते २२ कृष्णसारस्तु चरति मृगो यत्र स्वभावतः स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः २३ एतान्द्विजातयो देशा
न्संश्रयेरन्प्रयत्नतः शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः २४ एषा धर्मस्य वो योनिः समासेन प्रकीर्तिता सं
भवश्चास्य सर्वस्य वर्णधर्मान्निबोधत २५

उच्यते १८ ब्रह्मावर्तात् अनंतरं ईषन्न्यूनः त्वर्थः कुरुक्षेत्रेति एषः ब्रह्मर्षिदेशः कुरुक्षेत्रादिदेशाः महर्षीणां वासयोग्याः भवंती
त्यर्थः १९ एतद्देशप्रसूतस्य महर्षिदेशप्रसूतस्य अग्रजन्मनः सकाशात् पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं आचारं शिक्षेरन्
शिक्षेयुः २० विनाशनात् प्राक् कुरुक्षेत्रात्प्राक् प्रयागात् प्रत्यक् द्वयभूमिः मध्यदेशः मध्यदेशसंज्ञः प्रकीर्तितः २१ पूर्वात् आ
समुद्रात् पश्चिमात् आसमुद्रात् तयोः गिर्योः हिमवद्विंध्ययोः अंतरं आर्यावर्तं प्रचक्षते कथ्यते २२ कृष्णसारः मृगः यत्र देशे स्वभा
वतः स्वच्छंदतः चरति विचरति स देशः यज्ञियः श्रेष्ठः योग्यः यज्ञार्हः ज्ञेयः जानीयात् ततः पुरः अन्यदेशः म्लेच्छदेशः उच्यते २३ एतानिति वृत्ति
कर्शितः शूद्रः यस्मिन्कस्मिन्देशे निविशेत् द्विजाः एतान् संश्रयेयुः २४ एषेति वः युष्माकं एषा धर्मस्य योनिः उत्पत्तिः सान्निकारणं प्रकीर्ति

नात्वाक्षस्य यस्य विश्वसंभवः उर्ते: २५

रामः
१०

द्विजन्मनां ब्राह्मणक्षत्रियविशां निषेकादिः शरीरस्य संस्कारः गर्भादिसंस्कारः मंत्रैः पुण्यैः कर्मभिः कार्यः २६ गर्भैर्गर्भसंस्का
रैर्होमैः शंडोमकादीनां होमैः जातकर्मभिः चैलमुंजीनिबंधनैरेतैः संस्कारैः द्विजानां बैजिकं एनः अपमृज्यते पापं ना
शयन्ति बैजिकं शुक्रशोणीतसंबंधजमित्यर्थः गोत्रव्याधिसंक्रमननिमित्तं २७ स्वाध्यायेनेति वेदाध्ययनेन व्रतैः होमैः
त्रैविधेन वेदत्रयोक्तकर्मणा श्रुतैः पुत्रोत्पत्तिभिः एतैर्धर्मैः ब्राह्मी ब्रह्मप्राप्तियोग्या इयं तनुः क्रियते २८ नाभिवर्द्धनात्
प्राक् नालछेदनात् प्राक् पूर्वं जातकर्म विधीयते जातकर्मणि हिरण्यमधुसर्पिभिः अस्य कुमारस्य मंत्रवत् पूर्वकं प्राशनं कार्यं २९

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनां कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च २६ गर्भैर्होमैर्जातकर्मचौलमौं
जीनिबंधनैः बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते २७ स्वाध्यायेन व्रतैर्होमैस्त्रैविधेनेज्यया सुतैः महायज्ञै
श्च विविधैर्ब्राह्मीयं क्रियते तनुः २८ प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते मंत्रवत्प्राशनं चास्य हिरण्यम
धुसर्पिषात् २९ नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् पुण्ये ऽहनि मुहूर्ते वा नक्षत्रे वा गुणान्विते ३० मांगल्यं
ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितं वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य तु जुगुप्सितं ३१ शर्मवद्ब्राह्मणस्य स्याद्रो रक्षा
समान्वितं वैश्यस्य वृद्धिसंयुक्तं शूद्रस्य प्रेष्यसंयुतं ३२

रात्रौ कर्माधिकारो नास्ति तेन कारणेन एकादशे ऽहनि नामधेयं नाम कर्म कारयेत् दशादिवसे वा द्वादशे ऽह्नि कारयेत् कार्यं अत्र
तया द्वादशे हि नामकरणं यदा न जाने तदा समुहूर्ते पुण्ये ऽह्नि गुणान्विते नक्षत्रे ज्योतिर्विदोद्दिष्टे काल भुक्तास्तादि वर्जिते का
ले नामधेयं कार्यं विष्णुपुराणवचनात् ततस्तु नाम कुर्वीत पितैव दशमे ऽहनी त्यादिवाक्यं शंखः दशमेऽहनि सूतिका पू
र्वस्य पतः ३ त्या पाप्ये श्राद्धस्य पिंडवर्द्धने नाम कर्म कार्यं इति वा ३० मांगल्यमिति नामकरणं त्रिभिराह ब्राह्मणस्य नाम मांगल्ये
शर्मीतं स्यात् तद्यथा विष्णुशर्मेति नामं क्षत्रियस्य नाम रक्षासमान्वितं बलान्वितं नाम तद्यथा नृसिंहवर्मेति वैश्यस्य नाम पुष्टि वृद्धि
समान्वितं कुर्यात् धनपतिरिति नाम शूद्रस्य नाम प्रेष्यसंयुक्तं कुर्यात् तद्यथा हरिदासेति नाम ३२

स्त्रीणामिति स्त्रीणां कन्यानां नाम सुखोद्यमिति सुखेन उच्चारणीयमित्यर्थः अक्रूरं क्रूरत्वरहितं इति ३३ चतुर्थेति कुले स्वकु
ले यद्यदुक्तं मंगलं चूडाकरणं कुलाचारमित्यर्थः ३४ चूडेति सर्वेषां द्विजातीनां धर्मतः चूडाकर्म प्रथमे वर्षे कार्यं श्रुतिनो
दनात् तृतीयवर्षे कुर्यात् ३५ गर्भेति अतः परं द्विजानां उपनयनकालमाह ब्राह्मणस्योपनयनं गर्भाष्टमे अष्टमे गर्भाष्टमे
वर्षे उपनयनं कार्यं राज्ञः गर्भात् एकादशे वर्षे वा कर्तव्यं वैश्यस्य गर्भात् द्वादशवर्षे जन्मद्वादशे वा वर्षे इत्यर्थः वि
प्रस्य पंचमे वा वर्षे कार्यं राज्ञः षष्ठे वा वैश्यस्य अर्थार्थिनः अष्टमे वा वर्षे कार्यं ३७ उपनयनार्थं कालं व्यग्रतया स्वस्यस्वस्य

स्त्रीणां सुखोद्यमक्रूरं वैश्यष्ठार्थमनोहरं मांगल्यं दीर्घवर्णांतमाशीर्वादाभिधानवत् ३३ चतुर्थे मासि कर्तव्यं शि
शोर्निःक्रमणं गृहात् षष्ठेन्नप्राशनं मासि यद्वेष्टं मंगलं कुले ३४ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथ
मेब्दे तृतीये वा कर्तव्यं श्रुतिनोदनात् गर्भाष्टमेब्दे कुर्वीत ब्राह्मणस्योपनायनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे
विशः ३६ ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोष्टमे ३७ आषोडशा
द्ब्राह्मणस्य सावित्री नातिवर्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः ३८ अत ऊर्ध्वं त्रयोप्येते यथाकाल
मसंस्कृताः सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः ३९

ब्राह्मणस्य षोडशवर्षपर्यंतं औपनयनिकः कालः सावित्रीपतितो भवेत् विश
कालातिक्रमो भवेच्चेत्तर्हि किं कर्तव्यं तत्राह ब्राह्मणस्य षोडशवर्षपर्यंतं औपनयनिकः कालः सावित्रीपतितो भवेत् ३८ अत इति पितैवोपनयेत्पुत्रान् तदभावे पितामह
श्चतुर्विंशतिवर्षपर्यंतं उपनयनकालः अतः सावित्रीपतितो भवेत् ३८ अत इति पितैवोपनयेत्पुत्रान् तदभावे पितामह
हः तदभावे पितृभ्रातुः स्यात्तदभावे तु सोदरः कालातिक्रमे प्रायश्चित्तमाह अत ऊर्ध्वं षोडशद्वाविंशवर्षादूर्ध्वं एते द्विजाः
संस्कारहीनाः शूद्रप्राया भवंति अकृतप्रायश्चित्तमाह योगीश्वरः व्रात्यस्तोमात्कृतेः विना व्रात्यस्तोमसंज्ञात् तेनोयज्ञादिना
कृते तु स्तोमयज्ञे उपनयनाधिकारो भवत्येव ३९

नैतैरिति आपद्यपि कर्हिचित् अपूतैः अकृतप्रायश्चित्तैः एतैः त्रिवर्णैः सह ब्राह्मणः ब्राह्म्यान्संबंधान् न आचरेत्
वेदाध्ययनसंबंधान् न कारयेत् च पुनः यौनान् योनिसंबंधान् विवाहादीन् एतैः अकृतप्रायश्चित्तैः सह न आचरे
त् न वर्तयेत् ४० कार्ष्णेति ब्राह्मणस्य कार्ष्णाजिनं संज्ञं चर्म धार्यं क्षत्रस्य रौरवं रुरुजातीयमृगस्य चर्म रौरवाजिनं धार्यं
वैश्यस्य ब्रह्मचारिणः वास्तः अजाजिनं धार्यं आनुपूर्व्येण ब्राह्मणक्षत्रियवैश्यैः एतानि चर्माणि शाणक्षौमआविकानि
पटानि पूर्वेषामलाभे वसीरन् आच्छादयुः शाणस्य दुर्दशान क्षौमे अतसीतंतुजे क्षौमे ४१ मौंजीति मुंजोद्भवा मौंजी त्रिवृत् समेख
ला समा श्लक्ष्णा अस्थिरहिता ब्राह्मणस्य कार्या क्षत्रियस्य मौर्वीज्या मेखला कार्या मुखलक्षण विशेषः पुरोभवा मौंजीज्या मेखला कार्या वैश्यस्य
शणतानवतंतुस्य वा मेखला तंतोः सूत्रस्य वा मेखला कार्या शणतांतवमिश्रिता वा कार्या ४२ मुंजालाभे ब्राह्मणस्य कुशैः

नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ब्राह्मान्यौनांश्च संबंधानाचरेद्ब्राह्मणः क्वचित् ४० कार्ष्णरौरवबस्तानि
चर्माणि ब्रह्मचारिणः वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ४१ मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मे
खला क्षत्रियस्य तु मौर्वीज्या वैश्यस्य शणतांतवी ४२ मुंजालाभे तु कर्तव्याः कुशाश्मंतकबल्वजैः त्रिवृता ग्रंथिनैके
न त्रिभिः पंचभिरेव च ४३ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकं
ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैलवौदुंबरौ वैश्यो दंडानर्हंति धर्मतः ४५

कार्या मेखला क्षत्रियस्य अश्मंतकः तृणविशेषः तस्य वा मेखला कार्या वैश्यस्य बल्वजैः वा इति संमेखला कार्या मुडेति
एकेन त्रिवृता मौंजी कार्या त्रिभिर्वा ग्रंथिभिः त्रिवृता कार्या पंचभिर्ग्रंथिभिः त्रिवृता वा कार्या ४३ कार्पासेति विप्रस्य उप
वीतं कार्पासं स्यात् कार्पाससूत्रस्य त्वर्यः त्रिवृत् ऊर्ध्ववृतं कार्यं तंतत् त्रिवृत् जातं तंतुं अधः सकाशात् ततः नवगुणं ऊर्ध्वं कार्यं
उदीच्यानां मतं अथ दाक्षिणात्यानां मतं पूर्वं तं तु त्रयं अधोवृतं अधः सकाशात् ऊर्ध्वं कार्यं ततः त्रिवृत् ऊर्ध्वं नवगुणं अधः
कार्यं ४४ ब्राह्मणोति द्विजानां दंडानाह ब्राह्मणस्य बैल्वपालाशौ भवतः पालाशस्य भावे बिल्वः बिल्ववृक्षस्य
दंडः कार्यः राज्ञः वटखादिरौ वटवृक्षस्य वा खदिरवृक्षस्य वा दंडः

वैश्यस्यपैलवः पिलुदंतोद्भवोवादंडः उदुंबरवृक्षजोवादंडः एतान्धर्मतः धारयितुंअर्हंति ४५ केशांतिकइतिदंडस्यप्रमाण
माह ब्राह्मणस्यदंडःप्रमाणतः केशांतिकः कार्यः राज्ञः दण्डः ललाटसम्मितः ललाटपर्यंतः उक्तःविप्रः वैश्य
स्यदंडः नासांतिकः नासिकापर्यंतस्यात् ४६ अग्निदूषिताः दंडाः नकार्याः नब्रणाः प्रतिगृह्येति ईप्सितंदंडंप्रत्या
त्तं दण्डंप्रगृह्यभास्करं उपस्थायकस्यब्रह्मचारिणः इतिउपस्थस्य अग्निंप्रदक्षिणंपरीत्यकृत्वायथाविधिवद्भैक्ष्यं
चरेत् ४८ भवदिति उपवीतोद्विजोत्तमः कृतयज्ञोपवीतः भवत्पूर्वंभैक्ष्यंचरेत् राजन्यः भवन्मध्यः भैक्षंचरेत्

केशांतिकोब्राह्मणस्यदंडःकार्यःप्रमाणतः ललाटसम्मितोराज्ञःस्यात्तुनासांतिकोविशः ४६ ऋजवस्तेतुसर्वे
स्युरव्रणाःसौम्यदर्शनाः अनुद्वेगकरान्नृणांसत्वचोनाग्निदूषिताः ४७ प्रतिगृह्येप्सितंदंडमुपस्थायचभास्क
रं प्रदक्षिणंपरीत्याग्निंचरेद्भैक्ष्यंयथाविधि ४८ भवत्पूर्वंचरेद्भैक्ष्यमुपवीतोद्विजोत्तमः भवन्मध्यंतुराजन्यो
वैश्यस्तुभवदुत्तरं ४९ मातरंवास्वसारंवामातुर्वाभगिनींनिजां भिक्षेतभिक्षांप्रथमंयाचैनंनावमानयेत् ५०
समाहृत्यतुतद्भैक्ष्यंयावदर्थममायया निवेद्यगुरवेश्नीयादाचम्यप्राङ्मुखःशुचिः ५१ आयुष्यंप्राङ्मुखोभुं
क्तेयशस्यंदक्षिणामुखः श्रियंप्रत्यङ्मुखोभुंक्तेऋतंभुंक्तेउदङ्मुखः ५२ सायंप्रातर्द्विजातीनामशनंस्मृति
नोदितं नांतराभोजनंकुर्यादग्निहोत्रसमोविधिः ५३

वैश्यःभवदुत्तरंभैक्ष्यंकार्यंतद्यथा ब्राह्मणः ॐभवतुभिक्षांदेहीतिउच्चरेत् क्षत्रियःभिक्षांभवतिदेहेतिउच्चरेत् भि
क्षांदेहीतिइत्येवंवर्णक्रमेणज्ञेयं ४९ मातरमिति निजांभगिनींभिक्षांभिक्षेत्याचेत् यःएवंब्रह्मचारिणंनावमानये
त् अनवमन्येत् ५० समसाति यावदर्थंयावत् अर्थप्रयोजनंतत्भैक्ष्यंअन्नंसमाहृत्यआनीय अमाययागुरवेनिवे
द्य तदाज्ञयागुरोआज्ञयाआचम्यप्राङ्मुखःसन् अश्नीयात् ५१ आयुष्यमिति ऋतंसत्यं उदङ्मुखःसन्भुंक्ते एतद्भोज्यं
काम्यपरत्वेअंतरं ५२ सायमिति अंतरंदिवसमध्येभोजनंनकुर्यात्अग्निहोत्रसमोविधिः ५३

उपस्पृश्येति द्विजाः अप उपस्पृश्य आचम्य अन्नं अद्याद्भक्षयेत् भुक्तानंतरं अप उपस्पृशेत् आचमेत् अद्भिः जलैः खानि छिद्राणि मुखनासिकादीनि संस्पृशेत् ५४ पूजयेदिति प्रथमं नित्यं अशनं अन्नं पूजयेत् एतत् अन्नं अकुत्सयन् अद्याद्भक्षयेत् अन्नं दृष्ट्वा हृष्येत् प्रसीदेत् प्रसन्नो भवेत् ५५ पूजितं इति पूजितं संस्कृतं अन्नं बलं ऊर्जं प्रभावं नियच्छति अपूजितं अन्नं यद्भुक्तं इदं तु उभयं बलं ओजः नाशयेत् ५६ अपांतरा भोजनमध्ये एतदुच्छिष्टं नाद्यात् न भक्षयेत् अत्यशनं बहुभोजनं न कुर्यात् शरीरस्यारोग्यत्वात् उच्छिष्टः सन् क्वचिन्न व्रजेत् न गच्छेदिति ५७ अनारोग्येति

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि संस्पृशेत् ५४ पूजयेदशनं नित्यमद्याच्चैवमकुत्सयन् दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनंदेच्च सर्वशः ५५ पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति अपूजितं तु यद्भुक्तमुभयं नाशयेदिदं ५६ नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथांतरा न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ५७ अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनं अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ५८ ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ५९ अंगुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ६० त्रिराचामेदपः पूर्वं द्विःप्रमृज्यात्ततो मुखम् खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ६१

विप्रः ब्राह्मेण तीर्थेन नित्यकालं पादप्रक्षालनपूर्वकं अपः स्पृशेत् आचमेत् कामत्रैदशिकाभ्यां वा कायेन तीर्थेन वा पित्र्येण कदाचन न पित्र तीर्थेन कदाचिदपि नाचमेत् ५९ अंगुष्ठेति तत्तीर्थमाह अंगुष्ठस्य तले ब्राह्मं ब्राह्मसंज्ञं तीर्थं प्रचक्षते कनिष्ठिकाया मूलं कायं प्रजापतिसंज्ञं तीर्थमाहुः अंगुल्यग्रे दैवसंज्ञं तीर्थं भवति तयोरधः पित्र्यं पितृसंज्ञं तीर्थं भवतीत्यर्थः ६० त्रिराचमेदिति अपः पूर्वं त्रिवारं आचमेत् तत आचमनानंतरं मुखं द्विःप्रमृज्य अद्भिः खानि मुखादीनि छिद्राणि स्पृशेत् च पुनः आत्मानं हृदयं शिरश्च स्पृशेत् ६१

अनुष्णाभिरिति धर्मविद्ब्राह्मणेन अद्भिः एकांते एकाग्रचित्तः सन् सर्वदा आचमेत् प्राङ्मुखो वा उदङ्मुखो वा ६२ हृद्गाभि
रिति विप्रः हृद्गाभिः अद्भिः पूजिते भूमिपः कंठगाभिः अद्भिः पूयते प्राशिताभिः अद्भिः तालुगताभिः वैश्यः पूयते
स्त्री च शूद्रश्च अंततः वर्णांततः स्पृष्टाभिः अद्भिः पूयते ६३ उद्धृतेति ६४ मेखलामिति विनिष्टानि मेखलादीनि
अप्सु प्रास्य विनिक्षिप्य अन्यानि नूतनानि मंत्रवत् मंत्रपूर्वकं गृहीत्वा गृह्णीयात् ६५ केशांत इति द्विजानां गोदाना
ख्यं कर्म आह ब्राह्मणस्य केशांतः संस्कारः गोदानाख्यं कर्म इत्यर्थः षोडशे वर्षे विधीयते क्षत्रियस्य द्वाविंशे वर्षे

अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित् शौचेप्सुः सर्वदाचामेदेकांते प्रागुदङ्मुखः ६२ हृद्गाभिः पूयते
विप्रः कंठगाभिस्तु भूमिपः वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः ६३ उद्धृते दक्षिणे पाणावुप
वीत्युच्यते द्विजः सव्ये प्राचीनमावीती निवीती कंठसज्जने ६४ मेखलामजिनं दंडमुपवीतं कमंडलुं अप्सु प्रा
स्य विनिष्टानि गृह्णीतान्यानि मंत्रवित् ६५ केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबंधोर्द्वाविंशे
वैश्यस्य द्व्यधिके ततः ६६ अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषतः संस्कारार्थं शरीरस्य यथाकालं यथा क्र
मं वैवाहिको विधिः स्त्रीणां संस्कारो विधिः वैदिकः स्मृतः पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ६८

केशांत संस्कारः कार्यः वैश्यस्य द्व्यधिके द्वाभ्यां अधिके चतुर्विंशे वर्षे केशांत कर्म ६६ अमंत्रिकेति स्त्रीणां कन्यानां अ
र्द्ध तन्जातकर्मादि क्रियाप्रधान क्रिया अमंत्रिका कर्तव्या आविवाहं शरीरस्य संसकारार्थं यथाकालं कालानुसारे
ण ६७ वैवाहिक इति स्त्रीणां संस्कारः वैवाहिको विधिः वैदिके वेदमंत्रैः स्मृतः स्त्रीधर्मानाह पतिसेवा गुरौ
वासः गुरोः आचार्यस्य समीपे वासः कार्यः अग्नेः परिक्रिया गृहार्थः पाकनिमित्तं ६८ श्री॥ ७ ७

अग्निहोत्रस्येति श्लोकाभ्यां । अग्निहोत्रस्य शुश्रूषा कार्या सायंकाले उद्वासं वैदिकं प्रतिकर्म प्रतिदिनं पत्न्या कार्यं ६९ एष इति अतः कर्मयोगं निबोधत ७० उपनीयेति ७१ अध्येष्यमान इति पूर्वं आचान्तः यथाशास्त्रं यथावेदं उदङ्मुखः अध्येष्यमाणः शिष्यः ब्रह्माञ्जलिकृतः सन् अध्याप्यः ७२ ब्रह्मारंभेति ब्रह्मारंभे वेदारंभे तथा वेदावसाने गुरोः पादौ ग्राह्यौ भवतः हस्तौ संहत्य संयोज्य अध्येयं सहि ब्रह्माञ्जलिः स्मृतः ७३ व्यत्यस्तेति अतन्द्रितः गुरुः

अग्निहोत्रस्य शुश्रूषा सायमुद्वासमेव च कार्यं पत्न्या प्रतिदिनमिति कर्म च वैदिकं ६९ एष प्रोक्तो द्विजातीनामौपनायनको विधिः उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ७० उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः आचारमग्निकार्यं च संध्योपासनमेव च ७१ अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ७२ ब्रह्मारंभेऽवसाने च पादौ ग्राह्यौ गुरोः सदा संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ७३ व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ७४ अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति वारयेत् ७५ ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ७६ प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति ७७

अध्येष्यमाणं शिष्यं भो शिष्य अधीष्व इति ब्रूयात् अनध्ययनतः क्रीडनतः विरामः अस्तु इति वारयेत् ७५ ब्रह्मणः वेदस्यारंभे अध्ययनारंभे सदा प्रणवं कुर्यात् अनोङ्कृतं पूर्वं वेदः स्रवति ओंकारं उच्चारयेत् परस्तादध्ययनात् पश्चादध्ययनाद्वेदः विशीर्यते विस्मरणं यातीत्यर्थः ७६ प्राक्कूलादिति प्राक्कूलान् कुशान् गृहीत्वा गुरुं पर्युपासीनः पवित्रैः कुशैः याचितः संपूतः त्रिभिः त्रिभिः प्राणायामैः पूतो भवेत् ओंकारोच्चारणं स हि अर्हतीति ७७

अकारमिति प्रजापतिः अकारं ऋग्वेदाद्दुहत् उकारं च यजुर्वेदाद्दुहत् मकारं सामवेदाद्दुहत् ऋग्वेदाद्भूः अदुहत् यजुर्वेदात् भुवः सामतः स्वरिति अदुहत् त्रयः व्याहृतयः भवंति ७८ त्रिभ्य इति तस्मात् कारणात् अस्याः सावित्र्याः त्र्यृचः इति निश्चितं त्रिभ्य एव वेदेभ्यः पादं अदुहत् ७९ एतदक्षरमिति एतदक्षरमोंकारं एतां त्रिपदीं व्याहृतिपूर्विकां संध्ययोर्जपन् तदा वेदपुण्येन वेदाध्ययनजन्यपुण्येन युज्यते सहस्र इति तु पुनः जलाद्बहिर्गत्वा एतां त्रिकं त्रिपदां

अकारं चाप्युकारं च मकारं च प्रजापतिः वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ७८ त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिः ७९ एतदक्षरमेतां च जपन्व्याहृतिपूर्विकां संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ८० सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः महतोप्येनसो मासात्त्वचेवाहिर्विमुच्यते ८१ एतयर्चा विसंयुक्तः काले च क्रियया स्वया ।विप्रक्षत्रियविड्योनिर्गर्हणां याति साधुषु ८२ ॐकारपूर्विकास्तिस्रो महाव्याहृतयोव्ययाः त्रिपदा चैव सावित्री विज्ञेयो ब्रह्मणो मुखं ८३

सहस्रकृत्वः सहस्रसंख्यां जप्त्वा महतोपि एनसः पापात् मासात् मासपर्यंतात् विमुच्यते ८१ एतदिति एतयार्चा गायत्र्या विश्लं युक्तं विरहितः काले जपकाले च पुनः स्वया क्रियया सायंप्रातर्होमादिक्रियया विश्लंयुक्तः रहितः विप्रक्षत्रियस्य विड्योनिः साधुषु गर्हणां याति ८२ ॐकारेति त्रिपदा चैव सावित्री ब्रह्मणः वेदस्य मुखं आद्यं तत्पूर्वकं वेदाध्ययनं विज्ञेयं ॐकारपूर्विका महाव्याहृतयः तिस्रः अव्ययाः तद्यथा ॐ भूः ॐ भुवः ॐ स्वरिति त्रयः व्या

३४

व्याहृतयः अप्यवाब्रह्मणः परमात्मनः प्राप्तः मुखंद्वारं एतदध्ययनजपादिना ८३ यइति अहनि अहनिप्रत्यहं एतां त्रिपदीयः अधीते त्रीणि वर्षाणि त्रिवर्षपर्यंतं सः पुरुषः परं ब्रह्म अध्येति ब्रह्मत्वं एतीवायुभूतः वायुरूपः खमूर्तिमान् अमूर्तित्वात् ८४ एकाक्षरमिति एकाक्षरं परं ब्रह्म ॐकाररूपं परं ब्रह्म प्राणायामाः प्राणप्राणसंयामाः परं उत्कृष्टं तपः सावित्र्याः जपात्परं नास्ति मौनात्सत्यं विशिष्यते प्रलापरहितं मौनं प्रलापो नर्थकं वचः

योधीतेहन्यहन्येतांत्रीणि वर्षाण्यतंद्रितः स ब्रह्मपरमाप्नोति वायुभूतः खमूर्तिमान् ८४ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ८५ क्षरंति सर्वे वैदिक्यो जुहोति यजति क्रियाः अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः ८६ विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ८७ ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं ८८

इत्यमरः ८५ क्षरंतीति सर्ववैदिक्यः जुहोति अग्निष्टोमादिना यजति वैश्वदेवादिकं जुहोति इत्यादि क्रियाः क्षरंति श्रवंति अक्षरं ॐकारं अक्षरं अविनाशिरूपं ज्ञेयं प्रजापतिः ब्रह्म ब्रह्मैव वेदस्वरूपमेव ज्ञेयं ८६ विधीति जपयज्ञः जपरूपो यज्ञः विधियज्ञात् अग्निष्टोमादियज्ञः दशभिर्गुणैः विशिष्ट उत्कृष्टः उपांशुः किंचित् श्रवणयोग्यः उपांशुः जपः शतगुणः स्यात् मानसो जपः सहस्रगुणः स्मृतः ८७ ये इति ये चत्वारो पाकयज्ञाः वैश्वदेवादयः विधियज्ञसमन्विताः अग्निहोत्रादियज्ञसमन्विताः सर्वे जपयज्ञस्य षोडशीं कलां नार्हंति ८८

जाप्येनेति ब्राह्मणः गायत्र्या जाप्येनैव संसिद्ध्येत् अन्यज्जपादिकं कुर्याद्वा न वा कुर्यात् ब्राह्मणः मैत्रः अहिंस्रः उच्यते ८९
इंद्रियाणामिति अपहारिषु हरणशीलेषु विषयेषु विचरतां इंद्रियाणां संयमे यत्नं आतिष्ठेत् विद्वान् कद्रव वा
जिनं जंतेव ९० एकेति इन्द्रियाणामुत्पत्तिमाह यानि एकादशेन्द्रियाणि पूर्वे मनीषिणः आहुः तानि सम्यक् प्रव
क्ष्यामि अनुपूर्वशः ९१ श्रोत्रमिति श्रोत्रं श्रवणं त्वक् चक्षुषी नेत्रे जिह्वा पंचमी नासिका यायु गुदं उपस्थं गुह्येन्द्रि

जाप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ८९ इंद्रियाणां विचर
तां विषयेष्वपहारिषु संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनं एकादशेंद्रियाण्याहुः यानि पूर्वे मनी
षिणः तानि सम्यक् प्रवक्ष्यामि यथावदनुपूर्वशः ९१ श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पंचमी
पायूपस्थं हस्तपादौ का वाक् चैव दशमी स्मृता ९२ बुद्धींद्रियाणि पंचैषां श्रोत्रादीन्यनुपूर्वशः कर्मेन्द्रि
याणि पंचैषां पाय्वादीनि प्रचक्षते ९३ एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकं यस्मिन् जिते जितावेतौ
भवतः पंचकौ गुणौ इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति
९५ न जातु कामः कामानां उपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ९६

यं हस्तपादौ एते पंच एषां एकादशेन्द्रियाणां मध्ये पंच श्रोत्रादीनि पंच बुद्धीन्द्रियानि ज्ञानेंद्रियाणि पाय्वादीनि
पंचैव कर्मेन्द्रियाण्याहुः ९२ बुद्धीन्द्रियाणीति ९३ एकादशमिति मनः एकादशं इंद्रियं ज्ञेयं स्वगुणेन उभयात्मकं
ज्ञानेन्द्रियकर्मेन्द्रियरूपं यस्मिन् मनसि जिते एतौ पंचकौ भवतः ९४ इंद्रियाणामिति पुरुषः इन्द्रियाणां प्रसंगेन
संयोगेन दोषं ऋच्छति प्राप्नोति असंशयं तानि इन्द्रियाणि सन्नियम्य जित्वा सिद्धिं नियच्छति प्राप्नोति ९५
न जात्विति काम्यंत इति कामाः तेषां कामानां उपभोगेन जातु कामः न शाम्यति ९६

यः पुरुषः एतान्सर्वान्प्राप्नुयात् यः पुरुषः एतान्कामान्केवलान्नृत्यजेत् सर्वकामानांप्रापनात् प्राप्तिकामान्सर्वकामानां परित्यागो विशिष्यते ९७ नेतिकामानांप्रसंचयातानि इंद्रियानिविषयेषुसंनिमंतुंनयानशक्यंते कोदृशानिप्रदुष्टानि प्रकर्षेणरुष्टा यथाज्ञानेनज्ञानमार्गेणानित्यशः नियंतुंशक्यंते ९८ वेदा इति दुष्टभावयस्य वेदायाः सिद्धिंकर्हिचित् नगच्छंति वेदावेदाध्ययनानित्यागाः दानानि ९९ श्रुत्वेति यः नरः विषयान्श्रुत्वा न हृष्यति नग्लापयतिसः

पश्यैतान्प्राप्नुयात्सर्वान्पश्यैतान्केवलान्त्यजेत् प्रापनात्सर्वकामानांपरित्यागोविशिष्यते ९७ नतथैतानिशक्यंते संनियंतुमसेवया विषयेषुप्रदुष्टानियथाज्ञानेनानित्यशः ९८ वेदांतस्त्यागाश्चनियमाः चतपांसिच नविप्रदुष्टभावस्यसिद्धिं गच्छंतिकर्हिचित् ९९ श्रुत्वास्पृष्ट्वाच दृष्ट्वाचभुक्त्वाघ्रात्वाचयोनरः नहृष्यतिग्लापयति वासविज्ञेयोजितेंद्रियः १०० इंद्रियाणांतुसर्वेषां यद्येकंक्षरतींद्रियं तेनास्यक्षरतिप्रज्ञा दृतेः पादादिवोदकं १ वसेकृत्वेंद्रियग्रामंसंनियम्यमनस्तथा सर्वान्संसाधयेदर्थान् अक्षिण्वन्योगतस्तनुं २ पूर्वासंध्यांजपनातिष्ठेत्सावित्रीमर्कदर्शनात् पश्चिमांतुसमासीनोसम्यगृक्षविभावनात् ३ पूर्वासंध्यांजपस्तिष्ठन्नैशमेनोव्यपोहति पश्चिमांतुसमासीनोमलंहंतिदिवाकृतं ४

जितेंद्रियः ग्लेहर्षे इत्यस्यधातोः रूपं १०० इंद्रियाणामितिसर्वेषांइंद्रियाणांमध्येयद्येकं इंद्रियंक्षरति स्रवति तेन कारणेन अस्यपुंसः प्रज्ञाक्षरति दृतेः पादात् उदकमिव दृतिचर्मकोशः १ वशेति इंद्रियग्रामंवसेकृत्वा तथामनः संनियम्य सर्वान् अर्थान् साधयेत योगतः योगाभ्यासतः तनुं देहं अक्षिण्वन् क्षीणंकुर्वन् इति २ पूर्वामिति संध्योपासनविधिमाह पूर्वांसंध्यांसावित्रींजपन् अर्कदर्शनात्सूर्यदर्शनं देहपर्यंतंतिष्ठेत् पश्चिमांसंध्यांसमासीनः ऋक्षविभावनात् नक्षत्रदर्शनपर्यंतंगायत्रींजपन्तिष्ठ ३ पूर्वेति पूर्वांसंध्यांगायत्रींजपंस्तिष्ठन्निशायांभवंनैशं एनः पापंव्यपोहति नाश

३१

मनुः स्मृ० टी०
१६

नैतय: पुरुषः पूर्वां पश्चिमां संध्यां न उपास्ते न करोति सः सर्वस्मात् द्विजकर्मणः सकाशात् बहिर्वाह्यः कार्यः निष्काशनीयः ५
सुगमं अपामिति नैत्यकं विधिं आस्थितः सन् अपां निकटे नियतः सावित्रीं जपेत् गत्वारण्यं समाहितः सन् पुरुषा
दिकृतः सन् सम्यक् अधीयीति अध्ययनं कुर्वीत ६ वेदइति वेदोपकरणे उपाकर्मकरणे नैत्यके स्वाध्याये नित्ये स्वा
ध्याये अनध्यायः अध्ययनस्य अनुरोधो न भवेत् च पुनः होममंत्रेषु मंत्रोच्चारेषु अनध्यायो न भवेत् नित्यकर्म

नतिष्ठति च यः पूर्वामुपास्ते न तु पश्चिमां स विद्वान्द्विर्वहिः कार्यः सर्वस्माद्द्विजकर्मणः ५ अपां समीपे नियतो नै
त्तिकं विधिमास्थितः सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ६ वेदोपकरणे चैव स्वाध्याये चैव नैत्तिके
नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि ७ नैत्तिके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतं ब्रह्माहुतिहुतः पु
ण्यमनध्यायवषट्कृतं ८ यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः तस्य नित्यं क्षरत्येष पयो दधि घृतं
मधु ९ अग्नींधनं भैक्ष्यचर्यामधः शय्यां गुरोर्हितं आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः १०

णि अनध्यायो नास्ति ततः अध्ययनं ब्रह्मसत्रं ब्रह्मदत्तं ब्रह्मयज्ञः स्मृतः ब्रह्मं हुतिहुतं पुण्यं ब्रह्मणा हुतिहुतं
ब्रह्माहुतिहुतं वेदाहुतिहुतमित्यर्थः ब्रह्मणा श्रुवेणाहुति हुतं भिवार्थ अनध्याये वषट्कृतं पुण्यं भवति यइति
यः पुरुषः अब्दपर्यंतं स्वाध्यायं अधीते करोति तस्य नित्यं एषः स्वाध्यायः पयो दधि घृतं मधु क्षरति स्रवति
ददातीत्यर्थः धर्मार्थकाममोक्षाः पयोरूपो धर्मः दधिरूपो अर्थः घृतरूपो कामः मधुरूपो मोक्षः अग्नीति ब्रह्म
चारी धर्मानाह कृतोपनयनो द्विजः असमावर्तनपर्यंतं अग्निं अग्निशुश्रूषां कुर्यात् इंधनं गुरोः इंधनानयनं गुरोर्हितं कुर्यात्

रामः
१६

आचार्येति आचार्यपुत्रादि एते दश धर्मतः स्वपुत्रादि अध्याप्याः अध्ययनयोग्या भवंति नपृष्टइति अपृष्टः सन कस्यचि
त्तु न ब्रूयात् अन्यायेन पृष्टतः कस्यचित् नब्रूयात् मेधावी जानन्नपि जडवत् लोक आचरेत् १२ अधर्मेणेति द्वाभ्यामाहयः
ब्रह्मचारी अधर्मेण अनतेन प्राह यः अधर्मेण पृच्छति तयोर्मध्ये अन्यतरः एकः प्रैति मृत्युं एति यदिज्ञोवेत्तु विद्वेषं अधिगच्छ
ति १३ धर्मार्थाविति यत्र ब्रह्मचारिणि धर्मार्थौ नस्यातां धर्मश्च अर्थश्च धर्मार्थौ न भवतः चपुनः तद्विधा शुश्रूषा गुरुयोग्या शु
श्रूषा न नस्यात् तत्र तस्मिन्ब्रह्मचारिणि विधानवक्तव्या ज्ञानं नवक्तव्यामित्यर्थः ऊषरे भूमौ शुभं बीजमिव निष्फलं भवतीत्यर्थः १४

आचार्यपुत्रः शुश्रूषुः ज्ञानदो धार्मिकः शुचिः आप्तः शक्तोर्थदः साधुः स्वाध्याप्या दश धर्मतः ११ नपृष्टः कस्यचित्तु ब्रूया
न्नचान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोक आचरेत् १२ अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति तयोरन्य
तरः प्रैति विद्वेषं वाधिगच्छति १३ धर्मार्थौ यत्र न स्यातां शुश्रूषा चापि तद्विधा तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे
विद्ययैव समं कामं मंतव्यं ब्रह्मवादिनां आपद्यपि हि घोरायां नत्वेनामिनिवेदयत् १५ विद्या ब्राह्मणमित्याह शे
वधिस्तेस्मि रक्षमां असूयकाय मामादास्तथा स्यां वीर्यवत्तमा १६

विद्येति ब्रह्मवादिना कामं अतिशये न विद्ययैव समं विद्यासंयुक्तं मर्तव्यं मरणं कर्तव्यं आपद्यपि घोरायां एनां विद्यां इरिणे
ऊषरे भूमौ न वपेत् न दद्यात् १५ विद्येति विद्या ब्राह्मणं इति अद्विशेवधि तेअस्मि शेवधि निधिः ते तवास्मि यथा शेव
धिः रक्षते तथा मां त्वं रक्ष मां असूयकाय असूयायुक्ताय यथा मा दा मा देहि तथा वीर्यवती प्रभाववती अहं स्यामिति
निधिनोपमो विधिरित्यर्थः १६

मनुस्म०टी०
१७

यमिति यं ब्रह्मचारिणं शुचिं विद्यात् नियतं तस्मै ब्रह्मचारिणे मां ब्रूहि कीदृशाय निधिपाय निधिं याति इति निधयः त
स्मै अप्रमादिने प्रमादशून्याय प्रमादो नवधानता इत्यमरः यथा निधिं याति तथा मां यः पाति रक्षति तस्मै १७ ब्र
ह्मेति यः ब्रह्मचारी गुरोः अननुज्ञातं अनध्यायतं अधीयानात् ब्रह्मवेदं आप्नुयात् सः ब्रह्मस्तेयः वेदस्तेयसंयुक्तो
नरकं प्रतिपद्यते १८ लौकिकमिति यतः शाकाश्चात् लौकिकादि ज्ञानं आददीत स्वीकुर्यात् तं ज्ञानोपदेष्टारं पूर्वं अ
भिवादयेत् १९ सावित्रीति सुयंत्रितः वशीकृतचित्तः विप्रः सावित्रीमात्रसारोपि वरं उत्कृष्टं भवति नयंत्रितः

यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणं तस्मै मां ब्रूहि विप्राय निधिपायाऽप्रमादिने १७ ब्रह्म यस्त्वननुज्ञातमधी
यानादवाप्नुयात् स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते १८ लौकिकं वैदिकं चापि तथाध्यात्मिकमेव च आद
दीत यतो ज्ञानं तं पूर्वमभिवादयेत् १९ सावित्रीमात्रसारोपि वरं विप्रः सुयंत्रितः नायंत्रितः त्रिवेदोपि सर्वा
शी सर्वविक्रयी २० शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवाद
येत् २१ ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति प्रत्युत्थानाऽभिवादाभ्यां पुनस्तान् प्रतिपद्यते २२

अयंत्रितः नवशीकृतचित्तः स न त्रिवेदोपि त्रिवेदाध्यायी तु सर्वाशी सर्वविक्रयी वरं न उत्कृष्टो भवति शय्येति अ
ध्याचरिते अधिष्ठिते शय्यायां आसने च श्रेयसा पुरुषेण सह न समाविशेत् न उपविशेत् स्वयं शय्यासनस्थश्चेत्
प्रत्युत्थाय आसनात् उत्थाय एनं ज्ञानदं अभिवादयेत् २१ ऊर्ध्वमिति पुनः प्राणाः स्थविरे आयाति सति
आगच्छति सति ऊर्ध्वं हृदयात् ऊर्ध्वं उत्क्रामं ऊर्ध्वं गच्छंति यूनः प्रत्युत्थानाभिवादाभ्यां उत्थानं च अभिवादनं च अभि
वादनं कृत्वा तानुद्देयस्यानु च पुनः प्रतिपद्यते स्वस्थानस्थिताः प्राणा भवंतीत्यर्थः २२ श्रीराधारमयति

राम:
१७

अभिवादनेति नित्यं वृद्धोपसेविनः तस्य चत्वारि वर्द्धन्ते आयुः प्रज्ञा यशो बलं कीदृशस्य तस्य अभिवादनशीलस्य २३ अभि
वादादिति विप्रः ज्यायांसं दृष्ट्वा अभिवादात्परं केवलं अभिवादनात्परं ऊर्द्ध्वं वा पूर्वं अभिवादयेत् असौ नामाहं अस्मि इति
परिकीर्तयेत् २४ नामधेयेति तथैव सर्वाः स्त्रियः अहं इति ब्रूयात् २५ भोशब्दमिति अभिवादने स्वस्य नाम्नः अं
वले

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलं २३ अभिवादात्परं विप्रो ज्यायांस
मभिवादयेत् असौ नामाहमस्मीति स्वनाम परिकीर्तयेत् २४ नामधेयस्य ये केचित् अभिवादं न जानते तान्प्राज्ञो
हमिति ब्रूयात् स्त्रियः सर्वास्तथैव च २५ भोशब्दं कीर्तयेदन्ते स्वस्य नाम्नोभिवादने नाम्नां स्वरूपभावो हि भोभाव ऋ
षिभिः स्मृतः २६ आयुष्मान्भव सौम्येति वाच्यो विप्राभिवादने अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः २७
यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः २८ ब्राह्मणं कुशलं पृच्छेत् क्ष
त्रबंधुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च २९ अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् भोभ
वत्पूर्वकं त्वेनमभिभाषेत धर्मवित् परपत्नी तु या स्त्री स्यादसंबंधा तु योनितः तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति वा ३१

अन्ते भोशब्दं कीर्तयेत् भोभावः नाम्नां स्वरूपभावः ऋषिभिः स्मृतः अमुकशर्माहमभिवादये इत्यर्थः २६ आयुष्मानि
ति अस्य नाम्नः अन्ते अकारः पूर्वाक्षरः प्लुतः वाच्यः तद्यथा अमुकशर्माहं अमुकनामाहमित्यर्थः २७ यो नेति २८
ब्राह्मणमिति २९ अवाच्य इति यः यवीयानपि दीक्षितः नाम्ना अवाच्यो भवेत् भो अमुकशर्मन् इति भवति पूर्वकं ए
नं दीक्षितं धर्मवित् अभिभाषेत ३० परपत्नीत्विति या स्त्री परपत्नी स्यात् तु पुनः योनितः असंबंधा तु नो यस्याः
संबंधो नास्ति तां स्त्रियं भवती सुभगे इत्येवं वा भागिनी इति वा ब्रूयात् ३१

मातुलानीति यवीयसः कनिष्ठान् मातुलादीन् प्रत्युत्थाय असौ अहं नमस्करोमि इति ब्रूयात् ३२ मातृष्वसेति गुरुभार्यया
सह गुरूणां ज्येष्ठानां भार्या गुरुभार्या तया गुरुभार्यया सहरणाः समस्ता मातृष्वस्रादयो नमस्करणीया भवन्ति गुरुपत्नी
वत् विशेषेण संपूज्या भवति ३३ भ्रातुरिति भ्रातुर्भार्या सवर्णा अहन्यहनि नित्यं उपसंग्राह्या ज्ञातिसंबन्धिन्यो योषि
ताः विप्रोष्य प्रवासीदागत्य उपसंग्राह्याः ३४ पितुरिति पितुर्भगिन्यां मातुश्च भगिन्यां ज्यायस्यां ज्येष्ठायां स्वसर्यपि भ

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ३२ मातृष्वसा मातुलानी
श्वश्रूरथ पितृष्वसा संपूज्या गुरुपत्नीवत्समस्ता गुरुभार्यया ३३ भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि वि
प्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः ३४ पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो
गरीयसी ३५ दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृतां त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु ३६ ब्राह्मणं दशव
र्षं तु शतवर्षं तु भूमिपं पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ३७ वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ए
तानि मान्यस्थानानि गरीयो यद्यदुत्तरं ३८

गिन्यपि ३५ दशेति पौरसख्यं पौराणां एकपुरनिवासिनां विद्यादिगुणरहितानां सख्यं दशाब्दाख्यं दशवार्षिकसख्यं विश्वासास्प
दं कलाभृतां काव्यनाटकादिज्ञातॄणां पञ्चाब्दसख्यं पञ्चाब्दाख्यं पञ्चवार्षिकं सख्यं श्रोत्रियाणां त्र्यब्दपूर्वकं सख्यं स्वयोनिषु स्व
संबन्धिषु अल्पेनापि नमस्कारहेतुः सख्यं कार्यं पञ्चत्रिकाद्यात्मेषु व्यवहरणं ३६ ब्राह्मणमिति ब्राह्मणं दशवर्षं तु दशवा
र्षिकः ब्राह्मणः स तु वर्षीयः क्षत्रियः तस्य क्षत्रियस्य ब्राह्मणः पूज्यः पितृरूपं ब्राह्मणं पुत्ररूपं क्षत्रियं जानीयात् तयोः
क्षत्रियवैश्ययोः ब्राह्मणः पिता पितृस्थानीय इत्यर्थः ३७ वित्तमिति वित्तं वित्तवत्त्वं बन्धुः वयः वयसाधिक्यं तु कर्म क
र्तारं विद्या पञ्चमी भवति एतानि मान्यस्थानानि पूज्यस्थानानि यद्यत् उत्तरं गरीयः पूज्यो भवतीत्यर्थः पञ्चानां वित्तादीनां
यत्र पूर्वमप्येकं भवति स उत्तरस्मादपि मान्यः तेन वित्तबन्धुयुक्तो वयोधिकात् मान्यः एवं वित्तादिगुणत्रय

मुक्तः कर्मतः वित्तादिचतुष्टययुक्तविदुषो मान्यः गुणवानितिहृत् ३८ पंचानामिति वित्तवंतादीनां पंचानां मध्ये त्रिषु वर्णेषु गु
णवंति भूयांसि बहूनि यत्र स्युः ते समानार्हा भवंति यथा त्रिषु वर्णेषु यदि ब्राह्मणा बहवः संति तर्हि ये गुणिनः सर्वांतितेमा
नार्हा भवतीत्यर्थः बहवः क्षत्रियाः संति चेत्तेषां क्षत्रियाणां मध्ये ये गुणिनः भवंति ते मानार्हा भवंतीत्यर्थः बहवः
वैश्याः संति तेषां मध्ये गुणिनः भवंति ते मानार्हा भवंतीत्यर्थः शूद्रोपि दशमीं गतः वृद्धत्वं गतः सन् मानार्हः पूजार्हः
स्यादित्यर्थः ३९ चक्रिण इति दशमीस्थस्य चक्रिणः वृद्धस्य चक्रिणः तैलिकस्य पंथा देयः भारिणः भाराक्रांतस्य

पंचानां त्रिषु वर्णेषु भूयांसि गुणवंति च यत्र स्युः सोऽत्र मानार्हः शूद्रोपि दशमीं गतः ३९ चक्रिणो दशमीस्थस्य
भारिणो रोगिणः स्त्रियः स्नातकस्य च राज्ञश्च पंथा देयो वरस्य च ४० तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ रा
जस्नातकयोश्चैव स्नातको नृपमानभाक् ४१ उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं सरहस्यं च तं
माचार्यं प्रचक्षते ४२ एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः योऽध्यापयति वृत्त्यर्थं उपाध्यायः स उच्यते ४३
निषेकादीनि कर्माणि यः करोति यथाविधि संभावयति चान्नेन स विप्रो गुरुरुच्यते ४४ अग्न्याधेयं पाकयज्ञा
नग्निष्टोमादिकान्मखान् यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ४५

रोगिणः रोगाक्रांतस्य स्त्रियः स्नातकस्य च राज्ञश्च पुनः वरस्य च विद्यास्नातकः व्रतस्नातको वा एतेषां पंथा देयः व
रो विवाहयोग्यः ४० तेषामिति समवेतानां तेषां चक्र्यादीनां स्नातकपार्थिवौ मान्यौ भवतः राजस्नातकयोर्मध्ये नृप
स्य मानभाक् स्नातकः भवत्येव स्नातकः पूज्य इत्यर्थः ४१ उपनीयेति समवेतानां सद्द्विजः उपनीय शिष्यं वेदं अध्याप
येत् च पुनः सरहस्यं सकल्पं शिक्षाकल्पव्याकरणादिसहितं अध्यापयेत् यस्तं आचार्यं प्रचक्षते सरहस्य अत्यंतंत
र्थ्योपनिषत्सहितं इत्यर्थः एकदेशमिति मंत्रब्राह्मणयोरेकदेशः ४२ निषेकेति गर्भाधानादिनिषेकादीनि कर्माणि यथावि

धिय: करोति स गुरुरुच्यते अन्नेन अन्नप्राशनेन य: अन्नदानेन प्राशयति स उच्यते ४४ अग्न्याधेयमिति अग्न्याधेयं अग्नि
होत्रं पाकयज्ञान् बलिवैश्वदेवादीन् अग्निहोत्रसंतकान् मखान् यस्य वृत: सन् य: करोति स तस्य ऋत्विक् इह गुरुरुच्य
ते ४५ य इति य: ब्रह्मणा वेदेन उभौ श्रवणौ अवितथं सत्यं आवृणोति आच्छादयति य: गायत्र्यापदेशं स नय: करो
तीत्यर्थ: समा तु तुल्यपत्नी य: स पितृत्वव्यात्तुल्यत्वेय: गायत्र्योपदेष्टारं कदाचन न द्रुह्यात् ४६ उपाध्यायेति उपाध्यायात् द
शगुणा आचार्य: श्रेष्ठ: उच्यते आचार्याणां मध्ये शतेन शतगुणा: श्रेष्ठ: पिता भवत्येव पितु: सहस्रगुणितं माता पूज्या हि गौ
रवेण श्रेष्ठा उच्यते ४७ उत्पादकस्य ब्रह्मदाता च उत्पादकब्रह्मदातारौ तयो उत्पादकब्रह्मदात्रोर्मध्ये ब्रह्मद: पिता वेदाध्यापक

य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ समाता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन ४६ उपाध्यायान्दशाचार्य: आचार्या
णां शतं पिता सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते ४७ उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मद: पिता ब्रह्मजन्म हि विप्र
स्य प्रेत्य चेह च शाश्वतं ४८ कामान्माता पिता चैनं यदुत्पादयतो मिथ: संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ४९
आचार्यस्त्वस्य तां जातिं विधिवद्वेदपारग: उत्पादयति सावित्र्या सा सत्या साजरामरा ५० अल्पं वा बहु वा यस्य श्रुतस्यो
पकरोति य: तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ५१ ब्राह्मस्य जन्मन: कर्ता स्वधर्मस्य च शासिता बालोपि वि
प्रो वृद्धस्य पिता भवति धर्मत: ५२

रूप: गायत्र्योपदेष्टा पिता गरीयान् श्रेष्ठो भवतीत्यर्थ: विप्रस्य ब्रह्मजन्म प्रेत्य परलोके इह च लोके शाश्वतं गायत्र्युपदेशे
न यज्जन्म तत् शाश्वतमित्यर्थ: ४८ कामादिति यत् योनौ अभिजायते तां संभूतिं विद्यात् यत योनौ अभिजायते ४९
आचार्य इति आचार्य: सावित्र्युपदेशात् तस्य तां जातिं उत्पादयति सा जाति: सत्या नित्या सा अजरा जाति: अमरा जाति
र्भवत्येव ५० य: यस्य श्रुतस्य अध्ययनस्य अल्पं वा बहु वा उपकरोति उपकारयेत् तमपि इह गुरुं विद्यात् तया श्रुतोपक्रि
यया श्रुतं अध्यापनं तस्य उपकारिणेत्यर्थ: ५१ ब्रह्मस्य जन्मन: कर्ता वेदाध्यापक: च पुन: स्वधर्मस्य शासिता उपदेष्टा
बालोपि विप्र: वृद्धस्य शिष्यस्य धर्मत: पिता भवति ५२

अध्यापयेति शिशुः आंगिरसः कविः पितृन् अध्यापयामास तान् पितृन् ज्ञानेन ज्ञानोपदेशेन परिगृह्य स्वी कृत्य इति हे पुत्रका ३वाच ५२ ते पितरः आगतमन्यवः देवान् प्रति अर्थं पुत्रमित्यर्थः अपृच्छंत देवा तान् समेत्य इति ऊचुः वः युष्माकं शिशुः उक्तवान् तत् न्याय्यं योग्यमित्यर्थः ५४ अज्ञः शास्त्रापदेशज्ञानरहितः अवधारणार्थः बाल एव भवति स एव बालः मंत्रतः मंत्रोपदेशात् ज्ञानोपदेशात् पिता भवति तथाहि निश्चयेन अज्ञं बालं आहुः मंत्रदं उपदेष्टारं पितेत्येव ज्ञेयमिति ५५ न हायनैरिति ऋषयः बहुभिः गतहायनैः पलितैः केशैः न च संचरितैः न बंधुभिः श्रेष्ठतां जातिभिः अनूचानः वेदपारगः सः

अध्यापयामास पितृन् शिशुरांगिरसः कविः पुत्रका इत्यहो वाच ज्ञानेन परिगृह्य तान् ५२ ते तमर्थमपृच्छंत देवानागतमन्यवः देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ५४ अज्ञो भवति वै बालः पिता भवति मंत्रतः अज्ञं हि बालमित्याहुः पितेत्येव तु मंत्रदं ५५ न हायनैर्न पलितैर्न वित्तेन न बंधुभिः ऋषयश्चक्रिरे धर्मं योनूचानः स नो महान् ५६ विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ५७ न तेन वृद्धो भवति येनास्य पलितं शिरः यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ५८ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः यश्च विप्रोनधीयानस्त्रयस्ते नाम बिभ्रति ५९ यथा षंढोऽफलः स्त्रीषु यथा गौर्गवि चाफला यथा चाज्ञेऽफलं दानं यथा विप्रोनृचोऽफलः ६० अहिंसयैव भूतानां कार्यं श्रेयोनुशासनम् वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ६१

नः अस्माकं मतेन महान् श्रेष्ठः इति धर्मं ऋषयः चक्रिरे इत्यर्थः ५६ विप्राणामिति ५७ नेति अस्य शिरः येन वयसा पलितं भवेत् तेन वयसा वृद्धो न भवतीत्यर्थः ५८ यथेति अनधीयानः विप्रः यथा चर्ममयो मृगः तथा अनधीयानामेव भवं बिभ्रतीत्यर्थः ५९ यथेति षंढः स्त्रीषु यथा अफलं भवत्येव यथा गौः गवि संयोगे विफला भवति यथा अज्ञे मूर्खे दत्तं दानं अफलं भवति निःफलमित्यर्थः तथा अनृचः विप्रः अफलः भवति ऋङ्मात्रं अपि नाधीयान इत्यर्थः ६० अहिंसेति भूतानां प्राणिनां अहिंसयैव श्रेयः कार्यं इति वा श्रेयो वेदः तस्य वेदस्य अनुशासनं धर्ममिच्छता पुंसा वाक् मधुरा श्लक्ष्णा मयोज्या ६१

मनुस्मृ.टी०

२०

यस्येति द्वाभ्यां यस्य पुंसः वाङ्मनसी शुद्धे भवतः च पुनः सम्यक् गुप्ते रक्षिते व्यर्थालापरहिते इत्यर्थः सः वेदान्तोपगतं फलं वेदोऽ
क्तं फलं सर्वं प्राप्नोति आर्तोपि सन् अरुंतुदः न स्यात् अरुंतुदः स्यात् पापकृत्यमरः परद्रोही न भवेत् यया वाचा उद्विजेत
अलोक्यां लोककर्मप्रहितां अप्रकृत्यमपि तां न उदीरयेत् न वदेदिति ६१ संमानादिति अपमानस्य प्राप्तिः सदा आकांक्षेत् अ
मृतस्येव प्राप्तिर्यथा आकांक्षति तथा सुखमिति यः अवमतः तिरस्कृतः सः ब्राह्मणः सुखं सेते यः अवमंता तिरस्कारं

६२

यस्य वाङ्मनसी शुद्धे सम्यक् गुप्ते च सर्वदा स वै सर्वमवाप्नोति वेदान्तोपगतं फलं ६२ नारुंतुदः स्यादार्तोपि न परद्रो
हकर्मधीः यया उद्विजेत वाचा नालोक्यां तामुदीरयेत् ६३ संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव अमृतस्ये
व चाकांक्षेदवमानस्य सर्वदा ६४ सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते सुखं चरति लोकेस्मिन्नवमंता विनश्य
ति ६५ अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः गुरौ वसन् संचिनुयात् ब्रह्माधिगमिकं तपः ६६ तपोविशेषैर्विवि
धैर्व्रतैश्च विविधोदितैः वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मना ६७ वेदमेव सदाभ्यस्येत् तपस्तप्स्यन् द्विजो
त्तमः वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ६८ आ हैव स नखाग्रेभ्यः परमं तप्यते तपः यः स्रग्व्यपि द्विजो
धीते स्वाध्यायं शक्तितोन्वहं ६९ योनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सा ७०
मनौ मातुरग्रेधिजननं द्वितीयं मौञ्जिबंधने तृतीयं यज्ञदीक्षायां द्विजस्य विधिनोदनात् ७१

कृतौ यः पुरुषः विनश्यति ६५ अनेनेति अनेन क्रमयोगेन अनेन प्रकारेण संस्कृतात्मा द्विजः गुरौ वसन् तपः संचिनुयात् संग्रहं कुर्या
दित्यर्थः कीदृशं तपः ब्रह्माधिगमं ब्रह्मणः वेदस्य अधिगमकं प्राप्तिसाधनमित्यर्थः ६६ द्विजन्मना सरहस्यो वेदः कृत्स्नः अधिगंतव्यः
तपसः विशेषैर्व्रतैर्विविधैः विविधशास्त्रोदितैः ६७ वेदमिति आहैवेति स मनुः नखाग्रामुख्यामेषां स नखाग्राः तेभ्यः नखाग्रे
भ्यः ऋषिभ्यः आह ऋषि स्वाध्यायमन्वहं शक्तितः अधीते शः परमं तपः कर्म करोति ६९।७० मातुरिति द्विजत्वमाह मातुः स
काशात् अग्रे अधिजननं जन्म द्वितीयं जन्म मौञ्जीबंधने भवति यज्ञदीक्षायां तृतीयं जन्म द्विजस्य विधिनोदनाद्भवतीत्यर्थः ७१

श्रे

राम: २०

यत्रेति यत्र द्विजानां मध्ये अस्य द्विजस्य ब्रह्मजन्म ब्राह्मणं वेदस्य सकाशात् जन्मवंधुनाचिह्नितं तत्र जन्मनि अस्य सावित्री माता पिता
आचार्य उच्यते १२ वेदेति वेदप्रदानात् वेदस्य अध्यापनात् आचार्यं पितरं पितृतुल्यं प्रचक्षते अस्य द्विजस्य आमौंजीबंधनात्
किंचित्कर्म वर्तव्यं न विद्यते विना यज्ञोपवीतं कर्माहीनं भवतीत्यर्थः १३ ब्रह्म वेदं न अभ्यभिहरेत् न वेदस्य उच्चारणं कुर्यात् प्रे
तकर्मणः स्वधानिनयनादृते अकृतोपनयनस्य द्विजस्य पित्रोर्मरणे भवेत् चेत्तर्हि स्वधोच्चारणं कर्तव्यं प्रेतकर्म करणीयं या
वद्वेदे न जायते वेदस्य सकाशात् जन्म न भवेत् तावत् शूद्रस्य प्रायो भवेत् १४ अस्य द्विजस्य कृतोपनयनस्य व्रतादेशनं व्रताचर

यत्र यद्ब्रह्मजन्मास्य मौंजीवंधनचिह्नितं तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते १२ वेदप्रदानादाचार्यं पितरं परिच
क्षते नह्यस्य विद्यते कर्म किंचिदामौंजीबंधनात् १३ नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते शूद्रेण हि समस्तावत् यावद्वेदे
न जायते १४ कृतोपनयनस्यास्य व्रतादेशनमिष्यते ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकं १५ यद्यस्य विहितं धर्मं यत्सू
त्रं या च मेखला यो दंडो यश्च वसनं तत्तदस्य व्रतेष्वपि १६ सेवेत मांस्तु नियमान् ब्रह्मचारी गुरौ वसन् संनियम्येन्द्रिय
ग्रामं तपोवृद्ध्यर्थमात्मनः १७ नित्यं स्नात्वा शुचिः कुर्यात् देवर्षिपितृतर्पणं देवताभ्यर्चनं चैव समिदाधानमेव च १८
वर्जयेन्मधु मांसं च गंधं माल्यं रसान् स्त्रियः शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् १९ अभ्यंगमंजनं चाक्ष्णोरुपा
नत्छत्रधारणं कामं क्रोधं च लोभं च नर्तनं गीतवादनं २०

णं इष्यते ब्रह्मणः वेदस्य ग्रहणं क्रमेण ऋक्यजुः साम क्रमेण विधिपूर्वकं ग्राह्यं १५ यद्येति यस्य ब्राह्मणस्य वा क्षत्रस्य वा वैश्य
स्य वा मन्त्रं यज्ञोपवीतं धर्म विहितं धर्मा हि केस्य्चित् यः दंडः यत्तु वसनं तत्तत्तत् अस्य द्विज व्रतेष्वपि १६ सेवेतेति ब्रह्मचारी
गुरौ वसन् गुरोः समीपे वसन् इमान् नियमान् सेवेत न कुर्यात् १७ नित्यमिति समिधादीनं अग्नौ धानं स्थानं कर्तव्यं १८ वर्जयेदि
ति मध्वादि वर्जयेत् स्त्रियः भोगार्थं वर्जयेत् सर्वप्राणिनां हिंसनं वर्जयेत् शुक्तद्रव्यांतरसंयोगात् अम्लतामापन्नानि निष्ठुरवचना
नि वा अभ्यंगमिति अभ्यंगं तैलादिना अक्ष्णो रंजनं कज्जलादिना वर्जयेत् उपानत् छत्रधारणं कुर्यात् कामादि वर्जयेत् २०

मनुस्मृ० टी०
२९

द्यूतमिति द्यूतादि स्त्रीणां प्रेक्षणं तथा स्पर्शं आलिंगनं परस्य अन्यस्य उपाघातं मनोदुःखकारणं वर्जयेत् ७९ एक इति एकः शयीत
स्त्रिया सह न शयीत रेतः क्वचित् न स्कंदयेत् इच्छन् न पातयेत् तद्यथा अयोनौ च विजातौ च पशुयोनौ तथाविधः ८० स्व
प्नदृष्टे ब्रह्मचारी द्विजः स्वप्ने शुक्रं अकामतः सिक्त्वा शुक्रं पातयेत् चेत्पूर्वं स्नात्वा अर्कं मर्चयित्वा त्रिः त्रिवारं पुनर्मामिति ऋचं ज
पेत् ८१ उदेति गोसकृत् गवां सकृत् गोमयं यावदर्थं यावत्प्रयोजनं च चाहरेत् आनयेत् अहरहः भैक्षं चरेत् वेदेति वेदयज्ञैः
अहीनानां न हीनानां पूर्णानां स्वकर्मसु स्वस्य स्वकर्मसु प्रशस्तानां गेहेभ्यः अन्वहं प्रत्यहं प्रयत्नः सन् ब्रह्मचारी भैक्षं आचरेत् ८३

द्यूतं च जनवादं च परिवादं तथानृतं स्त्रीणां च प्रेक्षणालंभमुपघातं परस्य च ७९ एकः शयीत सर्वत्र न रेतः स्कंदयेत्क्वचि
त् कामाद्धि स्कंदयन् रेतो हिनस्ति व्रतमेव तु ८० स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः स्नात्वार्कमर्चयित्वा त्रिः पुन
र्मामित्यृचं जपेत् उदकुंभं सुमनसो गोशकृन्मृत्तिकाकुशान् आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ८२ वेदयज्ञैरही
नानां प्रशस्तानां स्वकर्मसु ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ८३ गुरोः कुले न भिक्षेत न ज्ञातिकुलबंधुषु
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे नियम्य प्रयतो वाचमभिशस्तांश्च
वर्जयेत् दूरादाहृत्य समिधः सन्निदध्याद्विहायसि सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितः ८६ अकृत्वा भैक्ष
चरणमसमिध्य च पावकं अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ८७

अन्यगृहाणां अलाभे पूर्वं पूर्वं विवर्जयेत् ८४ पूर्वोक्तानामसंभवे सर्वं ग्रामं भिक्षार्थं विचरेत् मौनपूर्वकं वर्जनमाह अभिशस्ता
न्पतितान्वर्जयेत् ८५ दूरादिति समिधः दूरात् आहृत्य आनीय विहायसि आकाशे गृहादिके उच्चप्रदेशे मंडपादौ संनिदध्यात्
स्थापयेत् पुंस्याकाशविहायसी इत्यमरः ताभिः समिद्भिः अग्निं सायं संध्याकाले प्रातः प्रातःकाले जुहुयात् ८६ पावकं अ
समिध्य अग्नेः अनुपाश्य भैक्षचरणं अकृत्वा एकस्य गृहे भुक्त्वा सप्तरात्रपर्यंत अनातुरः सन् सः अवकीर्णी भवेत् अव
कीर्णी क्षतव्रतः इत्यमरः तदा प्रायः पवित्रार्थं यदुक्तं व्रतं तच्चरेत् ८७

७८

टम०
२९

भैक्ष्येणेति भैक्ष्येणान्नेन नित्यं वर्तयेत् व्रती ब्रह्मचारी नैकान्नादी भवेत् एकस्यान्नं न भक्षयेत् इत्य
र्थः व्रतिनः ब्रह्मचारिणः वृत्तिः भैक्ष्येण भैक्ष्यान्नवृत्तिः प्रोक्ता उपवाससमा स्मृता ८० न भैक्ष्यमिति परपाकरुचिर्न स्यात्
[illegible] भैक्ष्यान्ते भिक्षान्नं परपाकः न स्यात् भैक्ष्यं भिक्षान्नं प्रतिग्रहो न भवति प्रतिग्रहस्तु निषिध्यः भैक्ष्यस्येति आ
गमप्रदुष्टस्य प्रतिग्रहे अप्रदुष्टस्य प्रोक्षितस्य हुतस्य वर्षितस्य शेषस्य च भैक्ष्यस्य यावन्तो ग्रासास्तान् ग्रसति तेन ग्रासाः क्रतुभिः समा भवंति
व्रतेति देवदैवत्ये कर्मणि विश्वेदेवकर्मणि अभ्यर्थितः सन्निवर्तितः सकामं अश्नीयात् भोजनं कुर्यात् व्रतिवत् ब्रह्मचा

८२

भैक्ष्येण वर्तते नित्यं नैकान्नादी भवेद्व्रती भैक्ष्येण व्रतिनो वृत्तिरुपवाससमा स्मृता ८० न भैक्ष्यं परिपाकः स्यात् न च भै
क्ष्यं प्रतिग्रहः सोमपानसमं भैक्ष्यं तस्माद्भैक्ष्येण वर्तयेत् भैक्ष्यस्यागमशुद्धस्य प्रोक्षितस्य हुतस्य च पापस्य ग्रसति
ग्रासास्ते तस्य क्रतुभिः समाः ८२ व्रतं च देववद्दैवत्ये पित्र्ये कर्मण्यथर्षिवत् काममभ्यर्थितोऽश्नीयात् व्रतमस्य न लु
प्यते ८२ ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते नोदितो गुरुणा नित्य
मप्रणोदित एव वा कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ८५ शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च नियम्य
प्राञ्जलिस्तिष्ठेत् वीक्षमाणो गुरोर्मुखं। नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः आस्यतामिति चोक्तः सन्नासीता
भिमुखं गुरो ८७

रीवृत पित्र्ये कर्मणि ऋषिवत् अश्नीयात् अस्य ब्रह्मचारिणः व्रतं न लुप्यते लोपं न यातीत्यर्थः ८२ ब्राह्मणस्येति एतत्क
र्म दैवपित्र्यरूपं कर्मणि मंत्रणं ब्राह्मणस्यैव मनीषिभिः उपदिष्टं एवं राजन्यवैश्ययोर्वृत्तिनोः एतद्दैवकर्मणि पित्र्ये
कर्मणि निमंत्रणं न विधीयते ८४ नोदितेति ८५ शरीरमिति ८६ नित्यमिति नित्यं उद्धृतपाणिः स्यात् पठनसमये उ
द्धृतपाणिः स्यात् साध्वाचारः साधु यथा स्यात्तथा आचारवान् भवेत् सुसंयतः संयतचित्तः सन् अत्र आविशेत् उ
त्यर्थः आस्यतां उपविश्यतामिति गुरुणा चोदितः सन् गुरोरभिमुखं आसीत उपविशेत्यर्थः ८७

मनुस्मृ·टी·
२२

१

हीनेति सर्वदा गुरुसन्निधौ हीनान्नवस्त्रवेषः स्यात् गुरोः सकाशात् हीनं अन्नवस्त्रवेषो यस्य सः हीनान्नवस्त्रवेषः अस्य गुरोः प्रबोधनात्पूर्वं उत्तिष्ठेत् चरमं पश्चात् संविशेत् स्वाप्यात् प्रतिश्रवणेति शयानः शिष्यः प्रतिश्रवणसंभाषणं समाचरेत् प्रतिश्रवणं च संभाषा च प्रतिश्रवणसंभाषे प्रतिश्रवणं विनयसंभाषावचनं अवीशान् गुरुं न समाचरेत् ९९ आसीनस्येति आसीनस्य गुरोः स्थितः शिष्यः अभिवादं कुर्यात् तिष्ठतः गुरोः अभिगच्छन् सन्मुखः सन्नमः कुर्यात् आव्रजतः आगच्छतः प्रत्युत्थाय नमस्कारं कुर्यात् गुरोः धावतः पश्चाद्धावेत् पराङ्मुखस्येति पराङ्मुखस्य गुरोः अभिमुखस्तिष्ठेत् दूरस्थ

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ९८ प्रतिश्रवणसंभाषे शयानो न समाचरेत् नासीनो न च भुंजानो न तिष्ठन्न पराङ्मुखः ९९ आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः १०० पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकं प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः १ नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् २ नोदाहरेदस्य नाम परोक्षमपि केवलं न चैवास्यानुकुर्वीत गतिभाषितचेष्टितं ३ परीवादात्खरो भवति श्वा वै भवति निंदकः परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ५

स्य गुरोः अंतिकं समीपं एत्य आगत्य तिष्ठेत् शयनस्य गुरोः प्रह्वः चरणौ प्रणम्य निदेशे चैव तिष्ठति गुरोर्निदेशे तिष्ठेदित्यर्थः प्रतिषेधस्तु सत्स्वप्येतद्वचनिकार्या हितं चोपदेशं चेति नोदाहरेदिति नीचं शय्यासनं नित्यं स्यात् अस्याशीरस्य च गुरुसन्निधौ अस्य गुरोः गतिभाषितचेष्टितं ३ तेमवस्तु भोक्ता अननुकरणावीत न कुर्यात् २ गुरोरिति परिवादादिति गुरोः परिवादात् खरो गर्दभो भवेत् श्वा भवति निंदकः गुरोः परिभोक्ता कुर्यात् गुरुधनोपभोगी कृमिः स्यात् गुरोर्मत्सरकारी कीटो भवेदिति ५

६

राम:
२२

दूरस्थ इति एनं गुरुं दूरस्थः सन् वस्त्रादिना अर्चयेत् तथा क्रुद्धः सन् न पूजयेदित्यर्थः तथा स्त्रियाः अंतिके समीपे नार्चयेत्
यानासनस्थः सन् भूमौ अवरुह्य एनं गुरुं अभिवादयेत् गुरोः प्रतिवाते अभिमुखे च पुनः अनुवाते गुरुः नासीत न उपविशे
त् गुरोः संश्रवे चैवमेनि करे चैव किंचिदपि न कीर्तयेत् ७ गोइति प्रस्तरेषु तृणसंचयेषु शिलाफलके शिलानामं ८ तेगु
रौ तिश्रति गुरुणा अपृष्टः अनादिष्टः स्वान् गुरून् पितृगोत्रादीन् न अभिवादयेत् ९ विधेति विद्यागुरुषु एतदेव वृत्तिः
नित्या कार्या विद्याध्यापकेषु गुरुषु इत्यर्थः स्वयोनिषु स्वसंबंधषु एतदेव वृत्तिः कार्या अधर्मात् प्रतिषेधत्सु सत्सु एतदेव वृत्तिः

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः यानासनस्थश्चैवेनमभिरुह्याभिवादयेत् ६ प्रतिवातेनुवाते वा नासीन
गुरुणा सह असंश्रवे चैव गुरोः न किंचिदपि कीर्तयेत् ७ गोश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च नआसीत गुरुणासो
र्द्धं शिलाफलकनौषु च ८ गुरोर्गुरौ संनिहिते गुरुवद्वृत्तिमाचरेत् न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ९ विद्या
गुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि १० श्रेयस्सु गुरुवद्वृत्तिं नित्यमेव समा
चरेत् गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबंधुषु ११ बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि अध्यापयन् गुरुसुतो गुरु
वन्मानमर्हति १२ उत्सादनं तु गात्राणां स्नापनोच्छिष्टभोजने न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनं १३

हितं चोपदिशत्सु अपि एतदेव वृत्तिः कार्या १० श्रेयइति श्रेयस्सु ज्येष्ठे विद्याप्रकार्यवत्सु वा गुरुपुत्रेन तथा कार्ये गुरोर्बंधुषु च
एतेषु गुरुवद्वृत्तिं नित्यमेव समाचरेत् बालेति यज्ञकर्मणि। ऋत्विजः बालगुरुवत् मानं अर्हति समानजन्मा वा यते गुरुव
न्मानमर्हति ततः गुरुसुतः गुरुवन्मानमर्हति यः अध्यापयन् सः गुरुवन्मानमर्हतीत्यर्थः १२ उत्सादनमिति गात्राणां उ
त्सादनं अंगवस्त्रादिना न कुर्यात् स्नापनोच्छिष्टभोजने पादयोः अवनेजनं गुरुपुत्रस्य कुर्यात् कोर्थ गुरुपुत्रात् एतानि वस्तू
निन कारयेत् कृत्वर्थे षष्ठी शेषो गुरुपुत्राद्धि इति वा पाठः १३

गुरुवदिति तथा असवर्णा ये वित: प्रत्युत्थानाभिवादनै: संपूज्या: १४ अभ्यंजनमिति गुरुपत्नीशरीरस्य अभ्यंजनं तैलाभ्यं
गादीन संस्कारादीनि न कुर्यात् १५ गुरुपत्नी त्विति इह गुरुपत्नी युवती पादयो: स्पृष्ट्वा नाभिवाद्या पूर्णविंशतिवर्षेणाभि
ज्ञेन गुणदोषौ विजानता १६ नारीणामेष: स्वभाव एव दूषणं इह दूषणं अतोर्थात् अत: हेतो: कारणात् प्रम
दास्तु विपश्चित: न प्रमाद्यंति न प्रमादं गच्छंतीत्यर्थ: १७ अविद्वांसमिति अविद्वांसं मूर्खं पुन: विद्वांसमिति प्रमदा उत्प
थं नेतुं समर्था: भवंतीत्यर्थ: कीदृशं पुरुषं कामक्रोधवशानुगं परवशमित्यर्थ: १८ मात्रा स्वस्रेति न विविक्तासनो भवेत्

गुरुवत्प्रतिपूज्या: स्यु: सवर्णा गुरुयोषित: असवर्णास्तु संपूज्या: प्रत्युत्थानाभिवादनै: १४ अभ्यंजनं स्नापनं च
गात्रोत्सादनमेव च गुरुपत्न्या न कार्याणि केशानां च प्रसाधनं १५ गुरुपत्नी तु युवती नाभिवाद्येह पादयो: पूर्णविं
शतिवर्षेण गुणदोषौ विजानता १६ स्वभाव एष नारीणां नराणामिह दूषणं अतोर्थान्न प्रमाद्यंति प्रमदासु वि
पश्चित: १७ अविद्वांसमलं लोके विद्वांसमपि वा पुन: प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगं १८ मात्रा स्व
स्रा दुहित्रा वा न विविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति काम तु गुरुपत्नीनां युवतीनां यु
वा भुवि विधिवद्वंदनं कुर्यादसावहमिति ब्रुवन् २० विप्रोष्य पादग्रहणमन्वहं चाभिवंदनं गुरुदारेषु कुर्वीत स
तां धर्ममनुस्मरन् २१ यथा खनन् खनित्रेण नरो वार्यधिगच्छति तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति २२

विविक्त: पूतविजने इत्यर्थ: काममिति कामं अतिशयेन युवतीनां गुरुपत्नीनां यूनां युवा सन् भुवि स्पृष्ट्वा विधिवद्वं
दनं कुर्यात् असौ अहमिति ब्रुवन् २० विप्र इति विप्रोष्य प्रवासादागत्य गुरुपादेषु पादग्रहणं कुर्यात् किं कुर्वन्
सतां धर्मं स्मरन् २१ यथेति वारि जलं यथा अधिगच्छति तथा गुरुगतां विद्यां शुश्रूषुरित्यर्थ: अधिगच्छति २२

युग्मं मुंड इति ग्रामे ग्रामे मध्ये एनं ब्रह्मचारिणं अभिलक्ष्य सूर्यः न निम्लोचेत् नास्तं गच्छेदित्यर्थः क्वचित् न अभ्युदयात् नो दितिष्ठे
त् १९ तत्राह तमिति तं ब्रह्मचारिणं शयानं कामकारतः इच्छातः सूर्यश्चेदभ्युदयात् उदयेत् तं शयानं सूर्यः निम्लोचेदस्तं
गच्छेत् अविज्ञानात् जपन् गायत्रीं जपन् दिनं दिवसं उपविशेत् २० सूर्येण सह शयानः अभिनिर्मुक्तः सूर्यो अस्तंगतः
शयानः सन् अभ्युदितः उदितः भवेत् तदा प्रायश्चित्तं अकुर्वाणः महदेनसा पापेन युक्तः स्यात् २१ ॥२२ यदीति यदि स्त्री श्रे
यः धर्मं किंचित्समाचरेत् तद्धर्मं सर्वं युक्तः सन् आचरेत् स्वयं यदि अवरजः लघुः किंचित् श्रेयः धर्मं समाचरेत् तत् आ

मुंडो वा जटिलो वा स्यादथवा स्यात्सशिखाजटः नैनं ग्रामेभिनिम्लोचेत्सूर्यो नाभ्युदयात्क्वचित् १९ तं वेदभ्युदयात्सूर्यः
शयानं कामकारतः निम्लोचेद्वाप्यविज्ञानाजपंस्तूपवसेदिनं सूर्येण ह्यभिनिर्मुक्तः शयानोभ्युदितश्च यः प्राय
श्चित्तमकुर्वाणो युक्तः स्यान्महदेनसा २१ आचम्य प्रयतो नित्यमुभे संध्ये समाहितः शुचौ देशे जपन्जप्यमुपासीत
यथाविधि यदि स्त्री यद्यवरजः श्रेयः किंचित्समाचरेत् तत्सर्वमाचरेद्युक्तो यत्र वास्य रमेन्मनः धर्मार्थावुच्यते श्रेयः
कामार्थौ धर्म एव च अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः २८ आचार्यश्च पिता चैव माता भ्राता तु पूर्वजः नार्ते
नाप्यवमंतव्या ब्राह्मणेन विशेषतः २९ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः माता पृथिव्या मूर्तिस्तु
भ्राता स्वो मूर्तिरात्मनः ३०

चरेद्वा मत्र यस्मिन् धर्मे मनः रमेत् तं धर्मं समाचरेत् वा २७ धर्मार्थाविति धर्मार्थौ श्रेयः उच्यते कस्यचिन्मते पक्षे कामार्थौ धर्म
एव वा कस्यचिन्मते अर्थ एव इह भवेत् श्रेयः इति त्रिवर्गः स्थितः २८ आचार्य इति एते आचार्यादयः आर्तेनापि पुंसा नाव
मंतव्या न तिरस्करणीयाः ब्राह्मणेन विशेषतः नावमंतव्याः २९ आचार्यमिति आचार्यः ब्राह्मणः परमात्मनः मूर्तिः
र्वा वेदस्य मूर्तिर्वा ज्ञेया प्रजापतेः हिरण्यगर्भस्य परमेष्ठिनः मूर्तिः भ्राता स्वपुत्रः आत्मनः मूर्तिः ज्ञेया ३० श्रीः

यमिति संभवे उत्पत्तौ २१ तयोरिति तयोः पित्रोः प्रियं नित्यं कुर्यात् चकारात् ज्येष्ठमातुः च पुनः आचार्यस्य प्रियं सर्व
दा तेष्वेव त्रिषु मातापितृ आचार्येषु त्रिषु तुष्टेषु सत्सु सर्वं पूर्णं तपः समाप्यते २२ तेषामिति तेषां त्रयाणां आचार्यमातापि
तृमातॄणां त्रिभिः अनभ्यनुज्ञातः अन्यं धर्मं न समाचरेत् २३ त एवेति त एव हि आचार्यादयः त्रयो लोकाः त्रिलोक
स्वरूपाः पूज्या इत्यर्थः एवं अग्रेपूह्यं २४ पितेति पिता गार्हपत्यः अग्निरूपः माता दक्षिणाग्निरूपा गुरुः आहवनीयाग्नि
रूपः सोग्निः अग्नित्रेता त्रयाणां समूहः त्रेता गरीयसी पूज्या २५ त्रिष्विति त्रिषु एतेषु अप्रमाद्येन सावधानतयाति

यं मातापितरौ क्लेशं सहेते संभवे नृणां न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि २१ तयोर्नित्यं प्रियं कुर्यादाचा
र्यस्य च सर्वदा तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते २२ तेषां त्रयाणां शुश्रूषा परमं तप उच्यते द्वात्रयैवोक्ता
स्त्रयोग्नयः न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् २३ त एव हि त्रयो वेदा लोकास्त एव त्रय आश्रमाः त एव हि
त्रयो वेदास्त एवोक्तास्त्रयोग्नयः २४ पिता वै गार्हपत्योग्निर्माताग्निर्दक्षिणः स्मृतः गुरुराहवनीयस्तु साग्नि
त्रेता गरीयसी २५ त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान् विजयेद्गृही दीप्यमानः स्ववपुषा देववद्दिवि मोदते २६ इमं
लोकं मातृभक्त्या पितृभक्त्या तु मध्यमं गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते २७ सर्वे तस्यादृता धर्मा यस्यैते त्रय
आदृताः अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः २८ यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् तेष्वेव नि
त्यं शुश्रूषां कुर्यात्प्रियहिते रतः २९

यन् त्रीन् लोकान् गृही संजयेत् २६ इममिति इमं लोकं भूर्लोकं मध्यमं स्वर्लोकं गुरुशुश्रूषया ब्रह्मलोकं एवममुनाप्र
कारेण त्रीन् लोकान् समश्नुते प्राप्नोति सर्वेति एते त्रय आचार्यादयः यस्य पुंसः आदृताः मानार्हा भवंति तस्य सर्वे समाः
आदृता भवंति तद्यथा तेन पुंसा सर्वे धर्मा आदृता इत्यर्थः यस्य एते त्रय अनादृताः भवंति तस्य सर्वाः क्रियाः अफला
भवंति इत्यर्थः २८ यावदिति त्रयः यावज्जीवेयुस्तावदन्यधर्मान्न समाचरेत् २९

तेषामिति तेषां त्रयाणां अनुपरोधेन यत्पारत्रं अपारलौकिकं धर्मं तेभ्यः त्रिभ्यः मनोवाक्कायकर्मभिः निवेदयेत् ४० त्रिष्विति एतेषु त्रिषु पुरुषस्य इतिकर्त्तव्यं हि समाप्यते अन्यत उपधर्मः पाषंडधर्म इत्यर्थः ४१ श्रद्दधानेति श्रद्दधानः पुरुषः अधमादपि प्रनि लोभ्यादपि परां उत्कृष्टां विद्यां अधीतस्वीकुर्यात् परं धर्मं अंत्यादपि स्त्रीरत्नं दुष्कुलादपि आददीत ४२ विषेति अमृतं जीवनं अमेध्यात् कांचनं अब्राह्मणादिति आपत्काले अब्राह्मणात् क्षत्रियादेः सकाशात् अध्ययनं विधीयते यावद्गुरोः समीपे अध्ययनं क्षत्रियादेः गुरोः अनुव्रज्यतावत् शुश्रूषा कार्या ४४ नाब्राह्मणेति शिष्यः अब्रा

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् तत्तन्निवेदयेत्तेभ्यो मनोवाक्कायकर्मभिः ४० त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ४१ श्रद्दधानः परां विद्यामाददीतावरादपि अंत्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ४२ विषादप्यमृतं ग्राह्यं बालादपि सुभाषितं विविधानि च शिल्पानि समादेयानि सर्वतः ४३ अब्राह्मणादध्ययनमापत्काले विधीयते अनुव्रज्या च शुश्रूषा यावदध्यापनं गुरोः ४४ नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ब्राह्मणे चाननूचाने कांक्षन्गतिमनुत्तमां ४५ अमित्रैर्द पिसश्चेत्ममेध्यादपि कांचनं स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितं यदि त्वात्यन्तिकं वासमाचरेत्तु गुरोः कुले युक्तः परिचरेदेनमाशरीरविमोक्षणात् आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुं स गच्छत्यं जसा विप्रो ब्रह्मणः सद्म शाश्वतं ४७

ह्मणे गुरौ न आत्यंतिकं वासं न वसेत् यावज्जीवं न वसेदित्यर्थः नैष्ठिकं ब्रह्मचर्यं न वसेदित्यर्थः ननूचाने उत्तमां गतिं कांक्षन् वसेदित्यर्थः ४५ यदीति गुरोः कुले यदि आत्यंतिकं वासं रोचयेत् एनं गुरुकुलं आशरीरविमोक्षणात् शरीरत्यागपर्यंतं परिचरेत् ४६।४७

मनुस्मृ॰टी॰
२५

धर्मवित् गुरवे किंचित्पूर्वं न कुर्वीत दक्षिणां न दद्यात् तथापि गुरुणाज्ञप्तः दत्तास्तः स्नास्यन् ब्रह्मचर्यान्ते स्नानं कुर्वन् शक्त्या गु
र्वर्थं दक्षिणां दद्यात् ४८ क्षेत्रमिति प्रत्येकं ब्रतां ततः गुरवे प्रीतिं आहरन् छत्रादिकं दद्यात् ४९ आचार्ये इति ख
लु इति निश्चयेन आचार्ये प्रेते मृते सति गुणान्विते गुरुपुत्रे गुरुवत् वृत्तिं आचरेत् यद्वा गुरुदारे सपिण्डे वा गुरुवद्वृत्तिं
आचरेत् ५० एतेष्विति एतेषु गुरुपुत्रेषु अविद्यमानेषु स्थानासनविहारवान् भवेत् तद्यथा गुरोः स्थाने आसने इत्यादि

न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ४८ क्षेत्रं हिरण्यं गामश्वं छ
त्रोपानहमन्ततः धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरन् ४९ आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते गु
रुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ५० एतेष्वविद्यमानेषु स्थानासनविहारवान् प्रयुञ्जानोऽग्निशुश्रूषां
साधयेद्देहमात्मनः ५१ एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः स गच्छत्युत्तमस्थानं न चेह जायते पुनः
५२ इति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां ब्रह्मचारिप्रकरणं द्वितीयोऽध्यायः २ षट्त्रिंशदाब्दिकं चर्यं गु
रौ त्रैवेदिकं व्रतं तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा १ वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् अविप्लुतब्रह्म
चर्यो गृहस्थाश्रममाविशेत् २

स्ववसेत् अग्निशुश्रूषां गुरोर्वा प्रयुञ्जान कुर्यात् आत्मनः स्वस्य देहं साधयेदित्यर्थः ५१ एवमिति विप्रः आप्लुतः अस
खलित ब्रह्मचर्यः य एवं चरति स उत्तमस्थानं गच्छति पुनः इह न जायते ५२ इति मनुस्मृतिभाष्ये द्वितीयोऽध्यायः २ षट्त्रिं
शदिति अतः परं गृहस्थाश्रममारभ्यते गुरौ समीपे षट्त्रिंशदाब्दिकं षट्त्रिंशद्वर्षपर्यन्तं कुर्यात् यत्र त्रयाणां वेदानां समाहारः
त्रिवेदी तत्र ग्रहणं प्रयोजनं त्रैवेदिकं व्रतं चरित्वा ये प्रीतिं द्वादशाब्दिकं षट्षट्पर्यन्तं व्रतं ब्रह्मचर्यं चरेत् ग्रहणान्तिकमेव वा
व्रतं चरेत् ग्रहणक्रिया व्रतावन्तं भवति वेदाधिगमस्य प्राक् विहितत्वात् तद्यथा १ वेदेति गृहस्थः अविप्लुतः ब्रह्मचर्यो

मनुस्मृति॰ टी॰ अ॰ २ पत्र
रामः
२५

श्रमेवसन् आवसेत्। किं कृत्वा वेदशब्दो शाखावयवो वाख्यातः वेदान्वेदौ वा वेदं वा यथाक्रमं शाखाक्रमेन वा अधीत्य तम्मिति तं प्रथमं पूजयेत् कदृशं गुरुं स्वधर्मेणाख्यातं पुनः कदृशं ब्रह्मदायहरं ब्रह्मैव वेदमेव धनं यस्य तस्य दायः अ्र शः तस्य हरं हरतीति स्वी करोतीति तं पुनः कीदृशं स्रग्विणं पुनः कीदृशं तल्पमासीनं आसनस्थं २ गुरुणा द्विज सवर्णां लक्षणान्वितां भार्यां उद्वहेत् कीदृशः द्विजः समावृतः गुरुकुलादागतः। किं कृत्वा गुरुणानुमतः स्नात्वा ४ पंचमादिति अप्यविवाहीनां युग्मं युग्मेन मातृतः मातुः संताने पंचमातृ ऊर्ध्वं तथा पितृतः पितुः संताने सप्तमादूर्ध्वं मातुः संताने असपिंडा च या मातुरसगोत्रा पितुः संताने असगोत्रा सा द्विजातीनां प्रश

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः स्रग्विणं तल्पमासीनमर्हयेत्प्रथमं गवा २ गुरुणानुमतः स्नात्वा समावृत्तो यथाविधिः उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्वितां ४ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा असपिंडा च या मातुरसगोत्रा च या पितुः ५ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने महान्त्यपि समृद्धानि गोजाविधनधान्यतः स्त्रीसंबंधे दशैतानि कुलानि परिवर्जयेत् ६ हीनक्रियं निःपुरुषं निःछंदो रोमशार्शसं क्षय्यामयाव्यप स्मारि श्वित्रि कुष्ठि कुलानि च ७ नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं नालोमिकां नातिलोमां न वाचाटा

दारे पत्निशब्दां मैथुने दारकर्मणि अग्न्याधानादिधर्मपुत्राप्यादिति कर्मनिवृत्त स्ना सपिंडेन रहिता एकः पिंडो देहो यस्याः सा पिंडा न असपिंडा पंचमात्सप्तमादूर्ध्वं सपिंडं निवर्तते इत्यर्थः चतुर्थीमुद्वहेत् कन्यां पंचमीं न तु पंचमी चतुर्थी पंचमी न उद्वहेत् इत्यर्थः वर्ज्यानाह महान्तीति गोजाविधनधान्यतः समृद्धान्यपि महान्त्यपि अग्न्याधानसदान्यपि स्त्रीसंबंधे दशैतानि वर्जयेत् स्त्रीसंबंधे एतानि दश कुलान्याह हीनक्रियेति हीनक्रियं नित्यकर्मादिसंस्कार पंचयज्ञरहितं कुलं निःपुरुषं निःपुरुषं निर्गतः छंदो वेदो यस्मात् तत् निःछंदः रोमशा सिनं आदौ नै सवर्तते मत्रसाशने कुलं गुह्ये रोमयुक्तं पत्नी तासी रोकरणं रोमस दितं यत्र क्षयी आमयावी अपस्मारी कुले अपस्मारी। चित्र कुष्ठी एतानि कुलानि वर्जयेत् ७ नेति कनकवर्णा केशा यस्याः सता

कपिलां चकन्यां उद्वहेत एतावच्छ्यः नउद्वाद्यः कपिलादिपिंगलाः परुषभाषिणीं ८ नोतिश्राद्धानाम्नीं नक्षत्रानाम्नीं न
विवाहयेत अनंतानाम्नीं पार्वतीपर्वतनाम्नीं उद्वहेत नद्यत्रनाम्नीं न विभीषणनाम्नीं भयानकनाम्नीं नविवाहयेत ६
अव्यंगांगीमिति एतादृशीं उद्वहेत अव्यंगांगीं अव्यंगं अंगं यस्याः सा तां सौम्यनाम्नीं प्रतः पुत्रिकाधर्मशंकया तां प्रज्ञाः
नउपयच्छेत नोद्वहेत सौम्यनामयस्याः सा तां अक्लिन्नांगीमित्यर्थः १० यस्येति यस्याः कन्यायाः भ्राता न भवेत पि
ता नवै विज्ञायते तां कन्यां प्राप्तः पुत्रिकाधर्मशंकया तां प्रज्ञः नउपयच्छेत नोद्वहेत ११ सवर्णेति अग्रे प्रथमतः

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकां नपक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकां ९ अव्यंगांगीं सौम्यनाम्नीं
हंसगामिनीं न तनुलोमकेशदंतीं मृद्वंगीमुद्वहेत्स्त्रियं १० यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता नोपय
च्छेत तां प्राज्ञः पुत्रिकाधर्मशंकया ११ सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि कामतस्तु प्रवृत्तानामिमाः
स्युः क्रमशोवराः १२ शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ते च स्वा चैव राज्ञः स्युः ताश्च स्वा चाग्रजन्मनः
न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः कस्मिंश्चिदपि वृत्तांते शूद्रा भार्योपदिश्यते १४ हीनजातिस्त्रियं मोहा
दुद्वहंतो द्विजातयः कुलान्येव नयंत्याशु ससंतानानि शूद्रतां १५

द्विजातीनां सवर्णा दारकर्मणि प्रशस्ता कामतः प्रवृत्तानां क्रमशः अवराः हीनाः इमाः वक्ष्यमाणलक्षणाः स्युः
शूद्रेति शूद्रस्य शूद्रैव भार्या विशः वैश्यस्य सा च शूद्रा सा वैश्या स्मृते उक्ते राज्ञः तद्वैश्या च क्षत्रिया अग्रजन्मनः १२
ब्राह्मणस्य तास्तिस्रः क्षत्रिया वैश्या शूद्रा च एतास्तिस्रः स्वा च ब्राह्मणी तेया १३ द्विजेति द्विजातयः हीनजातिस्त्रियं
मोहात् अज्ञानात् उद्वहंतः कुलानि संतानानि शूद्रत्वं पत्नी आशु शीघ्रं नयंति नेति ब्राह्मणक्षत्रिययोः आपद्यपि
तिष्ठतोः स्ववर्णायाः अलाभेपि यानः उपतिष्ठत इत्यर्थः १४।१५ शूद्रेति शूद्रां विंदति परिणयति शूद्रावेदी पतति

पतित इव भवति चपुनः उतथ्यतनयस्य दीर्घतमसः मते शूद्रावेदी शूद्रायाः परिणेता द्विजो पतति एतच्च ब्राह्मणावि
षयं अर्धश्लोकः पूर्वप्रतिषेधः शौवसौनकश्चान्यतरमिति मतमनुज्ञाय शौनकस्य मतेन सुतोत्पत्त्या पतति शूद्र एव केवल
मपत्यं यस्यासवर्णापत्यः तदपत्यः स एव मुख्यः पुत्र एव तत्र त्रिपविषं भृगोर्मते तदपत्यतया पौत्रोत्पत्त्या ब्राह्मण्यादि
पुत्रस्याभावात् पूर्वोक्तशूद्रस्य विवाहनिषेधशेषः सुतोत्पत्त्यापतनादि दैवात् शूद्राविवाहे ये ऋतौ नोपादि ति विधानार्थं
ऋतुकालागमने सुतोत्पत्तिः शूद्रे केवलमपत्यं एतद्दृश्यविषयं १६।१७ दैवेति यस्य पुंसः तस्या मुख्यतया प्रधानानि कृता
नि दैवपि आतिथेयादीनि एतानि पितरो देवाश्च नादंति नभक्षयंति चपुनः सोपि पुमान्स्वर्गं न गच्छति १८ वृषलीति वृषली

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः १६ शूद्रां शयनमारोप्य ब्राह्मणो
यात्यधोगतिं तस्यामपत्यमुत्पाद्य ब्राह्मण्यादेव हीयते १७ दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु नादंति
पितृदेवास्तु न च स्वर्गं स गच्छति १८ वृषलीफेनपीतस्य निश्वासोपहतस्य च तस्यां चैव प्रसूतस्य निःकृति
र्न विधीयते १९ चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत २०
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २१

फेनपीतस्य रतिसमये अधरपानस्य शूद्राया अधरपानस्य च पुनः निश्वासोपहतस्य तया सहैकशय्यानिषेधः
तस्यां वृषल्यां प्रसूतस्य जातस्य निःकृतिर्न विद्यते सवर्णामपरिणीय दैवात् शूद्रां परिणेतुः ब्राह्मणस्य निषेधः ऋ
तुकालगमननिषेधानुवादः आत्मा वै जायते पुत्र इति श्रुतेः १९ चतुर्णामिति चतुर्णां वर्णानां प्रेत्य इह लोके हिता
हितान् इमान् स्त्रीविवाहान् अष्टौ निबोधत २० ब्राह्म्येति ब्राह्मसंज्ञः १ दैवसंज्ञः २ आर्षसंज्ञः ३ प्रजापतिसंज्ञः ४
आसुरसंज्ञः ५ गंधर्वसंज्ञः ६ राक्षससंज्ञः ७ पैशाचसंज्ञः ८ उक्तेष्वेतेषु संज्ञः अष्टमः अधमः २१

८१

यद्इति यः यस्य वर्णस्य विवाहः धर्म्यं धर्मार्हं यस्य वर्णस्य यो गुणदोषो भवति तत् युष्माकं ऋषीणां संततौ प्रसवे गुणागुणेन च तस्मिन् पुत्रोत्पादने तत्सर्वं ॥२२॥ षडेति विप्रस्य षट् विवाहाः आनुपूर्व्येण क्रमेण ३ कौ क्षत्रस्य अवरान् असुरादीन् चतुरः विवाहाः षट् शूद्रयोः तानेव चतुरान् अवरान् असुरादीन् धर्म्यान् धर्मान् विधानात् राक्षसान् तद्यथा ब्राह्म १ दैवः २ आर्षः ३ प्राजापत्यः ४ आसुरः ५ गांधर्वः ६ षट् विप्रस्य विवाहाः ७ क्षत्रस्य चतुरः असुरः १ गांधर्वः २ राक्षसः ३ पैशाचः ४ ॥२३॥ तत्र विशेषमाह चतुरमिति ब्राह्मणस्य चतुरः आद्यान् विवाहान् कवयः विदुः ब्राह्म दैव आर्ष प्राजापत्य संज्ञा इति क्षत्रस्यैकं राक्षससंज्ञं वैश्यशूद्रयोः असुरमेकं इति ॥२४॥ पंचानां इति पंचानां विवाहानां मध्ये त्रयो धर्मार्हाः प्राजाप

यो यस्य धर्म्यो वर्णस्य गुणदोषस्य यस्य यौ एतत्सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥२२॥ षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो वरान् विट्शूद्रयोस्तु तानेव विद्याद्धर्मानराक्षसान् ॥२३॥ चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः राक्षसं क्षत्रियस्यैकं आसुरं वैश्यशूद्रयोः ॥२४॥ पंचानां तु त्रयो धर्म्या द्वावधर्मौ स्मृताविह पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ॥२५॥ पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥२६॥

त्यः १ आसुरः गांधर्वः ३ राक्षस ४ पैशाचाः ५ एतेषु पंचसु मध्ये त्रयो धर्म्याः प्राजापत्य आसुर गांधर्व संज्ञास्त्रयः धर्मार्हाः द्वौ धर्मौ राक्षसस्मृतौ पैशाच त्रयस्तो वर्णक्रममाह प्राजापत्यं क्षत्रियादीनां अप्राप्तो विधीयते ब्राह्मणस्य प्रथितत्वा दनूद्यते गांधर्वस्य तु चतुर्णामेव प्राप्तानुवादः राक्षसोपि वैश्यशूद्रयोर्विधीयते ब्राह्मणस्य तु क्षत्रियवैश्यवर्ज्यत्वात् आसुरपैशाचौ न कर्तव्यौ ॥२५॥ क्षत्रियस्य विवाहमाह पृथगिति विवाहौ पूर्वचोदितौ कौ यौ पृथक्पृथग्वा गांधर्वं वा विवाहे वा मिश्रौ वा गांधर्वराक्षसौ वा क्षत्रस्य धर्म्यौ तौ स्मृतौ आसुरो द्रविणादानात् गांधर्वः समयान्मिथः राक्षसो युद्धहरणात्
पैशाचः कन्यकाच्छलात् इति याज्ञवल्क्यः ॥२६॥

अथ विवाहानां स्वरूपमाह आच्छाद्येति वस्त्रेण आच्छाद्य परिधाप्य अर्हयित्वा आभरणाद्यलंकृतां कृत्वा श्रुतिशीलवते वरा
य स्वयं आहूय कन्याया दानं दीयते ब्राह्मसंज्ञः विवाहः धर्म्यः प्रकीर्तितः ब्राह्मविवाहमाह सदृशीं धर्मांश सलंकृतामिति अ
यतः मातृतः पितृतः याज्ञवल्क्यः ततः पुनात्युभयतः पुरुषान् एकविंशतिं २७ यज्ञे त्वृत्विजे वितते विस्तीर्णे यज्ञे ऋत्विजे सम्यक्
कर्म कुर्वते अलंकृत्य सुतां कन्यादानं क्रियते तत् दैवं दैवसंज्ञं विवाहं धर्म्यं इत्युच्यते २८ एकमिति वरात् एकं गोमिथुनं
आदाय स्वीकृत्य द्वे वा गृहीत्वा धर्मतः धर्मार्थं विवाहे यागादिसिद्ध्यर्थं विधिवत् कन्याप्रदानं क्रियते स आर्षसंज्ञः धर्म्यः
धर्मार्हः विवाहः उच्यते आदायार्षस्तु गोद्वयं इति याज्ञवल्क्यः २९ सहेति उभौ स्त्रीपुरुषौ सह धर्मं चरतो इति वाचा अनु

आच्छाद्य चार्हयित्वा च श्रुतिशीलवते स्वयं आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः २७ यज्ञे तु वितते सम्यक्
ऋत्विजे कर्म कुर्वते अलंकृत्य सुतादानं दैवं धर्म्यं प्रचक्षते २८ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः कन्याप्रदानं
विधिवत् आर्षो धर्मः स उच्यते २९ सह नौ चरतां धर्ममिति वाचानुभाष्य च कन्याप्रदानमभ्यर्च्य प्राजा
पत्यो विधिः स्मृतः ३० ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः कन्याप्रदानं स्वाछंदादासुरो धर्म उच्यते
इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च गांधर्वः स तु विज्ञेयः मैथुन्यः कामसंभवः ३२

भाष्य उक्त्वा अभ्यर्च्य अलंकृत्य कन्याप्रदानं क्रियते प्राजापत्यो विधिः स्मृतः प्राजापत्यसंज्ञः विवाह उक्तः कपिनः ३१
ज्ञातीति द्रविणं द्रव्यं ज्ञातिभ्यः दत्वा कन्यायै वा दत्वा शक्तितः एतादृश्याः कन्यायाः प्रदानं स्वछंदात् स्वेच्छातः आ
सुरसंज्ञो विवाहः अधर्मः उच्यते आसुरो द्रविणादानात् इति याज्ञवल्क्यः ३१ इच्छेति कन्यायाः वरस्य च द्वयोः इ
च्छया अन्योन्यसंयोगः संभोगः भवेत् स विवाहः गांधर्वसंज्ञः विज्ञेयः मैथुन्यः मैथुनार्हः कामसंभवः अन्यो
न्यं कामात् संभवो यस्य सः गांधर्वः समयान्मिथः इति योगी ३२

हत्वेति हत्वा मारयित्वा प्रतिबंधकान् छित्वा कपाटादीनि भित्वा गृहादीनि क्रोशन्तीं रुदतीं गृहात् प्रसह्य कन्याहरणं क्रियते यत्र त
त्र राक्षसो विधिरुच्यते राक्षस संज्ञो विवाह उच्यते राक्षसो युद्धहरणादीति योगीश्वर: ३३ पैशाचविवाहमाह सुप्ता
मिति यत्र रह: यस्मिन् रहसि सर्वानुसुप्तां नै मत्तां मदादिना प्रमत्तां वा अनवहितां सुप्तां कन्यामुपगच्छति भोगेन प्रा
प्नोति विवाहानां मध्ये स: पैशाच: विवाह: पापिष्ठ: पापजनक: प्रथित: प्रसिद्ध: अष्टम: पैशाच: कन्यकाच्छलात्
इति योगीश्वर: ३४ अद्भिरिति द्विजा: ब्राह्मणानां ब्राह्मण क्षत्रिय विप्राणां कन्याप्रदानं अद्भिरेव जलैरेव जलं पूर्वं प्रशस्यते

हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात् प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ३३ सुप्तां मत्तां प्रमत्तां वा रहो
यत्रोपगच्छति स पापिष्ठो विवाहानां पैशाच: प्रथितोऽष्टम: ३४ अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते
इतरेषां तु वर्णानामितरेतरकाम्यया ३५ यो यस्यैषां विवाहानां मनुना कीर्तितो गुण: सर्वं शृणुत तं विप्रा:
सम्यक्कीर्तयतो मम ३६ दश पूर्वापरान् वंश्यानात्मानं चैव विंशकं ब्राह्मीपुत्र: सुकृतकृन्मोचयेदेनस:
पितृन् दैवोढज: सुतश्चैव सप्त सप्त परावरान् आर्षोढज: त्रीन्त्रीन् षट्षट् कायोढज: सुत: ३८

इतरेषां वर्णानां अनुलोमप्रतिलोमजातीनां इतरेतरकाम्यया परस्परेच्छया कन्याप्रदानं ३५ य इति यस्य वर्णस्य एषां
विवाहानां य: गुण: कीर्तित: हे प्रार्त सर्वं गुणं मम कीर्तयत: सम्यक् शृणुत ३६ दशेति विवाहानाह पितृत: दश पूर्वान् वं
श्यान् दश अपरान् एकविंशकं आत्मानं ब्राह्मणीपुत्र: ब्राह्मविवाहोत्पन्न: पुत्र: सुकृतकृत् सुकृतं करोतीति सु
कृतकृत् सुकृतोत्पादक: सन् पितॄन् एनस: पापात् मोचयेत् ३७ दैवोति दैवोढज: सुत: दैवविवाहोत्पन्न: सुत: सप्त
वरान् पूर्वान् चेत्यर्थ: चतुर्दश पुरुषान् पुमान् पवित्रयतीत्यर्थ: आर्षोढज: सुत: सुत: आर्षविवाहोत्पन्न: सुत
स्त्रीन् पूर्वान् वंश्यान् त्रीन् परान् नरपातनात् पुनाति कायोढज: सुत: प्राजापत्यविवाहोत्पन्न: सुत: षट्पूर्वान् वं

धन्यान्महात्मनो इति योगीश्वरः ३९ ब्राह्मादिति चतुर्षु ब्राह्मादिषु विवाहेषु अनुपूर्वशः ब्राह्मदैवआर्षप्रा
जापत्येषु चतुर्ष्वेव विवाहेषु पुत्रा ब्रह्मवर्चस्विनः जायन्ते ३९ रूपेति एतादृशाः भवन्ति पर्याप्तभोगधर्मिष्ठाः
४० इतरेष्विति शिष्टेषु इतरेषु चतुर्षु विवाहेषु नृशंसानृतवादिनः ब्रह्मधर्मद्विषः सुता जायन्ते आसुरगां
धर्वराक्षसपैशाचेषु चतुर्ष्विति ४१ अनिन्दितैरिति अनिन्दितैः स्त्रीविवाहैः अनिन्द्यास्तुल्या प्रजा भवन्ति पुत्रा
भवन्तीत्यर्थः आसुरादिनिन्दितैः विवाहैर्निन्दिताः प्रजा भवन्ति नृणां तस्मान्निन्द्यान्विवाहान्वर्जयेत् ४२ पाणीति

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः ३९ रूपसत्त्वगुणोपेताः धनवं
तो यशस्विनः पर्याप्तभोगधर्मिष्ठाः जीवन्ति च शतं समाः ४० इतरेषु च शिष्टेषु नृशंसानृतशंवादि जायन्ते
दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ४१ अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा निन्दितैर्निन्दिता स्त्रीणां तस्मा
द्विन्द्यान्विवर्जयेत् पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ४३
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ४४

सवर्णासु स्त्रीषु पाणिग्रहणसंस्कारः उपादेश्यते तद्यथा ब्राह्मणस्य ब्राह्मण्याः पाणिग्रहणमिति स्ववर्णेत्यर्थः
असवर्णासु स्त्रीषु विवाहेषु ब्राह्मणस्य अयं विधिः उद्वाहकर्मणि ज्ञेयः ४३ शर इति तद्यथा उत्कृष्टवेदने सव
र्णा उत्कृष्टवेदने विप्रस्य वेदने विवाहे क्षत्रियायां शरः ग्राह्यः विप्रस्य वेदने विवाहे क्षत्रियया शरं ग्राह्यः विप्र
स्य वेदने वैश्यया प्रतोदो ग्राह्यः विप्रस्य वेदने शूद्रया वसनस्य वस्त्रस्य दशा ग्राह्या वेदनेत्यग्रजन्मनः इति यो
गीश्वरः एवं क्षत्रस्य वेदने वैश्यया प्रतोदो ग्राह्यः पुनरेवं वैश्यस्य वेदने शूद्रया वसनस्य दशा ग्राह्या ४४

ऋत्वति सदा स्वदारनिरतः सन् ऋतुकालाभिगामी स्यात् इति वचनात् परदारनिषेधः एनां स्त्रियं पर्ववर्ज्यं व्रजेत् गच्छेत्
ततः तस्यां तद्व्रतं ग्रहणं व्रतं अस्येति तद्व्रतं रतिकाम्यया योनि [स्पं] गच्छेदित्यर्थः अपकामी भवेद्वापी स्त्रीणां वरमनुस्मरेत
इदं तेव रमित्यर्थः इति योगीश्वरः ४५ तत्र विशेषमाह ऋतुरिति ऋतिस्त्रीणां गर्भाधानयोग्यावस्थोपलक्षितः का
लः ऋतुस्वभाविकः षोडशरात्रयः स्मृताः रजोदर्शनदिवसादारभ्य षोडशाहोरात्रयः सद्भिर्विगर्हितैश्चतुर्भिः सार्द्धं इतरैः
द्वादशभिः अहोभिः सार्द्धमित्यर्थः ४६ तासामिति तासां षोडशरात्रीणां मध्ये आद्याश्चतस्रः निंदिताः पुनः एकादशी

ऋतुकालाभिगामिस्यात्स्वदारनिरतः सदा पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ४५ ऋतुः स्वाभाविकः स्त्री
णां रात्रयः षोडश स्मृताः चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः ४६ तासामाद्याश्चतस्रस्तु निंदितैकाद
शी तु या त्रयोदशी तु शेषाः स्युः प्रशस्ता दश रात्रयः ४७ युग्मासु पुत्रा जायंते स्त्रियो युग्मासु रात्रिषु तस्माद्यु
ग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियां ४८ पुमान्पुंसोऽधिके शुक्रे स्त्री रजोऽप्यधिके स्त्रियाः समेऽपुमान् पुंस्त्रि
यौ वा क्षीणेऽल्पे च विपर्ययः ४९ निंद्यास्वष्टास्वन्यासु स्त्रियो रात्रिषु वर्जयेत् ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन्

रात्रिः स्यात् निंदिता एकादशादिवसस्येत्यर्थः तथा त्रयोदशी रात्रिः निंदिता शेषाः दश रात्रयः प्रशस्ता उक्ताः ४७ युग्मेति दश
स्त्रीणां मध्ये युग्मासु रात्रिषु गच्छन् पुत्रा जायंते अयुग्मासु रात्रिषु गच्छन् स्त्रियः कन्या भवंति तस्मात्कारणात् पुत्रार्थी
आर्तवे काले स्त्रियं संविशेत् गच्छेत् रात्रिग्रहणं दिवसप्रतिषेधार्थं ४८ पुमानिति पुंसः पुरुषस्याप्यधिके शुक्रे
पुमान् पुत्रो भवति स्त्रियाः रजोऽधिके स्त्री कन्या भवति रजःशुक्रसाम्ये पुमान् नपुंसकः षंढः भवति वा पुंस्त्रियौ भ
वतः यमौ कन्यापुत्रौ पुमान् [स्त्री च] [आकारः] क्षीणे वा शुक्रे अल्पे वा रजसि विपर्ययः [ह] रात्रीः पर्ववर्जितं च गर्भस्यास
भव अनुत्पत्तिः ४९ निंद्यास्विति निंद्यासु अन्यासु अयुग्मासु रात्रिषु स्त्रियः वर्जयेदित्यर्थः अथवा शिवो गच्छन्

अर्थवादः अयं अर्थवादः न नु वान प्रस्थाश्रमी
ब्रह्मचारि भवति यत्र तत्राश्रमे वसन् ब्रह्मचर्यो वाम भवति भवेदित्यर्थः अपत्यविक्रयो स्यात् अपत्यविक्रयपापभुग्भ
श्रमेषु गार्हस्थ्यादिष्वपि प्रशस्याया ५० नेति लोभेन शुल्कं गृह्णन् नरः अपत्यविक्रयी स्यात् वस्त्रं वा तेपापा अधोग
वतीत्यर्थः ५१ नाहेः कन्यायाः यानि नारीमाना निस्ववर्णरजनादेधनमश्वादि सेवत नार्याः वस्त्रं वा ते पापा अधोग
तिं यान्ति ५२ आर्षइति आर्षसंज्ञे विवाहे गोमिथुनं शुल्कं केचित् आहुः तन्न भवेद्वा मिथ्यैव अल्पो वा सुल्कः महान् वा
शुल्कं तावानेव स विक्रयसंज्ञः यासामिति यासां नारीणां ज्ञातयः शुल्कं नादद्रते विक्रयसंज्ञो न भवति आनृशंस्यं अपा
नकन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि गृह्णन् हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ५१ स्त्रीधनानि तु ये लो
भादुपजीवन्ति बान्धवाः नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिं ५२ आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् अ
ल्पोऽप्येवं महान्वापि विक्रयस्तावदेव सः ५३ यासां नाददते शुल्कं ज्ञातयो न स विक्रयः अर्हणं तत्कुमारीणामानृशं
स्यं च केवलं ५४ यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ५६ पितृभिर्भ्रा
पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ५५ यत्र नार्यस्तु पूज्य
न्ते रमन्ते तत्र देवताः यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ५६ शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलं न शो
चन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा ५७ जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः तानि कृत्याहतानीव विनश्यन्ति सम
न्ततः ५८ तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च संतुष्टो भार्यया

भर्ता भार्या भर्त्रा तथैव च यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवं ६०

यत्त्वं करुणारूपं ५५ पितृभिरिति पितृभिः अयत्नपूज्याः भोजनादिना ५५।५६ शोचन्तीति यत्र यस्मिन् कुले यतेजामयः न शोचं
ति तत्कुलं हि निश्चयेन सर्वदा वर्द्धते ५७ सत्कारेषु सकुलस्त्रीणां उत्सवेषु कौमुद्यादिषु विवाहादिषु संतुष्ट इति संतुष्टो भार्यया
भर्ती स्त्रीभिर्ता अभिलाषीन हेतोः तृतीयायामयमिति ५८ ~~तस्मादेताः सदा पूज्या~~ यस्मिन् कुले एतत् आनुकूल्यं तत्र तस्मिन् कुले कल्याणं

५९ ॥

५९ ॥
कल्याणं वर्द्धते ६०

59.

यत्रेति हि निश्चये न स्त्री यदि नरो चेत् न स्त्री पुमांसं न प्रमोदयेत् पुंसः अप्रमोदात् प्रजनने जननं न प्रवर्तते ६१ स्त्रियामिति स्त्रियां रोच
मानायां सत्यां भूषणादिना दीप्यमानायां कुलं रोचते उज्ज्वलं भवति ६२ कुविवाहैरिति त्रिभिः शूद्रादि कुविवाहैः आ
सुरादिभिः । शिल्पेनेति शिल्पेन व्यवहारेण धनप्रयोगेन शूद्रापत्यैश्च शूद्रायां अपत्योत्पादनैः गोभिः गवां वि
क्रयणादिभिः ६४ अयाज्येति यानि कुलानि मन्त्रतः वेदतः हीनानि ६५ वैवाहिक इति अग्नौ वैश्वदेव विधिः वैवाहिके
ऽग्नौ गार्ह्यं गार्हस्थ्यं कर्म यथाविधि कुर्वीत कुर्यात् पंचयज्ञविधानं च वैश्वदेवसंज्ञं कुर्यात् पक्तिं स्वात्मपाकं

यत्राहे स्त्री नरो वेति पुमांसं न प्रमोदयन् अप्रमोदात् पुनः पुंसः प्रजननं न प्रवर्तते ६१ स्त्रियं हि रोचमानायां
सर्वं तद्रोचते कुलं तस्यां त्वरोचमानायां सर्वमेव न रोचते ६२ कुविवाहैः क्रियालोपैः वेदस्याध्ययनेन च
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ६३ शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः गोभिरश्वैश्च
यानैश्च कृष्या राजोपसेवया ६४ अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणां कुलान्यकुलतां यान्ति या
निहीनानि मंत्रतः ६५ मंत्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्य
शः ६६ वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ६७ पंचसू
ना गृहस्य चुल्ही पेषण्युपस्करः कंडनी चोदकुंभश्च बध्यते यास्तु वाहयन् ६८ तासां क्रमेण सर्वासां निःकृ
त्यर्थं महर्षिभिः पंच क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनां ६९

गृहधर्मपत्निं अग्न्याहिकीं प्रतिदिवसं पचः गृहीतं कुर्यात् ६७ पंचेति गृहस्थस्य पंचसूनानां प्रत्यहं चुल्ही चुल्ह्यां पेषणी पि
ष्टपेषणी कंडनी मूषलोलूखल उदकुंभः कुंभस्थानं उपस्करः सूर्पादिः या सूना वाहयन् प्रवर्तयन् पापेन बध्य
ते यमः एतानि वाहयन् विप्रो बध्यते मुहुर्मुहुः ६८ तासामिति तासां पंचसूनीनां सर्वासां क्रमेण महर्षिभिः । निःकृ
त्यर्थं प्रायश्चित्तार्थं पंचयज्ञाः क्लृप्ताः कल्पिताः गृहमेधिनां प्रत्यहं अहरहः कुर्यादित्यर्थः ६९

पंचयज्ञानाह अध्यापनमिति अध्यापनं ब्रह्मयज्ञसंज्ञं तर्पणं जलाद्यैः पितृयज्ञसंज्ञः होमः अन्यो दैवः लोकवलिः भौतयज्ञः अतिथिपूजनं नृयज्ञसंज्ञः ७० पंचैतानि एतान्पंच महायज्ञान्यः गृही न हापयति नत्यजति सः ७ छूसन्न जीवति मृतके त्यर्थः गृहेपि वसन् नित्यं पंचसूनादोषैर्न लिप्यते ७१ देवतेति देवताश्रयेनाश्र गृहतां भूतानां एतेषां पंचानाम् यः न निर्वपति सः उछ्वसन्नपि न जीवति मृतकत्यर्थः ७२ अहुतमिति द्वाभ्यामाह अहुतं प्रहुतं ब्राह्म्यंहुतं प्राशितं च पुरुषान्पंचयज्ञान्प्रचक्षते ७३ गायत्रीजपः अहुतसंज्ञः हुतं दैवः

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनं ७० पंचैतान्यो महायज्ञान्न हापयति शक्तितः स गृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते ७१ देवतातिथिभृत्यानां पितॄणामात्मनश्च यः न निर्वपति पंचानामुच्छ्वसन्न स जीवति ७२ अहुतं च हुतं चैव तथा प्रहुतमेव च ब्राह्म्यं हुतं प्राशितं च पंचयज्ञान्प्रचक्षते ७३ जपोहुतो हुतो होमः प्रहुतो भौतिको बलिः ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणं ७४ स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि दैवकर्मणि युक्तो हि बिभर्तीदं चराचरं ७५ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ७६ यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः सर्वे ते गृहिणं तद्वदाश्रित्येतर आश्रमाः ७७

होमं भूतावलिः प्रहुतसंज्ञः विप्रार्चा ब्रह्महुतं पितृतर्पणं नित्यश्राद्धं प्राशितसंज्ञं ७४ स्वाध्याय इति स्वाध्याये वेदाध्ययने नित्ययुक्तः स्यात् दैवे पंचसु यज्ञे इह कर्मणि युक्तः स्यात् दैवकर्मणि युक्तः स्यात् दैवकर्मणि युक्तः सन् इदं चराचरं बिभर्ति ७५ अग्नाविति सम्यक् अग्नौ प्रास्ता मन्त्रेण आहुतिः आदित्यं उपतिष्ठते संतुष्टा दादित्यात् वृष्टिः जायते वृष्टेः अन्नं भवति ततः अन्नात् अन्नभक्षणात् प्रजा जायते ७६ यथेति सर्वजंतवः इतर आश्रमाः आश्रित्य वर्तन्ते ७७

म०स्मृ०टी०
३९

(१)

यस्मादिति अनेन ज्ञानेन वेदार्थव्याख्यानेन यस्मात्कारणात् त्रयोपि आश्रमिणः अन्वहं गृहस्थेनैव धार्यन्ते तस्मात्कारणाद्गृही गृहस्थाश्रमः ज्येष्ठाश्रमः उच्यते ७८ स संधार्य इति स गृहस्थाश्रमः प्रयत्नेन अक्षयं स्वर्गं इच्छता संधार्यः अत्यन्तं सुखं इह इच्छता संधार्यः यः गृहस्थाश्रमः दुर्बलेन्द्रियैः अधार्यः धारयितुं न योग्य इत्यर्थः ७९ ऋषय इति ऋषयः पितरः देवाः भूतानि अतिथयः तथा तेभ्यः कुटुंबिभ्यः गृहिभ्यः सकाशात् आशासते सुखं अपेक्षन्ते विजानता पुंसा शास्त्रज्ञेन स्थितिं तेभ्यः कार्यं वेकारणीयमित्यर्थः ८० स्वाध्यायेनेति श्राद्धेन पितॄन् नॄन् अन्नैः अर्चयेत् इति

यस्मात्त्रयोप्याश्रमिणो ज्ञानेनान्नेन चान्वहं गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ७८ स संधार्यः प्रयत्नेन स्वर्गमक्षयमिच्छता सुखं चेहेच्छता नित्यं योऽधार्यो दुर्बलेन्द्रियैः ७९ ऋषयः पितरो देवा भूतान्यतिथयस्तथा आशासते कुटुंबिभ्यः तेभ्यः कार्यं विजानता ८० स्वाध्यायेन ऋषीनर्चेद्धोमैर्देवान् यथाविधि पितॄन् श्राद्धेन नॄनन्नैर्भूतानि बलिकर्मणा ८१ दद्यादहरहः श्राद्धमन्नाद्येनोदकेन च पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाहरन् ८२ एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं ८३ वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकं आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहं ८४ अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च ८५

अन्नैः तर्पयेत् बलिकर्मणा भूतानि प्रीणयेदित्यर्थः ८१ दद्यादिति अपि नित्यश्राद्धमारभ्यते अहरहः श्राद्धं अन्नाद्येन उदकेन च अन्नाभावे पयसा वा मूलफलैर्वापि किं कुर्वन् प्रीतिं आहरन् ८२ एकमिति पाञ्चयज्ञियकर्मणि चैकं विप्रं पित्रर्थं आशयेत् भोजयेत् अपि वैश्वदेविकं चाद्विजं वैश्वदेवं नाशयेत् न भोजयेत् एकं न भोजयेदित्यर्थः किंतु युग्मं ८३ वैश्वदेवेति सिद्धस्य अन्नस्य वैश्वदेवस्य वैश्वदेवार्थस्य गृह्येऽग्नौ विधिपूर्वकं आभ्यः देवताभ्यः ब्राह्मणः होमं कुर्यात् ८४ अग्नेरिति आदौ प्रथमतः अग्नेः सोमस्य आहुतिं जुहुयात् अग्नये स्वाहा १ सोमाय स्वाहा २ अग्नीषोमाभ्यां स्वाहा ३ विश्वेषां चैव देवानां विश्वेभ्यः स्वाहा ४ धन्वंतरय एव च धन्वंतरये स्वाहा ८५

राम०
३९

कुहूं चैवानुमत्यैवा प्रजापतय एव च सह द्यावापृथिव्योश्च तथा स्विष्टकृते ततः ८५ एवं सम्यक् हविर्हुत्वा
सर्वदिक्षु प्रदक्षिणं इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत् ८७ मरुद्भ्य इति तु द्वारि हरेद्दद्भ्य इत्यपि व
नस्पतिभ्य इत्येवं मुशलोलूखले हरेत् ८८ उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै तु पादतः ब्रह्मवास्तोष्पतिभ्यां
तु वास्तुमध्ये बलिं हरेत् विश्वेभ्यश्चैव देवेभ्यो बलिपाकं समुत्क्षिपेत् दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च
९० पृष्ठे वास्तुनि कुर्वीत बलिं सर्वात्मभूतये पितृबलिशेषं तु सर्वं दक्षिणतो हरेत् ९१ एवं यः सर्वभूतानि
ब्राह्मणो नित्यमर्चयेत् स गच्छति परं स्थानं तेजोमूर्तिः पथार्जुना ... त्वेतद्बलिकर्मैवमतिथिं पूर्वमाश
येत् भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ९४

कुहूं अमायै स्वाहा । पौर्णमास्यै अनुमत्यै स्वाहा द्यावापृथिवीभ्यां स्वाहा । ततः स्विष्टकृते स्वाहा ८५ एवं प्रकारेण सम्यक्
हुत्वा बहिर्मंडलात् बहिः एतन्मंडलं सर्वदिक्षु प्रदक्षिणं मंडलं कुर्यात् इन्द्राय स्वाहा पूर्वे इन्द्रपुरुषाय स्वाहा अन्तका
य स्वाहा यमपुरुषाय स्वाहा दक्षिणे अप्पतये वरुणाय स्वाहा वरुणपुरुषाय स्वाहा इन्दवे स्वाहा इति पश्चिमे इन्दुपुरुषाय
स्वाहा इति उत्तरे बलिं हरेत् दद्यात् द्वारि मंडलं द्वारि मरुद्भ्यः स्वाहा इति करणांश द्रूपाविव द्वाप्य अप्सु उदक स्थापन स्था
ने अद्भ्यः स्वाहा वनस्पतिभ्यः स्वाहा मुशलोलूखले हरेत् स्थापयेत् इति केचित् उच्छीर्षे उच्छीर्षके शय्यायाः प्रदेशाम
स्तकस्थाने पूर्वं श्रियै स्वाहा कुर्यात् तु पुनः पादतः पश्चिमतः भद्रकाल्यै जुहुयात् ब्रह्मवास्तोःपतिभ्यां ब्रह्मयज्ञाना
मिति वास्तोपतेरिति द्वाभ्यां वास्तुमंडलमध्ये स्वाहा बलिं हरेत् दद्यात् ८९ विश्वेभ्यः इति विश्वेभ्यः देवेभ्यः आकाशं ऊर्ध्वं
बलिं क्षिपेत् क्षिपेत् तथा दिवाचारादीनां ... बलिं क्षिपेत् पृष्ठे इति वा पृष्ठे ... भागे ... चतुर्थी संप्रदाने स
र्वात्मभूतये ऐश्वर्याय बलिं कुर्वीत बलिशेषं पितृभ्यः सर्वं प्रदक्षिणतः हरेत् कर्यात् ९१ अनादीनां ... भुवि निक्षिपे
त् एवमिति एवं यः ब्राह्मणः सर्वभूतानि नित्यं अर्चयति पूजयति सः तेजोमूर्तिः सन् ... पथा अचिरादिमार्गेण परं स्थानं धाम गच्छति ९४

तत्पुरायमिति ९६ भिक्षामिति उपपादयेत् अमार्चितं दद्यात् नश्यंतीति अविजानतां मूर्खाणां नराणां मोहात् दातृभिर्द
नष्टोलेः १ स्नानभस्मीभूतेषु विप्रेषु वेदाध्ययनतदर्थज्ञानरहितेषु भस्मतुल्येषु विप्रेषु दत्तानि हव्यकव्यानि विनश्यं
ति ९६ विद्येति विप्रस्य मुखमेव अग्निः तेषु विप्रमुखाग्निषु कीदृशेषु मुखेषु विद्यातपोभिः समृद्धेषु ९८ संप्रा
प्तेति ९९ तृणानीति १०० शिलानामिति शिलोञ्छवृत्तिकमितः उञ्छतः नित्यं चाग्नीनपि जुह्वतः सर्वं सुकृतमादत्ते ब्रा
ह्मणो नार्चितो वसन् १ नित्यं पंचाग्नीन् जुह्वतः बलिवैश्वदेवादीन् कुर्वतः एतादृशस्य गृहे अनर्चितविप्रः रात्रौ वसन् सर्वं सु
कृतं आदत्ते स्वीकुर्यात् २ एकरात्रमिति एकग्रामीनं विप्रं गृहे उपस्थितं वैश्वदेवसमये प्राप्त अतिथिं न विद्यात्सांगति

विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ९८ संप्राप्ताय त्वतिथये प्रद
द्यादासनोदके अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकं ९९ तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता एतान्य
पि सतां गेहे नोच्छिद्यंते कदाचन १०० शिलानप्युञ्छतो नित्यं पंचाग्नीनपि जुह्वतः सर्वं सुकृतमादत्ते ब्राह्म
णो नार्चितो वसन् १ एकरात्रं तु निवसन्नतिथिः ब्राह्मणः अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते २ नैकग्रा
मीणमतिथिं विप्रः सांगतिकं तथा उपस्थितं गृहे विद्यात् भार्या यत्राग्नयोऽपि वा ३ उपासते ये गृहस्थाः पर
पाकमबुद्धयः तेन ते प्रेत्य पशुतां व्रजंत्यन्नादिदायिनां ४ परपाकान्नपुष्टस्य सततं गृहमेधिनः इष्टं दत्तं अधीते
च यस्यान्नं तस्य तद्भवेत् ५ अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत् ६

कं सहाध्यायी चाचित्रकथाभिः सह संगच्छते तं अतिथिं न विद्यात् गृहमागतमपीत्यर्थः यत्र भार्या वाग्नयोऽपि वा वर्तंते तेन
त्रागते ३ उपासत इति तेन कारणेन अन्नादिदायिनां ते प्रेत्य पशुतां गर्दभतां व्रजंति ४ परपाकेति इष्टं यागादि दत्तं दानं अ
धीतं वेदाध्ययनं एतत्सर्वं पुरुषस्य अन्नं भक्षयति कीदृशः अतिथिः सूर्योढः देहमधिष्ठाय सूर्ये ऊढ्वा रति सः सूर्योढः
सूर्येण आनीत इत्यर्थः गृहमेधिना गृहस्थेन गृहमेधी महायज्ञः तेन गृहस्थेन कुले द्वितीयवैश्वदेवकाले प्राप्तः
अकाले वा सायं भोजनाभावे प्राप्तः अनश्नः सन् अस्य गृहस्थस्य गृहे न वसेत् ६

नेति न दैश्वर्ये स्वयं नाश्नीयात् न तत् किं यत् अन्नं अतिथिं न भोजयेत् अतिथिभोजनस्य फलमाह अतिथिभोजनं यशस्यं आयुष्यं स्वर्ग्यं भवति १ आसनेति अतिथिं सथामाह आसनावसथौ आसनं च आवसथं गृहं शय्यां च पुनः अनुव्रजेत् एतत् अतिथेः ३ पाखानेशयनं कुर्यात् हीने हीनं कुर्यात् समे समं कुर्यात् ८ वैश्वदेवेति पाके कृत्वा अन्नं दद्यात् पुनः बलिं हरेत् वैश्वदेवं न कुर्यात् ६ नेति विप्रः स्वस्वकीये कुलगोत्रे भोजनार्थं वस्वप्रशंसानानिवेदयेत् ते कुलेगोत्रे भोजनार्थं प्रशंसन् बुधैर्वाशीत्युच्यते १० ब्राह्मनेति ब्राह्मणस्य गृहे राजन्योऽतिथिः न उच्यते च पुनः

न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिभोजनं १ आसनावसथौ शय्यामनुव्रज्यामुपासनं ३ उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ८ वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् तस्मै चान्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ६ न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् भोजनार्थं हि ते शंसन् वान्ताशीत्युच्यते बुधैः १० ब्राह्मणस्य त्वनतिथिः गृहे राजन्य उच्यते वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च ११ यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् १२ वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ भोजयेत्सह भृत्यैस्तु नेऽन्शंस्यं प्रयोजयन् १३ इतरानपि सख्यादीन् संप्रीत्या गृहमागतान् प्रकृत्यान्नं यथाशक्ति भोजयेत्सह भार्यया १४

वैश्यशूद्रौ सखा च गुरुरपि एते अतिथयो न ११ यदेति अतिथित्वेन अतिथिलक्षण धर्मेण यदा क्षत्रियस्तीर्णपथो दानत्वे परग्रामवासः गृहे आव्रजेत् आगच्छेत् विप्रेषु भुक्तवत्सु कामं तं क्षत्रियमपि पश्चात् १२ वैश्येति अपि निश्चये न वैश्यशूद्रौ चेत् प्राप्तौ कुटुम्बे गृहे अतिथिधर्मिणौ तौ वैश्यशूद्रौ भोजनकाले स्वभृत्यैः सह भोजयेत् १३ इतरानिति आगतान् सख्यादीन् भोजयेत् तस्मात् प्रकृत्याग्नि प्रकर्षेण अन्नं कृत्वा संस्कृत्य भार्यया सह परिवेषक आसन्नेति समान उपचारे सहशब्दः तैः सह स्वयं भार्यासहदंपत्योः शेषभोजनं १४

म० स्मृ० टी०
३३

स्वेति स्ववासिन्यादीन् एतान् अतिथ्यादिभ्यः अग्रत एव अविचारयन् भोजयेत् १५ अदत्त्वेति एतेभ्योऽतिथिभ्यः अ
दत्त्वा पूर्वजः भुंक्ते भुंजानः स ह आत्मनः शरीरं प्रेतत्वं स्वगृध्रैर्जाघि भुंजानं न जानाति विचक्षणः स्वार्थमजानीतः
ईवानीति गृह्यार्थं देवतापूर्वं गृहे प्रतिगास्थः देवदेवादीन्पूजयित्वा गृहस्थः पश्चात् शेषभुक् भवति १७ अघमिति
यः पचति आत्मकारणात् सः केवलं अघं भुंक्ते यत् शिष्टाशनं श्वापमायोनिछेमादि शिष्टान्नं सतां एतत् अन्नं अश्ना
यं योग्यं विधीयते १८ राजेति प्रियः जामाता स्नातकः विद्यास्नातकः व्रतस्नातको वा प्रतिसंवत्सरात्पुनः पुनः मधु

१५।१७

स्ववासिन्यः कुमारींश्च रोगिणो गर्भिणीं स्त्रियः अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयेत् १५ अदत्त्वा तु य
एतेभ्यः पूर्वं भुंक्ते विचक्षणः स्वभुंजानो न जानाति स्वगृध्रैः जग्धिमात्मनः १६ भुक्तवत्सु च सर्वेषु स्वेषु
भृत्येषु चैव हि भुंजीयातां ततः पश्चादेहस्थः शेषभुग्भवेत् १७ अघं स केवलं भुंक्ते यः पचत्यात्मका
रणात् यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते १८ राजर्त्विक्स्नातगुरुप्रियश्वसुरमातुलान् अर्हये
न्मधुपर्केण प्रतिसंवत्सरात्पुनः २० राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ २१ सायं त्वन्नस्यमन्त्रस्य
पत्न्यमंत्रं बलिं चरेत् वैश्वदेवं हि नामैतत् सायंप्रातर्विधीयते २२

पर्केण अर्हयेत् संवत्सरमध्यागमने मधुपर्कार्हाः भवंतीत्यर्थः परिसंवत्सरे इति पाठः परिशब्दो वर्जनार्थमिति २०
राजेति च पुनः राजा यज्ञमारागताः सन् श्रोत्रियः यज्ञकर्मारोदृष्टो पो रिंमासस्यापि वा संवत्सरादूर्ध्वं उपस्थितौ प्राप्तौ
मधुपर्केण संपूज्यो भवतः अयत्तकाले आनिमंत्रितो पूज्यो नस्याहे त्युक्तासंवत्सरमध्य इति स्थिमर्यादा २१ सायमिति
सिद्धस्यान्नस्य सायंसंध्याकाले पत्नी अमंत्रवद्बलिं हरेद्दद्यात् ब्रह्मयज्ञवर्ज्यं बलिहरणं भूतभवनं यज्ञः ततः कुंतो
वाग्नौ तिष्यादिदानं विश्वेषां देवानामिदं कर्म वैश्वदेवं नामैतत्सायंकाले प्रातःकाले विधीयते इति नित्यश्राद्धं २२ श्रीः

राम:
३२

पितृकर्मेमिति अथश्राद्धप्रकरणं आग्निमद्द्विजः चंद्रक्षये अमायां पितृयज्ञपिंडान् निर्वप्य समाप्य मासानुमासि
कं पिंडान्वाहार्यकं स्वपिंडानां कं पश्चात् आहार्यते अनुष्ठीयते तत् पिंडार्थकं श्राद्धं कुर्यात् मासे चानुमासानुमासि
कं तयोभावं २३ पितृणामिति पितृणां पिपत्तां पिंडानां मासिकं श्राद्धं बुधाः अन्वाहार्यसंज्ञं विदुः अन्वाहार्यपि
तृयज्ञपिंडानामनुपश्चाद्यतेन पिंडान्वाहार्यकं तत् श्राद्धं प्रशस्तेन अप्रतिषेधेन अभिषेधेन आमिषेण
कर्तव्यं द्वौ मासौ मास्यमासे नेति वचनात् २४ नेति प्रमीतापितृकः मातृकः यः श्राद्धं न निर्वपति न करोति मासिमा

पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेऽग्निमान् पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं २३ पितृणामा
सिकं श्राद्धमन्वाहार्यं विदुर्बुधाः तदामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः २४ नानिर्वपति यः श्राद्धं प्रमीतपि
तृको द्विजः इंदुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः २५ तत्र ये भोजनीयाः स्युः ये च वर्ज्या द्विजोत्तमाः यावंत
श्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः २६ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि न
प्रसज्येत विस्तरे २७ सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं २८

सिइंदुक्षये अमायां सः प्रायश्चित्ती भवेत् २५ द्वाविति तत्रेति तत्र श्राद्धे ये भोजनीयाः भोज्याहाः स्युः यावंतः संख्या
काः ब्राह्मणाः ये अन्नैः संस्कार्याः तान् अशेषतः प्रवक्ष्यामि द्वाविति ब्राह्मणसंख्यामाह दैवे विश्वेदेवनिमित्तं द्वौ विप्रौ
पितृकृत्ये त्रीन् पित्रादिस्थाने त्रयः त्रयः विप्रास्तेयाः एकैकं उभयं तु वा पितॄणां एकं एकं वा विश्वेषां देवानां वा एकं
एकं ब्राह्मणं ज्ञेयं विस्तरेण प्रसह्य तत् ये चाद्विजाः वर्ज्याः स्युः वर्तते तस्मात् उक्तान् भोजयेत् द्विप्र दोषास्ति न भवति
सत्क्रियामिति सत्क्रियां अन्नसंस्कारविशेषः दक्षिणां प्रवणं कालं कुतुपादि शौचं आत्मब्राह्मणप्रसंगतं य
ज्ञामृत्तिकागोमयभस्मादिगृहोपस्करशुद्धिः ब्राह्मणसंपदः ब्राह्मणसमूहं श्राद्धे विस्तरः वा हंति एतान्

म॰स्मृ॰टी॰
३४

सत्क्रियादिपंचैतानि नाशयति तस्माद्विस्तरं नेच्छेत् न कुर्यात् विस्तरं ब्राह्मणानां बाहुल्यं २६ प्रथितेति एषा प्रेतकृतिः पितृक्रियाकर्म विधुक्षये अमावास्यां प्रथिता प्रसिद्धा तस्मिन् अन्वाहार्ये केपि ये कर्माणि नित्यं युक्तस्य पुंसः इष्टश्राद्धकर्म लौकिकक्रियाप्रेतकृत्या मस्य उपकारः श्राद्धपुत्रो हीयते केन कृत्येनागतिं प्राप्नोति प्रेतकृत्येनेहोति वा पाठः २८ श्रोत्रियायेति एकेन स्वाध्यायमत्रमध्ययनं वा: ३० एकैकमपि वहूनपि अमंत्रकान् वेदाध्ययनरहितान् इत्यर्थः ३१ दूरादिति दूरादेव ब्राह्मणं वेदपारगं परिछेत् पितृपैतामहपूर्वकं केवलं पुरुषत्रयाविख्यातं श्राद्धविधे नियोजयेत् कीदृशं ब्राह्मणं तस्य श्राद्धस्य

प्रथितानां तत्कृत्ये याप्यन्नवामतीर्थक्षये तस्मिन् युक्तस्येति नित्यं कृतकृत्येह लौकिकी २९ श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः अर्हत्तमाय विप्राय तस्मै दत्तं महाफलं ३० एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् पुष्कलं फलमाप्नोति नामंत्रकान्बहूनपि ३१ दूरादेव परीक्षेत ब्राह्मणं वेदपारगं तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ३२ सहस्रं हि सहस्राणामनृचां यत्र भुंजते एकस्तान्मंत्रवित्प्रीतः सर्वानर्हति धर्मतः ३३ ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः ३४ यावतो ग्रसते पिंडान् हव्यकव्येष्वमंत्रवित् तावतो ग्रसते प्रेत्य दीप्तान्

वधिनीहव्यकव्यानि तेषां तद्धव्यानां प्रदाने तीर्थं तीर्थं उदकावतरणमार्गं यथा तीर्थेन उदकं प्राप्यते तथा तादृशो ब्राह्मणे हव्यकव्यानि पितॄन् गच्छंतीति प्रसंशार्थः ब्राह्मणः अतिथिः स्मृतः अतिथिभूल्यः ३२ सहस्रमिति अनृचां अमंत्रपाठानां तु सहस्रेषु भोजितेषु फलं तदेकस्मिन्नवाप्यते ३३ ज्ञानेति ज्ञानोत्कृष्टाय विप्राय कव्यानि पितृभ्यो देयानि देवेभ्यो हवींषि देयानि पुनरज्ञानिदेयानि हव्यकव्यानि दत्तानि चेत्यावृ यनानि भवंति असृग्दिग्धौ असृक्स्पृष्टौ हस्तौ रुधिरेणैव शुध्यतः रुधिरेणैव प्रक्षालितं न शुध्यति इत्यर्थः ३४ यावत इति अमंत्रवित् द्विजः वेदाध्ययनरहितः हव्यकव्येषु यावतः पिंडान् ग्रसते सः ग्रासान्वा विध्यसे प्रत्यनावनः दीप्तान् ज्वलतः अयोगुडान् अयोदुकान् ग्रसते यस्य ब्राह्मणाः ईदृशाः श्राद्धयुभुक्तस्य दूरफलं प्राप्नोति इति वा अविद्वान् भोजने प्रतिषेधः ३५

राम॰
३४

ज्ञाननिष्ठेति द्वाभ्यामाह ज्ञाननिष्ठाः सन्यासिनः तपोनिष्ठाः वानप्रस्थाः तपःस्वाध्यायनिष्ठाः ब्रह्मचारिणः कर्मनिष्ठाः गृहस्थाः ज्ञानोत्कृष्टेषु ज्ञाननिष्ठादिषु सर्वेषु चतुर्षु यत्नतः कव्यानि हव्यानि यथान्यायं यथाक्रमं प्रतिष्ठाप्यानि देयानीत्यर्थः ३५ ज्ञानोत्कृष्टेष्विति ३७ यस्य पिता अश्रोत्रियः मूर्खः स्यात् पुत्रः वेदपारगः स्यात् यस्य पुत्रः अश्रोत्रियः पिता वेदपारगः स्यात् अनयोस्तयोर्मध्ये यस्य श्रोत्रियः पिता स्यात् वेदपारगः स्यात् तस्य सः पुत्र ज्यायान् सं पूज्य भोजनीय

ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथैव च ३५ ज्ञानोत्कृष्टेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः हव्यानि च यथान्यायं सर्वेष्वेव चतुर्ष्वपि ३६ अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः ३७ ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता मंत्रसंपूजनार्थं तु सत्कारमितरो र्हति ३८ न श्राद्धे भोजयेन्मित्रं धनैः कार्योस्य संग्रहः नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजं ४० यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविस्सु च ४१ यः संगतानि कुरुते मोहाच्छ्राद्धेषु मानवः स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजोधमः ४२

मित्यर्थः आत्मा वै जायते पुत्रः इति श्रुते इतरः पुत्रः वेदपारगस्समः मंत्रपूजनार्थं सत्कारं सः अर्हति ३८ नेति वर्ज्यानाह मित्रं श्राद्धे न भोजयेत् यस्य धनैः संग्रहः कार्यः वार्धुषिकः तस्य श्राद्धे अधिकारो नास्ति अरिं शत्रुं मित्रं यं विद्यात् तं द्विजं श्राद्धे न भोजयेत् ४० यस्येति यस्य पुंसः श्राद्धानि मित्रप्रधानानि तस्य पुंसः प्रेत्य श्राद्धेषु हवनीयेषु फलं नास्ति ४१ य इति यः मानवः श्राद्धे मोहात् संगतानि मित्रभावं गतानि कुरुते सः स्वर्गलोकात् च्यवते श्राद्धे निमित्तः यस्य सः श्राद्धमित्रः स द्विजाधमः ४२

संभोजेति सहभुज्यते यया सा संभोजनी मित्रैः द्विजैः पैशाची दक्षिणा अभिहिता उक्ता पिशाचानुपतिष्ठति इत्यर्थः केव
एकवेश्मनि अंधे च गौरिव सा दक्षिणा भोजनोदक्षिणा इहलोक एवास्ते परत्र पितॄन् नोपतिष्ठते इत्यर्थः पि
शाचानामयं धर्मो यः श्राद्धे मित्रसंग्रहः ४३ यथेति यथा हरिणे ऊषरे उप्तावस्था फलं बीजं न लभते तथा अनृचे अनधी
यमाने हविः दत्त्वा दाता फलं न लभ्यते दातॄनिति विधिवद्विदुषे दत्ता दक्षिणा प्रेत्य परलोके इह च इहलोके दातॄन् प्रति
गृहीतॄंश्च फलभागिनः कुरुते ४५ काममिति कामं इच्छया वा श्राद्धे श्राद्धे मित्रं अर्चयेत् अपि निश्चयेन तु अभिरू
पं योग्यं गुणसंपन्नं अरिं शत्रुं न अर्चयेत् हि निश्चयेन द्विषता शत्रुणा भुक्तं हविः दातुः प्रेत्य निःफलं भवति ४६

संभोजनी साभिहिता पैशाची दक्षिणा द्विजैः इहैवास्ते तु सा लोके गौरंधेवैकवेश्मनि ४३ यथेरिणे बीजमुप्त्वा न
समालभते फलं तथानृचे हविर्दत्त्वा न दाता लभते फलं ४४ दातॄन्प्रतिग्रहीतॄंश्च कुरुते फलभागिनः वि
दुषे दक्षिणां दत्त्वा विधिवत्प्रेत्य चेह च ४५ कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिं द्विषता हि हविर्भुक्तं भ
ति प्रेत्य निःफलं ४६ यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगं शाखांतगमथाध्वर्युं छंदोगं वा समाप्तिगं ४७
एषामन्यतमो यस्य भुंजीत श्राद्धमर्चितः पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ४८ एष वै प्रथमः क
ल्पः प्रदाने हव्यकव्ययोः अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ४९

यत्नेति बह्वृचं ऋग्वेदाध्यायनं वेदपारगं यत्नेन भोजयेत् शाखांतगं स्वशाखापारगं वा अथ अध्वर्युं यजुर्वेदाध्यापकं वा छं
दोगं सामशाखाध्यायिनं वा समाप्तिगं स्वशाखापारगमित्यर्थः ४७ एषामिति यस्य श्राद्धे एषां श्रोत्रियाणां अन्यत
मः भुंजीत तस्य पितॄणां शाश्वती तृप्तिः स्यात् साप्तपौरुषी सप्तपुरुषपर्यंते इत्यर्थः ४८ एष इति हव्यकव्ययोः प्रदाने एष
प्रथमः कल्पः उक्तः अयं अनुकल्पः वक्ष्यमाणलक्षणः सदा सद्भिः अनुष्ठितः ४९

५७

मातामहमिति मातामहादयः प्रसिद्धा विट्पतिं पितृगृहे कन्या तस्याः पतिः विट्पतिं भगिनीपतिमित्यर्थः ऋत्विक्प्र
सिद्धः याज्यः शिष्यः बंधुश्च मातुलसगोत्रादिः एतान्भोजयेत् नेति पितृकर्माणि प्राप्ते ब्राह्मणान्प्रयत्नतः परीक्षयेत् ५१
यथेति ये पंक्तिं नदूष्यापंक्तिसंदूषकर्त्तारः इति ५२ यद्वेति हव्यकव्ययोः ये स्तेनादयस्तानर्हान्मनुः अब्र
वीदिति स्तेनाः सुवर्णव्यतिरिक्तचौराः ५३ जटिलमिति यदिलाः ब्रह्मपारगाः तमोभुंजापि प्रातिविध्यते दुर्बलं
दुःखेन बलिंति प्रदाने दुर्बलमिति पाठे दुर्वर्णं दुश्चर्माणमित्यर्थः पूगांश्च गणाः एतान्श्राद्धे याजयंति तान्

मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुं दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भोजयेत् ५० न ब्राह्मणं परीक्षेत
दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि च प्राप्ते परीक्षेत प्रयत्नतः ५१ यथान्ये पांक्तिसंदूष्यास्तथान्ये पांक्तिपाव
नाः अपांक्तेयान्प्रवक्ष्यामि कव्यानर्हान्द्विजाधमान् ५२ ये स्तेनाः पतिताः क्लीबा ये च नास्तिकवृत्तयः तान्हव्य
योर्विप्राननर्हान्मनुरब्रवीत् ५३ जटिलं चानधीयानं दुर्बलं कितवं तथा याजयंति च ये पूगांस्तांश्च श्राद्धे न
भोजयेत् ५४ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः ५५
प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ५६ यक्ष्मी च पशुपाल
श्च परिवेत्ता निराकृतिः ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च ५७

के श्राद्धे न भोजयेत् ५४ चिकित्सेति चिकित्सकादयः हव्यकव्ययोः प्रदाने वर्ज्याः स्युः धर्मार्थेनु चिकित्सकदेवलयो
र्दोषाभावः विपणेन जीवंतः निंद्यपण्येन जीवंतः ५५ प्रेष्य इति वर्ज्यानाह ग्रामस्य प्रेष्यः प्रेषकः राज्ञः प्रेषकः गु
रोः प्रतिरोधाः गुरोः प्रतिकूलः त्यक्ताग्निः अग्निस्त्यागी चेतावत्तयोः त्यागाद्दोषः उपजीवावार्धुषी वृद्ध्याजीवी तु यक्ष्मी
इति यक्ष्मरोगी परिवेत्ता ज्येष्ठे अकृतदारे सति कनीयान्दारानग्नीन्गृह्णाति स परिवेत्ता ज्येष्ठस्तु परिवित्तिः निराकृ
तिः महायज्ञानुष्ठानरहितः देवादीनां निराकर्ता च ब्रह्मद्विट् ब्राह्मणानां वेदस्य वा द्वेष्टा वेदविस्मरणशीलो वा गणाभ्यं

71

कुशीलवेति कुशीलवः नर्तनर्तकाः अवकीर्णी क्षतव्रतः पौनर्भवः पुनर्भ्वां जातः परपूर्वापतिः पुनर्भूः काणः एकाक्षो यस्य गृहे च उपपतिः जारः एते वर्ज्याः ५८ भृतकेति भृतकाध्यापकः वेतनदानेन योऽधीते सः यः भृतकाध्यापितः अध्येता शूद्रस्य यः वागदुष्टः गुरुः गोलककुंडौ पत्यौ जीवति कुंडः मृते भर्तरि गोलकः ५९ अकारणेति ब्राह्मणैः संबंधैः संयोगं गतः वेदाध्ययनसंबंधैः संयोगं गतः तथा यौनैर्विवाहसंबंधैः संयोगं गतः ६० कुंडाशी [illegible] वंदीकारः गृहस्थितः तैलिकः तैलविक्रयी कूटकारकः अगारदाही गृहदाहकारी सोमलताविक्रयी शूद्रयाजी शूद्रं यो

कुशीलवोवकीर्णी च वृषलीपतिरेव च पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ५८ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुंडगोलकौ ५९ अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ब्राह्मैर्यौनिश्च संबंधैः संयोगं पातितैर्गतः ६० अगारदाही गरदः कुंडाशी सोमविक्रयी शूद्रयाजी च वंदी च तैलिकः कूटकारकः ६१ पित्रा विवदमानश्च कितवो मद्यपस्तथा पापरोग्यभिशस्तश्च दांभिको रसविक्रयी ६२ धनुःशराणां कर्ता च यश्चाग्रेदिधिषुपतिः मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ६३ भ्रामरी गंडमाली च श्वित्र्यथो पिशुनस्तथा उन्मत्तोंऽधश्च वर्ज्याः स्युर्वेदनिंदक एव च ६४ हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च स्रोतसां भेदकश्चैव तेषां चावरणे रतः गृहसंवेशको दूतो वृ

यजति वंदी स्तुतिपाठकः अन्नतपाकः ६१ पापरोगी दीर्घरोगी अभिशस्तः कलंकीत्यर्थः ६२ धनुःशराणां कर्ता च कारादिक्रयी यः अग्रेदिधिषुपतिः पुनर्भ्वापतिः द्वि[illegible]स्याः दिधिषूः पतिरेव च पुत्रः आचार्यो यस्य स पुत्राचार्यः भ्रामरी अपस्मारी गंडमाला लाक्षपोलके कंठे पिटकमाला कारा जायते हस्तीति हस्तिगो अश्व उष्ट्री दीनृ इच्छतीति दमकः ६५ तेषां वा आवरणे रतः गृहसंवेसकः गृहारोपयति मूल्येन वा वृक्षारोपः ६६

श्वक्रीडीति वृषलपुत्रः निर्धर्मा वृषलो ज्ञेयः तत्सुतो वृषलात्मजः च पुनः मांयाचक एव विनायकादिगणयाचकः सर्वेषां या
चको वा ६७ आचारेति क्लीवः धर्मोत्साहरहितः कृषिजीवी कृषिकृत श्लीपदी परीमहात्म्यस्य सहितस्य सहिसद्भिः निंदि
तः दुर्भगः ६८ औरभ्रिकेति औरभ्रिकः मेषपालकः माहिषपालको वा परपूर्वापतिः परपूर्वा पुनर्भूः तस्याः पतिः प्रेतनिर्या
तकः प्रेतं लोभेन निर्याति प्रेतवाहक इत्यर्थः ६९ एतानीति उभयत्रापि निश्चये दैवे पित्र्ये हव्यकव्यादिषु ७० ब्राह्मण इति

श्वक्रीडी श्येनजीवी च कन्यादूषक एव च हिंस्रो वृषलपुत्रश्च गणानां चैव याजकः ६७ आचारहीनः क्लीवश्च नित्यं
याचनकस्तथा कृषिजीवी श्लीपदी च सद्भिर्निंदित एव च ६८ औरभ्रिको माहिषिकः परपूर्वापतिस्तथा प्रेतनिर्यात
कश्चैव वर्जनीयाः प्रयत्नतः ६९ एतान्विगर्हिताचारानपांक्तेयान्द्विजाधमान् द्विजातिप्रवरो विद्वानुभयत्रापि वर्ज
येत् ७० ब्राह्मणस्त्वनधीयानः तृणाग्निरिव शाम्यति तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ७१ अपांक्तेयप्र
दाने यो दातुर्भवत्यूर्ध्वं फलोदयः दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः ७२ अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा
अपांक्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुंजते दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ७४

तृणस्य अग्निः यथा शाम्यति तथा अनधीयानः द्विजः शाम्यति तस्मै द्विजाय अन्नं न दातव्यं न हि भस्मनि हूयते तृणाग्निः
यथा हविः दग्धं न शक्नोति हुतमात्रेण शाम्यति तथा अस्मिन् अग्नौ न हुतं न भस्मीभवति वेदाध्ययनरहितः भस्मतुल्यः
द्विजः भवतीत्यर्थः ७१ अपांक्तदाने अपांक्तेयानां पुंसां दानेन तु यः फलोदयः ऊर्ध्वं परलोके भवेत् तं अशेषतः फलं वक्ष्या
मि दैवे पित्र्ये वा कर्मणि ७२ अव्रतैरिति अन्यैः अपांक्तेयैः ७३ दारेति यः अग्रजे स्थिते सति दाराग्निहोत्रं कुरुते स्वीकुर्यात्
स परिवेत्ता विज्ञेयः पूर्वजः ज्येष्ठः परिवित्तिसंज्ञः भवति ७४

म.स्मृ.टी.

३६

परिवित्तिरिति परिवित्तिः लघुपरिवेत्ता यया स्त्रिया सह परिविद्यते याजकः विवाहकर्ता आचार्यः पंचमः ते सर्वे नरकं यांति गच्छंतीत्यर्थः ७५ भ्रातुरिति मृतस्य भ्रातुः भार्यायां कामजः अनुरज्येत अनुरक्तो भवेत् धर्मेणापि नियुक्तायां आज्ञाप्तायां सह दिधिषूपतिः ज्ञेयः यथा व्यासः धृतराष्ट्रपांडुजनकत्वात् परपूर्वापतिं धीरा वदंति दिधिषूपतिरिति ज्ञेयः ७६ परेति ७८ तावेतौ तु कुंडगोलकौ परक्षेत्रे जातौ प्राणिनौ इह लोके प्रेत्य परलोके प्रदायिनां दातॄणां दत्तानि हव्यकव्यानि नाशयेते अपांक्तेति अपांक्तः द्विजः यावतः संख्याकान् पांक्त्यान् भुंजानान् अनुपश्यति दाता तत्र तावतां तावत्संख्य

परिवित्तिः परिवेत्ता च यया च परिविद्यते सर्वे ते नरकं यांति दातृयाजकपंचमाः ७५ भ्रातुर्मृतस्य भार्यायां यो नुरज्येत कामतः धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ७६ परदारेषु जायेते द्वौ सुतौ कुंडगोलकौ पत्यौ जीवति कुंडः स्तु मृते भर्त्तरि गोलकः ७७ तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च तानि हव्यकव्यानि नाशयेते प्रदायिनां ॥७८

अपांक्तो यावतः पंक्त्यान् भुंजानाननुपश्यति तावतां न फलं तत्र दाता प्राप्नोति बालिशः ८० वीक्ष्यांधो नवतेः काणः षष्टेः श्वित्री शतस्य तु पापरोगी सहस्रस्य दातुर्नाशयते फलं ८१ यावतः संस्पृशत्यंगैः ब्राह्मणान् शूद्रयाजकः तावतां न भवेद्दातुः फलं दानस्य पौर्त्तिकं ८२

कानां भुंजतां फलं न प्राप्नोति बालिशः मूर्खः दाता ८० तत्र हि वीक्ष्येति अंधः दर्शनयोग्यस्थले न वीक्ष्य दृष्ट्वा भुंजतां फलं नवतिसंख्यकानां द्विजानां फलं नाशयेत् काणः वीक्ष्य दृष्ट्वा भुंजतां द्विजानां षष्टिसंख्याकानां फलं नाशयते श्वित्री कुष्ठी भुंजतां नवतिसंख्यकानां द्विजानां शतसंख्याकानां फलं नाशयते पापरोगी वीक्ष्य भुंजतां द्विजानां सहस्रसंख्याकानां फलं नाशयते ८१ यावत इति शूद्रयाजकः शूद्रयज्ञकर्ता यावतः ब्राह्मणान् अंगैः संस्पृशति तावतां दातुः दानस्य फलं न भवेत् ८२

राम

३६

75

१

वेदविदिति अस्यभूड्यानकस्यवैविद्विप्रः लोभात्प्रतिग्रहं कृत्वा सः वेदविद्विप्रः क्षिप्रं विनाशं व्रजति अंभसि जले आमपात्रमिवेत्यर्थः ८२ सोमेति सोमविक्रयिणे द्विजे दत्तं पूयशोणितं भवति देवलके द्विजे दत्तं नष्टं भवति वार्द्धुषौ वृद्धिजीविनि दत्तं अप्रतिष्ठं भवति न उपतिष्ठेत वाणिजके वाणिकवृत्तिस्थिते द्विजे यत्तु दत्तं इहलोके अमुत्र परलोके तन्न भवेत् न फलतीत्यर्थः पुनर्भुवः सकाशाद्भवति पौनर्भवः तस्मिन् द्विजे दत्तं हुतं कारितं हव्यं भस्मनीव भवति हुतं हव्यं भस्मनि यथा निष्फलं भवति तथा ८४ इतरेष्विति इतरेषु अनुलोमप्रतिलोमजेषु दत्तं हव्यं कव्यं अन्नं मेदोरूपं भवति अपांक्तेषु अ

वेदविद्यापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहं विनाशं व्रजति क्षिप्रमामपात्रमिवांभसि ८२ सोमविक्रयिणे विष्ठा भिषजे पूयशोणितं विनष्टं देवलके दत्तमप्रतिष्ठं तु वार्द्धुषौ ८३ यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ८४ इतरेषु त्वपांक्तेषु यथोद्दिष्टेष्वसाधुषु मेदोऽसृङ्मांसमज्जास्थि वदंत्यन्नं मनीषिणः ८५ अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पंक्तिपावनान् ८६
अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः ८७

सृङ्मांसरूपं भवति यथोद्दिष्टेषु वर्जितेषु यद्दत्तं तन्मज्जारूपं भवति असाधुषु यद्दत्तं तदस्थिरूपं भवति एवं मनीषिणः वदंति मेदोऽसृङ्मांसादीनि तादृशं जातो जायते यत्रैतदीहारो भवति ८५ अपांक्तेइति अपांक्तैः द्विजैः उपहताः दूषिता पंक्तिः यैः द्विजैः पाव्यते निर्दोषीक्रियते तान् द्विजाग्र्यान् पंक्तिपावनान् कार्त्स्न्येन विबोधत ८६ पंक्तिपावनानाह अग्र्या इति सर्वेषु वेदेषु ऋग्वेदादिषु अस्खलिताध्ययनक्षमाः अग्र्याः चेपुनः सर्वप्रवचनेषु षडंगाध्ययनेषु कल्पे शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिरिति षडंगानि एषां अध्यापकालेषु वेदार्थनिर्वचनेषु इति पाठः वेदार्थविचारकेषु वा अग्र्याः मुख्याः

म-स्मृ-टी०

योनाः चपुनः श्रोत्रियान्वयजाः श्रोत्रियाणामन्वये वंशे जाताः एते पंक्तिपावनाः ज्ञेयाः ८४ त्रिणाचिकेति त्रिणाचिकेतः यजुर्वेदैकदेशो तद्व्रताचरणेन तदध्यायी त्रिणाचिकेतः तैत्तिरीयशाखायां प्रसिद्धः पंचाग्निः सभ्यावसथ्यौ दक्षिणाग्निस्त्रयः यस्य संति स पंचाग्निः त्रिसुपर्णः त्रिसुपर्णं गरुत्मानिति श्रुतिः त्रिसुपर्णानुवाकत्रयस्याध्येता तदुपासनाभिज्ञश्च तैत्तिरीयशाखायां षडंगवेत्ता षडंगो वेद उच्यते इत्यमरः ब्रह्मदेयात्मसंतानः ब्राह्मविवाहजः चपुनः ज्येष्ठसामगः सामविशेषः तद्व्रताचरणेन यः तदधीते सः ज्येष्ठसामग उच्यते ८५ वेदार्थविदिति वेदार्थविदिति वेदार्थवित् चपुनः प्रवक्ता वेदशास्त्रार्थवक्ता ब्रह्मचारी प्रसिद्धः सहस्रदः

त्रिणाचिकेतः पंचाग्निः त्रिसुपर्णः षडंगवित् ब्रह्मदेयात्मसंतानो ज्येष्ठसामग एव च ८५ वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ८६ पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते निमंत्रयेत त्र्यवरान्सम्यक् विप्रान्यथोदितान् ८७ निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा न च छंदांस्यधीत यस्य श्राद्धं च यत् भवेत् ८८ निमंत्रितान्हि पितरः उपतिष्ठंति तान्द्विजान् वायुभूतानिगच्छंति तथासीनानुपासते ८९ निमंत्रितो यथान्यायं हव्यकव्ये द्विजोत्तमः कथंचिदप्यतिक्रामन्पापः शूकरतां व्रजेत् ९० आमंत्रितस्तु यः श्राद्धे वृषल्या सह मोदते दातुर्यत् दुःकृतं किंचित्तत्स

गोसहस्रदः सहस्रगोदाता चपुनः शतायुः अचिरंजीवी त्यर्थः एते पंक्तिपावना विज्ञेयाः ८६ पूर्वेद्युरिति श्राद्धकर्मणि उपस्थिते सति प्राप्ते सति पूर्वेद्युः रात्रौ वा अपरेद्युः तद्दिने वा यथोदितान् त्र्यवरान् त्रयः अवराः न्यूनाः एषां त्र्यवराः एतान्निमंत्रयेत् ८७ निमंत्रित इति पित्र्ये कर्मणि निमंत्रितः सदा द्विजः नियतात्मा भवेत् चपुनः छंदांसि नाधीयीत चपुनः यस्य गृहे श्राद्धं सः तद्वेत् तद्व्रताचरणो भवेत् जितेंद्रियः अध्ययनरहितः ८८ निमंत्रितानिति वायुभूताः पितरः द्विजाननुगच्छंति ८९ निमंत्रित इति निमंत्रितः द्विजः कथंचिदपि विषयान् अतिक्रामन् विषयैराक्रांतः सः पापः शूकरतां व्रजेत् ९० आमंत्रित इति

ॐ मनुस्मृति

राम: ३७

द्विजः श्राद्धे आमंत्रितः मनू वचल्पासहरात्रोमोदते दातुः श्राद्धकर्तुः यत् दुःकृतं पापं तत्सर्वं प्रतिपद्यते पितॄणां स्वरूपमाह अक्रो
धनेति अक्रोधनादयः पितरः पूर्वदेवताः ९२ यस्मादिति यस्मात्कारणादेतेषां सर्वेषां पितॄणामुत्पत्तिं अशेषतः निबोधत च पुनः
ये पितरः ये देवादिभिः नियमैः उपचर्याः सत्यास्युः तान्निबोधत ९३ मनोरिति हिरण्यगर्भप्रजापतिः तस्य पुत्रः हैरण्यगर्भः
प्रजापतिः तस्य पुत्रा मनुः तत्समपुत्राः हिरण्यगर्भोऽस्य मनुः ये मरीच्यादयः ऋषयस्ते मरीच्यादीनां ऋषीणां पुत्राः पितृग
णाः स्मृताः ३ क्रोः ९४ विराडिति विराट्सुताः सोमपुत्राः सोमलोकनिवासितः साध्यानां पूर्वकल्पाधिकारिणां देवा

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः ९२ यस्मादुत्पत्तिरेतेषां सर्वे
षामप्यशेषतः ये च यैरुपचर्याः स्युः नियमैस्तान्निबोधत ९३ मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः तेषाम्
ऋषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ९४ विराट्सुताः सोमसदः साध्यानां पितृदेवताः अग्निष्वात्ताश्च देवानां
मरीच्या लोकविश्रुताः ९५ दैत्यदानवयक्षाणां गंधर्वोरगराक्षसां सुपर्णकिन्नराणां च स्मृत्वा बर्हिषदो त्रिजाः २००
सोमपास्तु कवेः पुत्राः नाम विप्राणां क्षत्रियाणां हविर्भुजः वैश्यानामाज्यपानाम शूद्राणां तु सुकालिनः १ सो
मपास्तु कवेः पुत्राः हविष्मंतो गिरः सुताः पुलहस्याज्यपाः पुत्रा वशिष्ठस्य तु कालिनः २

नां पितरः स्मृताः मरीच्योत्पन्नाः मारीच्याः अग्निष्वात्तसंज्ञाः पितरः लोकविश्रुताः प्रसिद्धाः ९६ दैत्य इति अत्रिजा बर्हिष
दसंज्ञाः पितरः दैत्यादीनां पूज्याः स्मृताः २०० सोमेति सोमपा नाम पितरः लोक विप्राणां पूज्याः स्मृताः हविर्भुजसंज्ञाः पि
तरः क्षत्रियाणां पूज्याः स्मृताः आज्यपा नाम पितरः वैश्यानां सुकालिनसंज्ञाः शूद्राणां पूज्याः स्मृताः सोमपेति सोमपा
नामकवेन संज्ञाः पितरः अंगिरः १ सोमपेति सोमपा नाम कवेः भृगोः पुत्राः हविष्मंतसंज्ञाः पितरः अंगिरः सुताः पुल
हस्य पुत्रा आज्यपा नाम संज्ञाः पितरः वशिष्ठस्य पुत्राः कालिनसंज्ञाः पितरः भवंति २

म.स्मृ.टी०

३८

अग्नीतिति अनग्निदग्धान् कव्यान् कव्यानाम्नः पितॄन् बर्हिषदसंज्ञान् अग्निष्वात्तसंज्ञान् सोम्यान् सोमसंज्ञान् एतान्पितृगणान् विप्राणामेव निर्दिशेत् ३।४ अविभ्य इति ५ पितॄणां पात्राण्याह राजतैरिति एषां पितॄणां राजतैरिति भाजनैः पात्रैः रजतान्वितैर्वा भाजनैः पात्रैः क्रियाः कार्याः कृतैर्वा श्राद्धमादत्तमायैः वारि श्रद्धाप्यायश्रानन्त्याय उपकल्पते उपतिष्ठते त्स्पर्शः ६ देवकार्येति वीरसिंहप्रकाशे अर्घपात्राण्याह वाष्कलः सौवर्णरौप्यताम्राणां तद्भावे पत्रपर्णं अष्टांगुलं भवेत्पात्रं पितॄरजतं शुभं दशांगुलं तु देवानां सौवर्णं ताम्रमेव च ७ तेषामिति तेषां पितॄणां दैवपूर्वं आरक्षभूतं सर्वत्र रक्षायुक्तं श्राद्धं योजयेत्

अनग्निदग्धान् आग्निदग्धान् कव्यान् बर्हिषदो वहन् अग्निष्वात्तांश्च सोम्यांश्च विप्राणामेव निर्दिशेत् ३ य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकं ४ ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः देवेभ्यस्तु जगत्सर्वं चरं चाचरमेव च ५ राजतैर्भाजनैरेषामथवा रजतान्वितैः वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते ६ देवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतं ७ तेषामारक्षभूतं तु पूर्वं दैवं नियोजयेत् रक्षांसि विप्रलुम्पन्ति श्राद्धमारक्षवर्जितं ८ दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत् पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः ९

तु रक्षैव आरक्षः तं आरक्षं श्राद्धं नियोजयेत् आरक्षवर्जितं दैववर्जितं श्राद्धं रक्षांसि विप्रलुम्पन्ति अपहता असुरा रक्षांसि इति मन्त्रेण तिलयवान् गृहीत्वा रक्षांसि कुर्यात् ८ दैवाद्यमिति तत् श्राद्धं दैवाद्यं दैवान्तं ईहेत कुर्यात् तथा हि वादिपूर्वं देवानां आह्वानं विश्वेदेवा आगच्छन्त्विति वाचयेत् अन्ते श्राद्धान्ते उपतिष्ठन्तु पितरः सव्येन विश्वेदेवैः सहेति एवं दैव[illegible]द्यन्तं तत् श्राद्धं पित्राद्यन्तं न भवेत् कुर्यात् ९

एम:

३८

78

शुचिमिति भूमिशुद्धिमाह तत्र गोमयादिनालिप्तेऽदक्षिणाप्रवणे दक्षिणतोऽवनते निम्नप्रदेशे आह्वाने कार्यं १० अवकाशे
ष्विति अवकाशेषु असंकीर्णस्थानेषु उच्छ्रुषु उच्चस्थानेषु विविक्तेषु विजनेषु अरण्यादिषु पिजलतीरेषु एतादृशेषु ते
पिंडेन पितरः सदा तुष्यंति संतुष्टा भवंतीत्यर्थः ११ आसनेष्विति उपलिप्तेषु चौरितेषु आसनेषु बर्हिष्मत्सु सकुशेषु पृथ
क्पृथक् उपस्पृष्टोदकान् कृताचमनान् तान् निमंत्रितान् विप्रान् उपवेशयेत् १२ उपविष्टेष्विति देवपूर्वकं विश्वेदेवानुपूर्वकं

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् १० अवकाशेषु चोक्षेषु जल
तीरेषु चैव हि विविक्तेषु च तुष्यंति दत्तेन पितरः सदा ११ आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक्पृथक् उपस्पृष्टोद
कान्सम्यक् विप्रांस्तानुपवेशयेत् १२ उपविष्टांस्तु तान् विप्रानासनेष्वजुगुप्सितान् गंधमाल्यैः सुरभि
भिरर्चयेद्देवपूर्वकं १३ तेषामुदकमानीय सपवित्रांस्तिलानपि अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह
१४ अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः हविर्दानेन विधिवत्पश्चात्संतर्पयेत्पितॄन् १५

तान् विप्रान् अर्चयेत् १३ अग्नौकरणं द्वाभ्यामाह तेषामिति तेषां पितॄणां अर्घ्ये विप्राणां समीपे उदकं अर्घ्यशेषोदकं आ
नीय सपवित्रान् पवित्रसहितान् तिलान् आदाय ब्राह्मणानपीष्ट्वा अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा
सोमाय यमाभ्यां एवं आदितः प्रथमतः आप्यायनं कृत्वा तत्राह मार्कंडेयः आहिताग्निस्तु जुहुयात् दक्षिणाग्नौ समाहितः
अनाहिताग्निस्तु सदे अग्न्यभावे आवसथ्याग्न्यभावे द्विजे स्यात् ततः पश्चात् अग्नौकरणानंतरं पितॄन् पितृपितामह
प्रपितामहस्थानेषु उपविष्टान् द्विजान् हविर्दानेन हविष्यान्नदानेन विधिवत्संतर्पयेत् भोजयेदित्यर्थः पवित्रलक्षणमा
णमाह अनंतगर्भं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् १४।१५

अक्रोधनादिति एतान् दशान्वुरातनान् पितृरूपान् द्विजोत्तमान् श्राद्धदेवान् श्राद्धप्रापकान् एवं वदंति १७ अपसव्यमिति अग्नौ अपसव्यं कृत्वा यज्ञोपवीतं प्राचीनावीतं कृत्वा सर्वं सावृत् परिक्रमं दक्षिणं परिक्रम्य अपसव्येन हस्तेन भुवि उदकं निर्वपेत् वामहस्तेन सव्यस्यादेपसव्यनुदक्षिणां १८ त्रिष्विति तस्मात् हविः शेषान् अन्नान् समीहितः सन् पित्र्यपिंडान् कृत्वा दक्षिणामुखः सः ओदकेन विधिना अपसव्येन जलदानविधिना अपसव्येन पितृतीर्थेन तान् निर्वपेत् धान्यात् हविष्या नीह तद्यथा व्रीहिशालियवगोधूममुद्गमाषमुत्पन्नकालशाकएतान्मुंठिमरीचिहिंगुसर्करा कर्पूर सैंधवं सांभरना

अग्न्याभावे तु विप्रस्य पाणावेवोपपादयेत् यो ह्यग्निः स द्विजो विप्रैर्मंत्रदर्शिभिरुच्यते १६ अक्रोधनान्सुप्रसादान् वदंत्येतान्पुरातनान् लोकस्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान् १७ अपसव्यमग्नौ कृत्वा तु सर्वमावृत्तं परिक्रमं अपसव्येन हस्तेन निर्वपेदुदकं भुवि १८ त्रींस्तु तस्माद्धविः शेषात्पिंडान्कृत्वा समाहितः औदकेनैव विधिना निर्वपेद्दक्षिणामुखः १९ न्युप्य पिंडांस्ततस्तांस्तु प्रयतो विधिपूर्वकं तेषु दर्भेषु तं हस्तं निर्मृज्याल्लेपभागिनां २० आचम्योदक्परावृत्य त्रिरायम्य शनैरसून् षड् ऋतूंश्च नमस्कुर्यात्पितॄनेव च मंत्रवित् २१ उदकं निनयेच्छेषं शनैः पिंडांतिके पुनः अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः २२

लिके एएकसीवक्ररगव्यपयोदधिघृतपायसप्रभृति तिस्मृत्यंतरप्रसिद्धं वेदितव्यं १९ न्युप्येति न्युप्य तान् दत्वा उप्यस्थाप्य मानन् ततः स्थापनानंतरं हस्तं निमंज्य अंगुल्यादिना प्रक्षाल्य लेपभागिनां तेषु दर्भेषु दर्भमूलेषु तत्प्रक्षाल्य अन्नं दद्यात् यतः पूर्वोलेपभागिनः इति वचनात् २० आचम्येति ततः दर्भेषु पिंडं दत्वा उदक् परावृत्य उदकं उदीचीं दिशां परावर्तेत ततः प्रदक्षिणावृत्य यो नमामुखः स्थित्वा आचम्य असून् प्राणान् शनैः त्रिराचम्य प्राणानायम्य त्रिः प्राणायामान् कृत्वा षड् ऋतून् नमस्कृत्य मंत्रविद्वान् ब्राह्मणः कर्ता पितृन् पितॄन् ब्राह्मणान् नमः कुर्यात् न मोघः पितर इति २१ उदकमिति

पुनः पिंडांतिके पिंडसमीपे उदकं शनैः निर्वपेत् दद्यात् अल्पोदकमिति उपतिष्ठेतां यदानुपूर्व्यान् दत्वा पिंडान् समाहितः तान् उत्थाप्य अवजिघ्रेत् २२ पिंडेभ्य इति पिंडेभ्यः पिंडशाकेभ्यः अल्पिकां मात्रां अन्नं समादाय यथानुपूर्वशः ता न्येव अभ्यर्चितानेव आसीनानेव विप्रान् विधिवत्पूर्वं आशयेत् भोजयेत् इत्यर्थः २३ ध्रियमाण इति जीवति तदीयपित्या हे पितरि ध्रियमाणे जीवति सति पूर्वेषां पितॄणां पिंडं निर्वपेत् दद्यात् आभ्युदयिकश्राद्धे तं स्वकं पितरं विप्रवद्भोजयेद्दी येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति न्यायात् २४ पितेति यस्य पिता वृत्तः स्यात् मृतः स्यात् पितामहं जीवेद्वा २५

पिंडेभ्यस्त्वाल्पिकां मात्रां समादायानुपूर्वशः। तानेव विप्रानासीनान् विधिवत्पूर्वमाशयेत् २२ ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्। विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत् २३ पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहं २४ पितामहो वा तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुः। कामं वा समनुज्ञातः स्वयमेव समाचरेत् २५ तेषां दत्वा तु हस्तेषु सपवित्रं तिलोदकं। तत्पिंडाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् २६ पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्द्धितं। विप्रांतिके पितॄन्ध्यायन् शनकैरुपनिक्षिपेत् २७

पितामह इति तच्छ्राद्धे पितामहो वा भुंजीतेति मनुरब्रवीत् वा पक्षांतरं तदनुज्ञातः पितृपितामहाभ्यामनुज्ञातः कामं स्वयमेव समाचरेत् २६ तो ब्राह्मणानां हस्तेषु सपवित्रं तिलोदकं दत्वा पिंडाग्रं पिंडशेषं एषां पितॄणां स्वधास्त्विति ब्रुवन् प्रक्षिपेत् दद्यात् इति २७ स्वयं अन्नस्य वर्द्धितं अन्नपूर्णभाजने स्वयं पाणिभ्यामुपसंगृह्य विप्रांतिके समीपे पितॄन्ध्यायन् तुल्यामिति शनकैः उपनिक्षिपेत् स्थापयेत् यथाविहितं २८

उभयोरिति उभयोर्द्वाभ्यां हस्ताभ्यां मुक्तं वर्जितं अपरिगृहीतं यदन्नमुपनीयते परिवेषणार्थं तेन तत् अन्नं असुराः विप्रलुंपंति सहसा दुष्टचेतसः २८ गुणानिति गुणान् व्यंजनानि च पुनः शूपशाकादीन् दारुमयफलकादौ भूमावेव समाहितः सन् विन्यसेत् स्थापयेत् भूमौ स्थापयित्वा परिवेषयेत् इत्यर्थः ३० भक्ष्यमिति हृद्यानि प्रियाणि घ्राणानि सुरभीनि कर्पूरादिसंयुतानि ३१ उपनीयेत तत्सर्वं भक्ष्यभोज्यं उपनीय आनीय समाहितः सन् परिवेषयेत् प्रयतः सर्वा

उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते तद्विप्रलुंपंत्यसुराः सहसा दुष्टचेतसः २८ गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु विन्यसेत्प्रयतः सम्यक् भूमावेव समाहितः ३० भक्ष्यं भोज्यं च विविधं अन्नानि मूलानि च हृद्यानि चैव मांसानि पानानि सुरभीनि च ३१ उपनीय तु तत्सर्वं शनकैः सुसमाहितः परिवेषयेत्प्रयतो गुणान्सर्वान्प्रचोदयन् ३२ नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत् न पादेन स्पृशेदन्नं न चैवमवधूनयेत् ३३ गमयत्यस्रं प्रेतान्कोपोऽरीननृतं शुनः पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननं ३४

न्धासणान् गुणान् व्यंजनानि द्रव्यस्य यो गुणाः अल्पत्वादयः वचनेन अपद्यमानः प्रणोदयन् प्रेरयन् ३२ नचेति श्राद्धकर्ता जातु कदाचित् अश्रून् पातयेत् रोदनं न कुर्यात् तथा न कुप्येत् न क्रोधं कुर्यात् अनृतं न वदेत् अन्नं पादेन स्पृशेत् एवं अन्नं न अवधूनयेत् न तत् हस्तं वा न कंपयेत् ३३ तत्र दोषमाह गमयति अश्रु प्रेतान् प्रति अन्नं गमयति प्रापयति कोपः अरीन् प्रति अन्नं गमयति प्रापयति अवधूननं तिरस्करणं वा अवधूननं वस्त्रव्यजनेन वा अवधूननं दुःकृतीन् प्रतिगमयति प्रापयति ३४

यद्यदिति यत्यत् अन्नं यास्सो वा रोचेत तत्तत् अमत्सरः सन् दद्यात् ब्राह्मणा विदेदेया: ३ यंते ब्रह्मोद्याः कथाः कुर्यात् छुद्रा
दिवासुरादि युद्धादि ब्रह्मोद्यं वदंति कश्चिदेकाकी चरति कोस्विज्जायते पुनः किंस्विद्धिमस्य भेषजं किंस्विदावपनं महदिति
प्रत्याह सूर्य एकाकी चरति चंद्रमा जायते पुनः अग्निर्हिमस्य भेषजं भूमिरावपनं महदितीत्याद्याः कथाः पितॄन्युक्तानीत्य
र्थः ३५ स्वाध्यायमिति पित्र्यं स्वाध्यायं पित्र्यसूक्तं ब्राह्मणान् श्रावयेत् । पित्र्यसूक्तमाह पितृभ्यः स्वधायिभ्यः स्वधा नमः
पितामहेभ्य इत्यादि च पुनः धर्मशास्त्राणि श्रावयेत् इति ३६ हर्षयन्निति ब्राह्मणान् हर्षयन् तुष्टः शनैः शनैः शनैर्भोज

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः । ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितं ३५ स्वाध्यायं श्रावयेत्पित्र्यं ध
र्मशास्त्राणि चैव हि । आख्यानानीतिहासांश्च पुराणानि खिलानि च ३६ हर्षयन् ब्राह्मणान् तुष्टो भोजयेच्च श
नैः शनैः । अन्नाद्येनासकृच्चैतान् गुणैश्च परितोषयेत् ३७ व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् । कु
तपं चासनं दद्यात्तिलैश्च विकिरेन्महीं ३८ त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः । त्रीणि चात्र प्रशंसंति शौ
चमक्रोधमत्वरां ३९ अत्युष्णं सर्वमन्नं स्यात् भुंजीरंस्ते च वाग्यताः । न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गु
णान् ४० यावदूष्मा भवत्यन्ने यावदश्नंति वाग्यताः । पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणाः ४१

येत् अन्नाद्येन एतान् ब्राह्मणान् गुणैः व्यंजनैः परिवेषयेत् ३७ व्रतस्थमिति कुतपं नेपालकंबलं आसनं दद्यात् तिलै
श्च महीं विकिरेत् ३८ त्रीणीति कुतपः कुतुपकालो वा दौहित्रः खड्गपात्रं दौहित्रो वा दौहित्रमिति पाठः दौहित्रं तोषये
त ३ तत्रः पिधमयः त्रीणि अत्र श्राद्धे प्रशंसंति शौचमथ्यारिणा अदेवर्ण्यपको अक्रोधनं अत्वरं अशीघ्रं त्वरा
हितमित्यर्थः ३९ अत्युष्णमिति अत्युष्णं कोष्णं सर्वं अन्नं स्यात् वाग्यताः भुंजीरन् दात्रा पृष्टाः न हविर्गुणान् हविष्या
न्नस्य गुणान् द्विजातयः न ब्रूयुः ४० यावदिति अन्ने यावत् ऊष्मा भवति यावद्वाग्यताः अश्नंति तावत् पितरः अश्नंति यावत्

म॰स्मृ॰टी॰
४१

हविर्गुणा न उक्ताः ४१ द्वाभ्यामाह यद्गुर्म यद्वेष्टितशिरोऽतिवेष्टितशिराश्चूडाकरैः कौशैवेष्टितशिरा भवति चर्मपादुके उपानहादि सामीप्येनिषिद्धं अश्नतः द्विजान् चांडालादयो इतरान्पश्येरन् यथा तथा भवति व्यर्थं भवतीत्यर्थः होमे शान्त्यादिहोमे गोहिरण्यादिप्रदाने भोज्ये अभ्युदयार्थं भोजने होमे दाने भोज्यं यत् एभिः चंडालादिभिः वीक्ष्यते दैवे वैश्वदेवे ह विधि दर्शपूर्णमासादौ पित्र्ये कर्मणि अयथा तथा गच्छति वृथा गच्छति इत्यर्थः ४२।४३ श्राद्धदूषकानाह द्वाभ्यामाह घ्राणेनेति शूकरः हव्यं कव्यं घ्राणेन हंति नाशयति अवबर्णजः दूषस्पर्शेन दूषयति द्विजातिश्राद्धविषये दातुः प्रेष्यो वा हीनगा

यद्वेष्टितशिरा भुंक्ते यद्भुंक्ते दक्षिणामुखः। सोपानत्कश्च यद्भुंक्ते तद्वै रक्षांसि भुंजते ४२ चंडालश्च वराहश्च कुक्कुटः श्वा तथैव च रजस्वला च षंढश्च नेक्षेरन्नश्नतो द्विजान् ४३ होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते दैवे हविषि पित्र्ये च तत्तद्गच्छत्ययथातथं ४४ घ्राणेन शूकरो हंति पक्षवातेन कुक्कुटः श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजाः ४५ खंजो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः ४६ ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितं ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ४७ सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवि ४८

त्रः अतिरिक्तगात्रः गात्राधिको वा तमपि पुरुषं ततः श्राद्धात् अपनयेत् दूरीकुर्यादित्यर्थः खंज इति खंजः काणः खंडितैकशरीरपदं वा ४५ श्राद्धकाले ब्राह्मणं वा गृहस्थं वा भिक्षुकं वा भोजनार्थं उपस्थितं तदा तैः निमंत्रितैः द्विजैः अनुज्ञातः सन् शक्तितः पूजयेत् भोजयेत् ४७ सार्ववर्णिकमिति अन्नाद्यं वस्तु सार्ववर्णिकं सर्वव्यंजनसहितं वारिणा प्लाव्य प्रोक्षणं सन्नीय मिश्रयित्वा भुक्तवतां अग्रतः तत्रस्थः भुवि विकिरन् संसमुत्सृजेत् एकस्मिन्देशे विकिरन् भुवि न पात्रेषु ४८

राम
४१

असंस्कृत्येषु तित्रिवर्षन्यूनानां असंस्कृतादीनां उच्छिष्टभागधेयं स्यात् यः दर्भेषु विकरः भागधेयं स्यात् आस्मिन् द
ग्धाश्च येनाहाये स्वहा याकुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिं त्यागिनां अविधिना ग्रामत्यागिनां स्वकु
लत्यक्तानां तनावाय: विकरः एतादृशानां पुंसां भागधेयं स्यात् चपुनः उच्छिष्टं भागधेयं स्यात् कुलयोषितां पत्यादिरहि
तानां संबंधेषु दर्भेषु विकरः भागधेयं स्यात् ४९ उच्छेषणमिति उच्छेषणं उच्छिष्टं सारश्चेषं भूमिगतं अन्नदासवर्
गस्यापि अपितृकार्ये तं तु भागधेयं प्रचक्षते कीदृशस्य दासवर्गस्य आजिह्मस्य चपुनः अशठस्य अनलसस्य ५०

असंस्कृतप्रमीतानां त्यागिनां कुलयोषितां उच्छिष्टभागधेयस्यात् दर्भेषु विकरः स्मृपः ४९ उच्छेषणं भूमिगतमजि
ह्मस्याशठस्य च दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ५० असपिंडक्रियाकर्म द्विजातेः संस्थितस्य च
अदैवं भोजयेत् श्राद्धं पिंडमेकं च निर्वपेत् ५१ सहपिंडक्रियायां तु कृतायामस्य धर्मतः अनयैवावृता
कार्यं पिंडनिर्वपणं सुतैः ५२ श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति स मूढो नरकं याति कालसूत्रम
वाक्शिराः ५३ श्राद्धभुक् वृषलीतल्पं तदहर्योऽधिगच्छति तस्याः पुरीषे तन्मासं पितरस्तस्य शेरते ५४

असपिंडेति संस्थितस्य मृतस्य द्विजाते असपिंडक्रियाकर्म सपिंडकरणव्यतिरिक्तं कर्म द्वेपको यं मेधातिथिनानव्या
ख्यातः आ संवत्सरात् नाविधौ अदैवं वैश्वदेवरहितं श्राद्धं भोजयेत् चपुनः एकं पिंडं निर्वपेत् एकोद्दिष्टमित्यर्थः ५१
सहेति एकादशाहं सहपिंडक्रियायां अस्य द्विजस्य धर्मतः अनयैव पार्वणरूपया आवृता परिपाट्या सुतैः और
सादिभिः पिंडनिर्वपनं कार्यं ५२ श्राद्धमिति यः श्राद्धं भुक्त्वा वृषलाय शूद्राय उच्छिष्टं प्रयच्छति सः कालसूत्रं नरकं
अवाक्शिरा अधोमुखः सन् याति ५३ श्राद्धभुगिति तस्याः पुरीषे वृषल्याः तं मासं तस्य श्राद्धभोक्तुः पितरः शेरते ५४

पृष्टेति तृप्ताः स्थ इति पृष्टा तितृप्ताः स्म इति तं ब्रूयुः स्वदितं सुस्वदितं मित्ति वदेत् ततः आचमेत् आचांतः सन् अनुजानीयात्
अनुज्ञां दद्यात् अभिरम्यतां स्वेच्छया अभिरम्यतामस्म इति विसर्गः ते स्वधा इति ब्रूयुः स्वधोच्यतां अस्तु स्वधा स्वधाकारः
पित्र्यकर्मसु परमाशीः ५५ स्वधेति ५६ ततः तेषां भुक्तवतां अन्नशेषं निवेदयेत् तैर्द्विजैः यत् अनुज्ञातं यथा ब्रूयुः तं
था कुर्यात् तद्यथा अन्नशेषं किं क्रियतां तदा तत् यथाइष्टैः सह भुज्यतां इति ५७ पित्र्ये इति पित्र्ये एकोदिष्टे स्वदितं इति एवं
वाच्यं गोष्ठेषु सुश्रुतं अन्नादि अभिवृद्धि सुसिद्धं संपन्नं वा अभ्युदये दैवे रोचितं यथारोचितं ५८ अपराह्ण इति श्राद्धकर्मसु संप

पृष्टाः स्वदितमित्येवं तृप्तानाचमयेत्ततः आचांतांश्चानुजानीयादभितो रम्यतामिति ५५ स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्म
णास्तदनंतरं स्वधाकारः परा ह्याशीः सर्वेषु पित्र्यकर्मसु ५६ ततो भुक्तवतां तेषामन्नशेषं निवेदयेत् यथा ब्रूयुस्त
था कुर्यादनुज्ञातस्तु तैर्द्विजैः ५७ पित्र्ये स्वदितमित्येवं वाच्यं गोष्ठेषु सुश्रुतं संपन्नमित्यभ्युदये दैवे रोचितमित्यपि
५८ अपराह्णस्तथा दर्भा वास्तुसंपादनं तिलाः सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु संपदः ५९ दर्भाः पवित्रं पूर्वाह्णो ह
विष्याणि च सर्वशः पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसंपदः ६० मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं अक्षा
रलवणं चैव प्रकृत्या हविरुच्यते ६१

संपद इत्याह अपराह्णः तथा दर्भाः वास्तुसंपादनं गोमयेनालेपनं दक्षिणाप्रवणं तिलाः सृष्टिः विसर्गः अकार्पण्येन व्यंजनं दीनम
सिंपात्राणां मृष्टिः शुद्धिः अग्र्याः द्विजाः ब्राह्मणाः सर्ववेदेषु अग्र्याः श्रेष्ठाः ५९ दर्भ इति पवित्रं मंत्रः यच्च पवित्रं पूर्वोक्तं स्व
ध्यायादि हव्यसंपदः हव्यं कव्यं कर्माणि संपदः एता उक्तादर्भादिः ६० मुन्यन्नेति पयः क्षीरं सोमलतारसः मांसं अनुपस्कृतं
अप्रतिषिद्धं तरीन्यादि संस्कृतं अक्षारलवणं सैंधवादि एतत्प्रकृत्या स्वभावेन हविः हविष्यान्नं उच्यते ६१ श्री ४

विसृज्येति विसृज्य तान् ब्राह्मणान् नियतः शुचिः वाग्यतः सन् दक्षिणां दिशं आकांक्षन् साभिलाषं पश्यन् पितॄन् इमान् वरान् प्रमाणेन दक्षिणान् याचेत ६२ दातार इति नः अस्माकं दातारः अभिवर्द्धन्तां वेदाश्च वर्द्धन्तां संततिरेव च पुनः संतत्यः वर्द्धन्तां नः अस्माकं श्रद्धा मा व्यागमत् नः अस्माकं बहुदेयं अस्तु इति ६३ अन्नमिति कंचमास्मयाचिस्म कंचन याचेत्यर्थः ६४ एवमिति एवं पिंड निर्वपनं कृत्वा तदनंतरं तान् पिंडान् गां प्राशयेद्ब्राह्मणं कारयेत् विप्रं वा आज्यं वा प्राशयेत् अग्निं वा अग्निमध्ये प्रक्षिपेत् अप्सु वा क्षिपेत् ६५ पिण्डेति केचित्पिण्डनिर्वपनं पुरस्तादेव कुर्वते पयोभिः पक्षिभिः खादयंति अन्ये अनिले वा प्रक्षियंति ६६

विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः दक्षिणां दिशमाकांक्षन् याचेतेमान्वरान्पितॄन् ६२ दातारो नोभिव
र्द्धंतां वेदाः संततिरेव च श्रद्धा च नो माव्यगमत् बहुदेयं च नोस्त्विति ६३ अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचि
तारश्च नः संतु मास्म याचिष्म कंचन ६४ एवं निर्वपनं कृत्वा पिण्डांस्तांस्तदनंतरं गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत्
पिण्डनिर्वपनं केचित्पुरस्तादेव कुर्वते वयोभिः खादयंत्यन्ये प्रक्षिपंत्यनलेप्सु वा ६६ पतिव्रता धर्मपत्नी पितृपूजनत
त्परा मध्यमं तु ततः पिंडमद्यात्सम्यक्सुतार्थिनी ६७ आयुष्मंतं सुतं सूते यशोमेधासमन्वितं धनवंतं प्रजावंतं धार्मि
कं सात्विकं तथा ६८ प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ज्ञातिभ्यः सत्कृतं दत्वा बांधवानपि पूजयेत् ६९

पतिव्रजेति पतिव्रता धर्मपत्नी मध्यमं पिंडं सुतार्थिनी अद्यात् सम्यक् मंत्रवत् ६७ आयुष्मंतमिति आयुर्यशो मेधासमन्वितं एतादृशं सुतं सूते ६८ प्रक्षाल्येति ज्ञातिप्रायं ज्ञातिभ्यः प्रायं भोज्यं सत्कृतं प्रकल्पयेत् ज्ञातिपर्याप्ति गच्छति प्राप्नोतीति
प्रायं कुर्वीत तद् ज्ञातिभ्यः दद्यात् ज्ञातिभ्यः दत्वा पश्चाद्बांधवानपि पूजयेत् ६९

म.स्मृ.टी.
४३

उच्छेषणमिति तावत् उच्छेषणं उच्छिष्टं तिष्ठेत् यावद्विप्रा विविसर्जिता विसर्जयेदित्यर्थः ७० हविरिति यत् हविः चिररात्राय बहुकालपर्यन्ताय तत् आनन्त्याय कल्पते भवति पितृभ्यः यत् विधिवद्दत्तं तत् अशेषतः प्रवक्ष्यामि ७१ तिलैरिति ७२ द्वाविति औरभ्रेण मांसेन मेषस्य मांसेन चतुरः पुमान् तृप्तिर्भवति ७३ षण्मासानिति पार्षतेनाचित्रकेन मृगेण पृषतो

उच्छेषणं तु तत्तिष्ठेत् यावद्विप्रा विसर्जिताः ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितिः ७० हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते पितृभ्यो विधिवत्पितृभ्यो दत्तं तत्प्रवक्ष्याम्यशेषतः ७१ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणां ७२ द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु औरभ्रेणाथ चतुरः शाकुनेनेह पंच वै ७३ षण्मासं छागमांसेन पार्षतेनेह सप्त वै अष्टावेणस्य मांसेन रौरवेण नवैव तु ७४ दशमासांस्तु तृप्यन्ति वाराहमहिषामिषैः शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ७५ संवत्सरं तु गव्येन पयसा पायसेन च वार्ध्रीणसस्य तु मांसेन तृप्तिर्द्वादशवार्षिकी ७६ कालशाकं महाशल्काः खड्गलोहामिषं मधु आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः ७७

तस्य मृगस्य मांसेन एणस्य तस्य मांसेन रौरवेण रुरोः मांसेन ७४ दशेति ७५ संवत्सरमिति वार्ध्रीणसस्य वृषस्य छागस्य पक्षिविशेषस्य मांसेन द्वादशवार्षिकी तृप्तिः स्यात् ७६ कालशाकमिति चेचकः चिंचुकश्चैव कालशाकः प्रकीर्तितः महाशल्कं मत्स्य खड्गं खड्गमांसं लोहामिषं रक्तच्छागभवं वा लोहशब्दो रक्तवर्णवाचकः ७७

राम:
४३

यत्किंचिदिति पितरऊचुः अस्माकं कुले भूयात् त्रयोदशीं त्रयोदश्यां नः अस्माकं मधुसंमिश्रं किंचिद्दद्यात् पायसं
मधुसर्पिर्भ्यां मिश्रं कुंजरस्य प्राक्छाये आसाते अस्माकं कुले भूयात् इति वदंति दद्यात् प्राक्पूर्वस्यादिति गतायां छा
यायां अपराह्णे तत्र श्रीपातिरह कृष्णपक्षे त्रयोदश्यां मघासिंधुके रविः यदा तदा गजच्छायाश्राद्धे पुण्यैरवाप्यते १९ य
दिति यत् यत् विधिवत् पितृणां ददाति तत्तत् पितृणां आनंत्यं अक्षयं भवति २० कृष्णपक्ष इति श्राद्धप्रशस्तास्तिथय

यत्किंचिन्मधुसंमिश्रं प्रदद्यात्तु त्रयोदशीं त्रयोदश्यां नः * तदप्यक्षयमेव स्यात् वर्षासु च मघासु च १८ अपि
नः स कुले भूयात् यो नः दद्यात् त्रयोदशीं पायसं मधुसर्पिर्भ्यां प्राक्छाये कुंजरस्य च १९ यद्ददाति विधिवत्स
म्यक्श्रद्धासमन्वितः तत्पितॄणां भवति परित्राणां त्यमक्षयं २० कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं श्रा
द्धे प्रशस्तास्तिथयो यथैता न तथेतराः २१ युग्मे कुर्वन् दिनर्क्षेषु सर्वान्कामान्समश्नुते अयुग्मे तु पितॄन
र्च्यन् प्रजां प्राप्नोति पुष्कलां २२ यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा श्राद्धस्य पूर्वाह्णादपराह्णो
विशिष्यते २३ प्राचीनावीतिना सम्यक् अपसव्यमतंद्रिणा पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना २४

एताः तथा एतराः २१ युग्मे कुर्वन्निति युग्मासु द्वितीयादितिथिषु दिनर्क्षेषु भरण्यादिषु यः श्राद्धं कुर्वन् नरः सर्वान्का
मान् अश्नुते प्राप्नोति अयुग्मेषु अयुग्मासु प्रतिपदाश्विन्यादिषु नक्षत्रेषु मः पितॄन् अर्चयन् सः पुष्कलां बहु प्रजां संततिं
प्राप्नोति २२ यथेति पूर्वपक्षात् शुक्लपक्षात् यथाऽपरपक्षः विशिष्यते तथा श्राद्धस्य पूर्वाह्णकालात् अपराह्णकालः विशि
ष्यते अपराह्णः पितॄणामिति श्रुतेः आषाढ्याः पंचमः पक्षः आषाढीमवधिं कृत्वा परः पक्षः कृष्णपक्षस्य आश्विनस्य २३ प्रा

श्रा
८८
गा
ची

रात्राविति सूर्ये अचिरोदिते प्रथमोदिते संगवे काले वा ८५ कुर्वन्निति ८६ यस्त्विति ८७ अष्टम्यामिति एकादश्यामिति ८८ ज्ञातीति अ
स्यां चतुर्दश्यां ये शस्त्रहताः पितरः ते प्रीयंते ९० शाकलः युवानस्तु म्रियंते काले मोद्रिके न वै द्विजाः तेषां श्राद्धं चतुर्दश्यां नान्येषां
तु कदाचन १ अस्यार्थः अन्येषां ज्वरादीनां मृतानां चतुर्दश्यां श्राद्धं न कार्यं किंतु तत्त्रिधा चैवं वा प्रोक्तः कामाग्निना च दह्यं

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ८५ कुर्वन्प्रतिपदि श्राद्धं स्वरूपां लभ
ते प्रजां कन्यकां श्च द्वितीयायां तृतीयायां तु वाजिनः पशून्क्षुद्रांश्चतुर्थ्यां तु पंचम्यां शोभनान्सुतान् षष्ठ्यां द्यूतमवा
प्नोति सप्तम्यां लभते कृषिं ८७ अष्टम्यामपि वाणिज्यं लभते श्राद्धदो नरः नवम्यां वै चैकशफान् दशम्यां द्विखुरान्ब
हून् ८८ एकादश्यां तथा रौप्यं ब्रह्मवर्चस्विनः सुतान् द्वादश्यां जातरूपं च रजतं कुप्यमेव च ८९ ज्ञातिश्रैष्ठ्यं त्रयोद
श्यां चतुर्दश्यां तु कुप्रजाः प्रियंते पितरश्चास्य ये च शस्त्रहता रणे ९० पक्षाद्यादिषु निर्दिष्टान् विपुलान्मनसः
प्रियान् श्राद्धदः पंचदश्यां च सर्वान्कामान्समश्नुते ९१ अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् हेमंते ग्रीष्मव
र्षासु पंचयज्ञीयमन्वहं ९२

ते ये युवानः कदाचन तेषां हि पितृपिंडं च मृतानामपि विनिर्वपेत् स्त्रीमप्येवमेकं स्यात् कामाशनाग तथि वाः तासां श्राद्धं हि मृता
नां प्रसूत्यामरणां यदि पक्षेतिपदाद्यादिषु पक्षादिः आदिर्येषां ताः पक्षाद्यादयः तासु पक्षादिषु तिथिषु प्रतिपदाद्यासु पंच
दश्यां अमायां श्राद्धदः सर्वान्कामानवाप्नोति ९१ अनेनेति अब्दस्य मध्ये त्रिवारं हेमंतग्रीष्मवर्षासु श्राद्धं निर्वपेत्
पंचयज्ञीयं श्राद्धं अन्वहं प्रत्यहं कुर्यात् अयं नित्यः संवत्सरस्य विधिः अनाहिताग्नेः ९२

नेति लौकिकाग्नौ स्मार्तेग्नौ ये अत्रयज्ञेयः अग्नौ करणहोमेन विधीयते आहिताग्नेः अग्निहोत्रिणः द्विजन्मनः दर्शेन विना श्राद्धं न दर्शे येऽधिकारो नान्यत्रेत्यर्थः ८३ यदेवेति ८४ वसूनिति पितृपितामहप्रपितामहान् वसुरुद्रादित्यस्वरूपान् वदंति एषा श्रुतिः सनातनी तद्यथा हे पितः वसुरूप हे पितामह रुद्र हे प्रपितामह आदित्य ८५ विघसेति विघसं भुक्तशेषं श्राद्धभुक्तावशेषं पंचयज्ञशेषं अमृतं भवतीत्यर्थः ८६ एतदिति द्विजातीनां ब्राह्मणक्षत्रियविशां एतेषां पृथक् २ मुख्यवृत्तीनां विधानं लक्षणं श्रूयतामिति ८७ इति श्रीमानवधर्मशास्त्रे रामचंद्रकृत टीकायां श्राद्धप्रकरणं तृतीयं अथ गृहस्थधर्मीनाह

न पैत्रियज्ञियो होमो लौकिकाग्नौ विधीयते दर्शेन विधिना श्राद्धमाहिताग्नेर्द्विजन्मनः ८२ यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलं ८४ वसून्वदंति पितॄन् रुद्रांश्चैव पितामहान् प्रपितामहांस्तथादित्यांश्रुतिरेषा सनातनी ८५ विघसाशी भवेन्नित्यं नित्यं द्विजातिमुख्यजातीनां वामृतभोजनः विघसं भुक्तशेषं तु यज्ञशेषं यथामृतं ८६ एतद्वो विहितं सर्वं विधानं पांचयज्ञियं ॥ द्विजातिमुख्यजातीनां विधानं श्रूयतामिति ८७ इति श्रीमानवधर्मशास्त्रे तृतीयोऽध्यायः ३ चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः द्वितीयमायुषो भागं कृतदारो गृहे वसेत् १ अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि २

आयुषः आद्यं चतुर्भागं पंचविंशतिवर्षपर्यंतं गुरौ गुरुसमीपे अधिवासित्वा वेदाध्ययनं कृत्वा आयुषः द्वितीयभागं प्राप्य कृतदारः सन् वसेत् १ अद्रोहेणेति भूतानां द्रोहेणैव दुःखानुत्पादनेन या वृत्तिः तां वृत्तिं समास्थाय अनापदि जीवेत विप्रः अल्पद्रोहेण स्वल्पं याचितव्यं एकोऽल्पद्रोहे यावृत्तिर्वा २ प्राणयात्रेति अगर्हितैः स्वैः कर्मभिः शरीरस्य अक्लेशेन धनसंचयः धनसंग्रहं कुर्वीत प्राणयात्रा प्राणधारणमात्रं यथा भवेत् तथा कुर्यात् ऋतेति द्वाभ्यामाह ऋतमृताभ्यामाह वा जीवेत् अमृतं कृत्या

वामृतेन वृत्त्या वा प्रमृतवृत्त्या वा सत्यानृताभ्यां वा श्ववृत्त्या कदाचन न जीवेत् न भोगार्थं ४ एतद्वृत्तीनां लक्षणमाह ऋतसंज्ञं ५ सत्यानृ
तं सत्यं च अनृतं च सत्यानृतं वाणिज्यं श्ववृत्तिं सेवा कष्टेषु युक्तादिना आख्याता तस्मात्तां सेवां परिवर्जयेत् ६ कुशूलमन्तिर्कं
कोष्ठकं कुंभी उष्ट्रिका कुशूलं धान्यको वा स्यात् कुंभीधान्यो वा स्यात् स्वकुटुंबयोग्य द्वादशाहमत्र पर्याप्तान्नः कुशोदः धान्या
धिकरणं मूलः कोष्ठः कुशूलधान्यः स्वकुटुंबपोषणे द्वादशाहमत्रपर्याप्तान्नः कुशोद धान्याधिकरणं मूलः कोष्ठः कुशूल

प्राणयात्राप्रसिध्यर्थं स्वैः कर्मभिरगर्हितैः अक्लेशेन शरीरस्य कुर्वीत धनसंचयं ऋतामृताभ्यां जीवेत मृतेन प्रमृ
तेन च सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ४ ऋतमुञ्छशिलं ज्ञेयं अमृतं स्यादयाचितं मृतं तु याचितं भै
क्ष्यं प्रमृतं कर्षणं स्मृतं ५ सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ६
कुशूलधान्यको वा स्यात् कुंभीधान्यक एव च त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ७ चतुर्णामपि तेषां हि द्विजा
नां गृहमेधिनां ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः ८ षट्कमैको भवत्येषां त्रिभिरन्यः प्रवर्तते द्वाभ्या
मेकः चतुर्थस्तु ब्रह्मसत्रेण जीवति ९

धान्यः स्वकुटुंबपोषणे पर्याप्तान्नं वर्षपर्यंतं स कुंभीधान्यः उष्ट्रिकावरणमसिनि षण्मासपर्याप्तः अहपर्याप्तान्नमस्यास्तीति त्र्यहैहि
कः श्वोभवं धान्यादि श्वस्तनं न विद्यते श्वस्तनं यस्यासौ अश्वस्तनिक एव वा भवेत् ७ तेषां चतुर्णां कुशूलकादीनां मध्ये वा एके
कः द्विजीनां मध्ये परः पयः पापावरः उत्कृष्टः श्रेयः ८ वर्णानां वृत्तिमाह एषां कुशूलधान्यकादीनां मध्ये वा एकः ब्राह्मणः
षट्कर्मा कार प्रतिल १ अयाचित २ मृत याचितं ३ प्रमितं कर्षणं ४ वाणिज्यं ५ स्वेषा स्ववृत्त्या भवेत् त्रिभिर्जीवेत प्रतिग
हादि षट्कर्माणि अध्ययनदानयजनादि

मित्र्या वैश्यः द्वाभ्यां वृत्तिभ्यां गोरक्षावाणिज्याभ्यां षष्ठो जीवेत् चतुर्थः एकः सत्यव्रह्मसत्रेण ब्राह्मणानां वा त्रैवर्णिकानां वा सेवारूपेण वृत्त्या जीवति शूद्रस्तु द्विजसेवया इति योगीश्वरः कर्मरित्याह इत्या यागादि अध्ययनं वा कुर्यात् कारजन नं पाय्या जनेद्दा नप्रतिग्रहं वा एतानि यं वा शूद्रस्तु द्विजसेवया एकवृत्त्या ९ शिलोंछाभ्यां वर्तयन् शालयादिसत्रेनियाति पश्चुयगः प्रातिपदेष्ठी नित्यर्षः १० नेति लोकवृत्तेन वर्तेतेत लोकानुकरणं न वर्तेत अजिह्मां अवक्राशठां परवंचनरहितां पतितादिसंबंधशून्यां एतादृशीं जीविकां ब्राह्मणः जीवेत् ११ संतोषेति अहेतुकाख्यस्तनदाधार्ष्यं प्रसंख्यानामि दमाह सुखार्थी विपर्ये: असंतोषं दुःखमूलं हेतुः अन्यतमया इत्यादृष्टं मयाकर्तव्या इति एकया वृत्त्या द्विजः

वर्तयंश्च शिलोंछाभ्यामग्निहोत्रपरायणः। इष्टीः पर्वाः पर्णांतीयाः केवलां निर्वपेत्सदा १० न लोकवृत्तं वर्तेत वृत्तिहेतोः कथंचन। अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकां ११ संतोषं परमास्थाय सुखार्थी संयतो भवेत्। संतोषमूलं हि सुखं दुःखमूलं विपर्ययः १२ अतोऽन्यतमया वृत्त्या जीवेस्नातको द्विजः। स्वर्ग्यायुष्यप्रदास्यानि व्रतानीमानि धारयेत् १३ वेदोदितं स्वकं कर्म स्वाश्रमोचितं नित्यं कुर्यादतंद्रितः। तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिं १४ नेहेतार्थान्प्रसंगेन न विरुद्धेन कर्मणा। न कल्पमानेष्वर्थेषु नान्यादपि यतस्ततः १५ इंद्रियार्थेषु सर्वेषु न प्रसज्येत कामतः। अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् १६

जीवेत् तथा एतानि व्रतानि नियमानि धारयेत् वक्ष्यमाण लक्षणानि धारयेत् १३ वेदोदितं स्वकं कर्म स्वाश्रमोचितं कर्म कुर्यात् १४ प्रसंगेन गतिप्रसंगेन अर्थं। न ईहेत न इच्छेत् विरुद्धेन कर्मणा अयाज्ययाजनादिना अर्थं न ईहेत अन्यमपि अर्थं न ईहेत इतस्ततः अविहिताचारात् पतितात् न ईहेत कल्पमानेषु अर्थेषु विद्यमानेषु अर्थेषु न ईहेत् १५ सर्वानिति स्वाध्याय विरोधिनः वेदाध्ययनविरोधिनः इंद्रियार्थेषु शब्दादिषु एतेषां इंद्रियाणां प्रशक्तिं मन्निवर्तयेत् १६

यथातथा आपदि अध्यापनपयः यथाविषयः कर्म आचरन् विचरेत् कर्मणां यथाकर्म आचरन् विचरेत् सुतस्य लब्ध्य श्रुतस्य यथा अभिजनस्य च यथा कौलिनस्य विषयः यथाविष वाक्यथो वाक् बुद्धि यथा बुद्धिसारूप्यं यथा बुद्धि आचरन् विचरेत् १८ नित्यं शास्त्राणि अवेक्षेत कीदृशानि शास्त्राणि धन्यानि दुःखनिवृत्तकानि विचारयेत् च पुनः वैदिकान् निगमान् व्याख्यानमिति १९ यथेति विज्ञानं विवेकज्ञानं २० ऋषियज्ञमिति ऋषियज्ञं वेदाध्ययनं देवयज्ञं होमं भूतयज्ञं भूतेभ्यो बलिं

सर्वाणि परित्यजेदर्थान् स्वाध्यायस्याविरोधिनः यथातथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता १७ वयसः कर्मणोर्थस्य सुतस्य स्वजनस्य च वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह १८ बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च नित्यं शास्त्राणि चेक्षेत निगमांश्चैव वैदिकान् १९ यथा यथा हि पुरुषः शास्त्रं समधिगच्छति तथा तथा विजानाति विज्ञानं चास्य रोचते २० ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् २१ एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः सततं मिंद्रियेष्वेव जुह्वति २२ वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा २३ वाचि प्राणे च पश्यंतो यज्ञनिर्वृत्तिमक्षयां २३ ज्ञानेनैवापरे विप्राः यजंते तैर्मखैः सदा ज्ञानमूल क्रियामेषां पश्यंतो ज्ञानचक्षुषा २४

नृयज्ञं अतिथिसत्कारं पितृयज्ञं श्राद्धं यथाशक्ति न हापयेत् २१ एतानिति एतान्महायज्ञान् एके जनाः अनीहमानाः योगिनः सततं इंद्रियेषु विषयान् चांडवर्जान् जुह्वति वाच्येक इति वाच्येके स्वाध्यायसमये प्राणं प्राणवायुं प्राणे प्राणायामसमये वाचं वा गां ह्यं भाषमाणे जुह्वमीति नेववर्षाणि प्राणं जुहोमीति एतावत्तैव पंचयज्ञानि वर्तानि भवंति पंचाग्न्युपासनाको स्मृत ह्यतोपि सारेण अक्षया च पुनः वाचि प्राणे यज्ञनिर्वृत्तिसामग्रीं अक्षयां सदा पश्यंतः २३ ज्ञानेनेति ज्ञानेनैवापरे विप्राः तैः पं

चमहामखेः यज्ञैः पर्यंते एषां योगिनां ज्ञानमूला क्रिया ज्ञानचक्षुषा पश्यंतः ज्ञानं मूलं अस्य क्रियायाः सर्वस्य कर्मानुष्ठानस्य २५
अग्निहोत्रमिति श्रुतिशेषः आद्यंते प्रातः सायं काले अग्निहोत्रं जुहुयात् दर्शेन दर्शसंज्ञेन कालेन मासांते अमायां पौर्णमा
स्येन कलेन सस्यांते इति २५ सस्यांते सस्यच्छेदे सस्यान्तं धान्यस्यांते नो अध्वरैः चातुर्मास्यैः अंते चातुर्मास्यैः ते उदगयने द
क्षिणायन अयनस्यांते पशूर्णां पशुयागः कर्तव्यः समांते संवत्सरांते सौमिकैर्मखैः सोमपानसंज्ञैः आग्निमन्यपते सोमपाण
क्रियतेसः २६ नादिष्ट्वेति नवसस्येष्ट्या अग्निमान् द्विजः पशुना यमुयागेन अनिष्ट्वा पश्चात् अकृत्वा नवान्नम् अ

अग्निहोत्रं च जुहुयादाद्यंते द्युनिशोः सदा दर्शेन चार्द्धमासांते पौर्णमासेन चैव हि २५ सस्यांते नवसस्याद्या
तथान्ते द्विजोध्वरैः पशुनांत्वयनस्यांते समांते सौमिकैर्मखैः नानिष्ट्वा नवसस्याद्यान् पशुना वाग्निमा
न् द्विजः नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः २७ आश्नाशनशय्याभिरद्भिर्मूलफलेन वा नास्य
कश्चिद्वसेद्गेहे शक्तितो नार्चितोतिथिः २८ पाखंडिनो विकर्मस्थान् वैडालव्रतिकान् शठान् हैतुकान्
वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् २९ वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः पूजयेद्धव्य
कव्येन विपरीतांस्तु वर्जयेत् ३० शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ३२

अद्यात् २७ आसनेति आसनादिभिः अनर्चितः अतिथि
र्यात् तथा मांसं न अद्यात् दीर्घआयुः जिजीविषुः अकृत्वा न अद्यात् वाङ्मात्रेणापि न अर्चयेत् युक्तिवलेन सर्वत्र संशयकारी हैतुकः तान्व
कस्यचिद्गेहे न वसेत् २८ पाखंडिन इति पाखंडादीन् वाङ्मात्रेणापि न अर्चयेत् ... शक्तित इति अयाचमानेभ्यः ब्रह्मचारिसंन्यासिभ्यः भूतेभ्यः प्राणिभ्यः शु
कवत् वृत्तिर्वर्तनं यस्य सः ३० वेदविदिति शक्तित इति अयाचमानेभ्यः कुटुंबस्य पीडा यथा न भवेत् गृहमेधिना तथा दातव्यं ३२
शक्तितो यावान्ति ... संविभागः तावत्कर्तव्यः अनुपरोधतः कुटुंबस्य पीडा यथा न भवेत्

राजतेति इति स्नातकः वेदस्नातकः विद्यास्नातकः व्रतस्नातको वा क्षुधा संसीदन् राजतः कृताभिषेकः तस्य राज्ञः अन्विषेत धनं इच्छेत् गृहं कुर्याद्वा क्षत्रियस्य प्रतिवेध याज्यः यस्य संस्कारितवान् तस्मात् अंतेवासो शिष्यस्तस्मात् अन्यतः शकाशात् धनं नेच्छेत ३३ नेति स्नातकः विप्रः क्षुधा न सीदेत कीदृशो विप्रः शक्तः विद्यया परिपूर्णः ३४ क्लृप्तेति क्लृप्ताः कृता केशानखानि श्मश्रूणि यस्य सः क्लृप्तकेशानखश्मश्रूः तपा योगीश्वरः नीवश्म सुचश्रुरुचिः शुचिः अंत

राजतो धनमान्विच्छेत् संसीदन् स्नातको द्विजः याज्यांतेवासिनेवापि न त्वन्यत इति स्थितिः ३३ न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथंचनः न जीर्णमलवद्वासा भवेच्च विभवे सति ३४ क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लांबरः शुचिः स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ३५ वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुं यज्ञोपवीतं वेदं च शुभे रौक्मे च कुंडले ३६ नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन नोपसृष्टं न वारिस्थं न मध्ये नभसो गतं ३७ न लंघयेद्वत्सतंत्रीं च प्रधावेच्च न वर्षति न चोदके निरीक्षेत स्वरूपमिति धारणा ३८ मृद्गोदैवतविप्राज्यं मधुचतुःपथं प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीं ३९

वां हिंस्र आत्महितेषु लब्धाहारादिषु ३५ वैणवीमिति यज्ञोपवीतं धारयेत वेदं दर्भमुष्टिं धारयेत चपुनः शुभे रौक्मे कुंडले धारयेत ३६ नेक्षेत उदयं प्राप्तं आदित्यं न ईक्षेत न दृक्षेत उपसृष्टं राहुग्रस्तं वारिस्थं चपुनः नभसः मध्ये गतं आदित्यं न ईक्षेत ३७ नेति वत्सरीं वत्सबंधनरज्जुं न लंघयेत चपुनः वर्षति सति न प्रधावेत् चपुनः उदके स्वरूपं प्रतिबिंबं नानिरीक्षेत इति धारणा मर्यादा ३८ मृद्गमिति मृद्गादि प्रदक्षिणानि कुर्वीत कुर्यात् ३९

३

नेति प्रमत्तोपि आर्तवदर्शने ऋतुमतीं स्त्रियं न उपगच्छेत् तया ऋतुमत्या सह समानाशने एकशय्यायां नाशयीत ४० रजसेति रजसाभिप्लुतां नारीं ऋतुमतीं तेजः प्रज्ञादि महीयते ४१ तामिति तां रजसाभिप्लुतां वर्जयतः तस्य प्रज्ञादिकं वर्द्धते ४२ नाश्नीयादिति भार्यया सार्द्धं नाश्नीयात् स्त्रियं अश्नंतीं भोजनं कुर्वतीं न ईक्षेत क्षुतं कुर्वतीं यथासु

नोपगच्छेत्प्रमत्तोपि स्त्रियमार्तवदर्शने समानशयने चैव न शयीत तया सह ४० रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ४१ तां विवर्जयतस्तस्य रजसा समभिप्लुतां प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्द्धते ४२ नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीं क्षुवतीं जृंभमाणां च न चासीनां यथासुखं ४३ नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृतां न पश्येत्प्रसवंतीं च तेजस्कामो द्विजोत्तमः ४४ उपेतः स्नातको विद्वानेच्छेन्नग्नां परस्त्रियं सरहस्ये च संवादं परस्त्रीषु विवर्जयेत् ४५ नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे न फालकृष्टे न जले न चित्यां न च पर्वते न जीर्णदेवायतने न वल्मीके कदाचन ४७ न ससत्वेषु गर्तेषु न गच्छन्नपि वा स्थितः न नदीतीरमासाद्य न च पर्वतमस्तके ४८

सुखं आसीनां न ईक्षेत ४३ नेति तेजस्कामः द्विजः अंजयंतीं स्वके नेत्रे न ईक्षेत् अभ्यक्तां तैलाभ्यक्तां अनावृतां वस्त्रैः प्रसुवंतीं पुत्रं स्तनं पाययंतीं न ईक्षेत् ४४ उपेतेति उपेत्य स्नातकः विद्वान् नग्नां परस्त्रियं न ईक्षेत न दृश्येत ४ नान्नमिति एकवासा अन्नं न अद्यात् न मस्नयेत् ४६ नेति फालकृष्टे हलोत्कृष्टे क्षेत्रे मूत्रपुरीषे न कुर्यात् ४७ नेति द्वाभ्यामाह ससत्वेषु सजीवेषु गर्तेषु विड्मूत्रस्य विसर्जनं कुर्यात् ४८

वाधीति ४८ तिरस्कृत्येति पुरीषोत्सर्गमाह काष्ठंवापात्रंवालोष्ठं तृणानिवातिरस्कृत्यप्रसार्यउच्चरेत् पुरीषंकुर्यात् ४९
वाचंनियम्यसंप्रवीतांगः अवगुंठितांगः शिरोवेष्टनंकुर्यात् ५० मूत्रोच्चारेति संध्ययोर्यथापादिवोउदङ्मुखंकुर्यात्
५१ छायायामिति छायायांगृहमेघादिछायायांप्राणबाधाभयेषुच यथासुखंकुर्यात् ५२ प्रत्यग्निमिति प्रति
गंअभिमुखंप्रतिवादंवायोः अभिमुखं मेहतः मूत्रादिकुर्वतः प्रज्ञावुद्धिर्नश्यति ५३ अथाग्निविधिमाह नाग्निमि

वाय्वाग्निविप्रमादित्यमपःपश्यन्तथैवच नकदाचनकुर्वीतविण्मूत्रस्यविसर्जनं ४८ तिरस्कृत्योच्चरेत्
काष्ठंपत्रंलोष्ठंतृणानिच नियम्यप्रयतोवाचंसंवीतांगोवगुंठितः ५० मूत्रोच्चारसमुत्सर्गंदिवाकुर्या
दुदङ्मुखः दक्षिणाभिमुखोरात्रौसंध्ययोश्चयथादिवा ५१ छायायामंधकारेवारात्राबहनिचद्विजः
यथासुखमुखःकुर्यात्प्राणबाधाभयेषुच ५२ प्रत्याग्निंप्रतिसूर्यंचप्रतिसोमोदकद्विजः प्रतिगुं
प्रतिवातंचप्रज्ञानश्यतिमेहतः ५३ नाग्निंमुखेनोपधमेन्नग्नांनेक्षेतचस्त्रियं नामेध्यंप्रक्षिपेदग्नौ
नचपादौप्रतापयेत् ५४ अधस्तान्नोपदध्याच्चनचैनमभिलंघयेत् नचैनंपादतःकुर्यात्प्राणबा
धांसमाचरेत् ५५ नाश्नीयात्संधिवेलायांनगच्छेन्नापिसंविशेत् नचैवप्रलिखेद्भूमिंनात्मनोपहरेत्स्रवं ५६

मितिमुखेननलिकाद्यंतरेणअग्निंनधमेत् अग्नौपादौनप्रतापयेत् ५७ अधस्तादिति अधस्तान्नउपदध्यात्पदस्य
अधस्तात् अग्निंदध्यात् एनंअग्निंनलंघयेत् एनंअग्निंपादतःपादस्यअधस्तात्नकुर्यात् नप्राणबाधामाचरेत्
रोगादिहेतुभूतंप्राणबाधंआचरेत् संधिवेलायांसंध्यायांनअश्नीयात् नभोजनंकुर्यात् संध्यायांनगच्छेत् सं
ध्यायांनसंविशेत् भूमिंपादनखेननलिखेत् आत्मनःसिरसास्रजंनउपहरेत् ५६

नेति अप्सु जलमध्ये मूत्रादिकं न समुत्सृजेत् अमेध्यविष्ठादिलिप्तं न लोहितं रुधिरं विषाणि वा अप्सु न क्षिपेत् ५७ शून्यागारे श्रेयं श्रेष्ठं वयोधिकं न प्रबोधयेत् उदक्या रजस्वला या न अभिभाषेत आवृतः वहवस्त्राणि परिधाय अनाहूतः यज्ञं न गच्छेत् ५८ अग्नेति अग्न्यागारादिस्थाने दक्षिणं पाणिं उत्तरीयाद्बहिः उद्धरेत् ५९ नेति अस्य विधयंतीं धापयंतीं गां न निवारयेत् नाचक्षीत न प्रकाशयेत् ६० नेति नेति ग्रामे अधार्मिके देशे अंगवंगादिदेशे न वसेत् ६१ न शूद्रेति पाषंडिजनाक्रांते आकीर्णे न वसेत् अंत्यजैर्नृभिः सह उपसृष्टे मिलिते न वसेत् ६२ नेति उद्धृतस्नेहे उद्धृतसा

नाप्सु मूत्र पुरीषं च ष्ठीवनं न समुत्सृजेत् अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ५७ नैकः स्वप्यात्स्न्यगृहे श्रेयांसं न प्रबोधयेत् नोदक्ययाभिभाषेत यज्ञं गच्छेन्न चावृतः ५८ अग्न्यागारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ५९ न वारयेद्गां धयंतीं न चाचक्षीत कस्यचित् न दिवींद्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः ६० नाधार्मिके वसे ग्रामे न व्याधिबहुले भृशं नैकः प्रपद्येताध्वानं चिरं पर्वते वसेत् ६१ न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते न पाषंडिजनाक्रांते नोत्सृष्टे चांत्यजैर्नृभिः ६२ न भुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् नातिप्रगे नातिसायं नातिमध्यं दिने स्थिते ६३ न कुर्वीत वृथाचेष्टं न वार्यंजलिना पिबेत् नोत्संगे भक्षयेद्भक्ष्यं न जातु स्यात्कुतूहलं ६४

रं न भुंजीत अतिसौहित्यं अत्यशनं नाचरेत् अतिप्रगे संगवे न भुंजीत अतिशायं नक्षत्रदर्शन पर्यंतं न भुंजीत राशितः प्रातर्भुक्त्वा सायं भुंजीत न सायंकालादनंतरं भुंजीतेत्यर्थः ६३ नेति वृथाचेष्टां दृष्टयोः व्यापारयोरनुपस्कारः वृथा नदः न कुर्वीत जातु कदाचिदपि कुतूहली परिहासं न भवेत् ६४

म॰स्म॰टी

४६

नेति च पुनः नक्ष्वेडेत् न वन लं शब्दकरणं न क्रीडेत् च पुनः रक्तः स्त्रियासह विकृतशब्दं न विरायेत न कुर्यात ६५ नेति भिन्नभाण्डे स्फुटितकांस्यभाजने न भुंजीत न भावप्रतिदूषिते दुष्टत्वेनाकास्ये दे भाण्डे न भुंजीत ६६ उपानहौ वेति च पुनः करकमेव अन्यस्य जलपात्रं न धारयेत ६७ नेति अविनीतैः ध्वजैः अश्वैर्वा वृषैर्वा न ब्रजेत च पुनः क्षुध्याधिपीडितैः यानै र्न व्रजेत् ६८ विनीतैरिति प्रतोदेन अनुद्वेजनशीघ्रगैरित्यर्थः ६९ वालेति पुनः व्याजायत्वं आपायमष्टूडयत्वेन वाला

न नृत्येन्नैव गायेच्च न वादित्राणि वादयेत् नवास्फोटेन्न चक्ष्वेडेन्न च रक्तो विरावयेत ६५ न पादौ धावयेत्कांस्ये कदाचिदपि भाजने न भिन्नभाण्डे भुंजीत न भावप्रतिदूषिते ६६ उपानहौ च वस्त्रं च धृतमन्यैर्न धारयेत् उपवीत मलंकारं स्रजं करकमेव च ६७ नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुध्याधिपीडितैः न भिन्नशृंगाक्षिखुरैर्न वालाधिविरूपितैः ६८ विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः वर्णरूपोपसंपन्नैः प्रतोदेन तुदन्भृशं ६९ वालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनं श्रीकामो वर्जयेन्नित्यं मरणमये चैव भोजनं ७० नाछिंद्यान्न खरोमाणि दंतैर्नोत्पाटयेन्नखान् न मल्लोष्टं च अश्नीयान्न सिंघात्करजैस्तृणं न कर्म निःफलं कुर्यान्नायत्यमसुखोदयं ७१ लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ७२

पः नखरोमाणि दंतैर्न छिंद्यात ७० नेति अपत्यं उत्तरकाले यत् असुखं कर्म तत् न कुर्यात ७१ लोष्टेति मलक दैमः मत्संबंधिनः लोष्टस्य चकः परापकारहेतवा कूपप्रयोक्ता ७२ विगृह्य प्राणवधादिवा लौकिकेषु शास्त्रेषु कप्यानकुर्ती विध्यंतेगवीपष्टे वृषभानां पृष्ठे सर्वेषयोनीवीनासात गवारोहणं प्राविगर्हितं तथैव हिमाल्पं पश्चप

राम॰

४६

गंधोऽस्तीति १३ अद्वारेणेति ग्रामं वा वेश्म वा वृत्तं वेष्टितं कोटिरूपं एतादृशं अद्वारेण अनीयान् विशेदित्यर्थः १४
नेति न अस्तैः क्रीडेत् अस्त्रग्रहणं शलाकादिना विभवे सति स्वयं उपानहौ न हरेत् हस्तेन न आनयेत् इत्यर्थः दंडादिना
आनयेत् १५ सर्वमिति सर्वं तिलसंबद्धं अस्तमयं प्रतिवृत्तौ न अधात् न भक्षयेत् १६ आर्द्रपाद इति आर्द्रपादस्तु
ग्निश्च येन भुंजीत भोजनं कुर्यात् आर्द्रपादः कदाचन न शयीत शयनं न कुर्यात् पंचार्द्रो भोजनं चरेत् १७ अचक्षुरिति

न विगर्ह्यकथाः कुर्यात् बहिर्माल्यं न धारयेत् गवां च यानं पृष्ठेन सर्वथैव विगर्हितं १३ अद्वारेण च नातीयान् ग्रा
मं वा वेश्म वावृत्तं रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् १४ नाक्षैः क्रीडेत् कदाचित्तु स्वयं नोपानहौ हरेत् श
यनस्थो न भुंजीत न पाणिस्थं न चासने १५ सर्वं च तिलसंबद्धं नाद्यादस्तमये प्रति न च नग्नः शयीतेह न
चोच्छिष्टः क्वचिद्व्रजेत् १६ आर्द्रपादस्तु भुंजीत न शयीत कदाचन आर्द्रपादस्तु भुंजानो दीर्घमायुरवाप्नुया
त् १७ अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् १८ अधितिष्ठे
न्न केशांस्तु न भस्मास्थिकपालिकाः कार्पासास्थि तुषांगारान् दीर्घमायुर्जिजीविषुः १९ न संविशेच्च पतितै
र्न चांडालैर्न च पुष्कसैः न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः २०

अचक्षुरविषयं दृष्टं दुर्गं वा दुर्गारोहणं न प्रपद्येत १८ अधितिष्ठेदिति केशमध्ये दीर्घमायुर्जिजीविषुः न अधितिष्ठे
दित्यापि स्तेयं १९ नेति पतितैः सह न संविशेत् चांडालैः ब्राह्मण्यां शूद्राज्जातः चांडालः तैः सह न संविशेत् चांडा
लपुष्कसश्चांत्यैः कैवर्तादिभिः अंत्यावसायिभिः सूतमागधादिभिः एतैर्जातिभेदैः सह न संवसेत् इत्यभेदः रजक
श्च चर्मकारश्च नटो वरुड एव च कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः अस्पार्शः वरुडः सर्पकारः इति जातिसंज्ञा २०

नेति शूद्राय मतिं सन्मतिं नीतिशास्त्रादिविषयं न दद्यात् उच्छिष्टं अतिशेषः भोजोच्छिष्टं भुक्तोच्छिष्टस्य हविषः हविः कृतं
न देवनिमित्तं पुरोडाशादि शूद्राय न च पुनः अस्य शूद्रस्य व्रतं प्रायश्चित्तं नादि ८० यस्त इति यः अस्य शूद्रस्य धर्मं समा
चष्टे यः व्रतं दिशति सः असंवृतं नाम तमः नरकं तेनैव सह मज्जति ८२ उच्छिष्टः सन्नेतत् शिरः न स्पृशेदित्यर्थः
८४ नेति अराजन्यप्रसूतितः न राजन्यः सोद्भवः तस्य अक्षत्रवंशप्रसूतितः राज्ञः सकाशात् प्रतिग्रहं न गृह्णीयात्

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविः कृतं न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ८० यो ह्यस्य धर्ममाचष्टे
यश्चैवादिशति व्रतं असंवृतं नाम तमः सह तेनैव मज्जति ८१ न संहताभ्यां पाणिभ्यां कण्डूयेनात्मनः शिरः न स्पृ
शेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः ८२ केशग्रहान् प्रहारांश्च शिरस्येतानि वर्जयेत् शिरःस्नातस्तु तैले
न नांगं किंचिदुपस्पृशेत् ८४ न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः सूनाचक्रध्वजवतां वेशेनैव
तु जीवितां ८५ दशसूनासहस्राणि यो वाहयति सौनिकः तेन तुल्यं समश्चक्री दशं चक्रीसमो ध्वजी दश
ध्वजसमा वेश्या दशवेश्यासमो नृपः ८६ दशसूनासहस्राणि यो वाहयति सौनिकः तेन तुल्यः स्मृतो राजा तस्य
प्रतिग्रहः ८७ यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः स पर्यायेन जातीमान्नरकानेकविंशति ८८

सूनो हिंस्रः चक्री तैलिकः ध्वजः मद्यकर्ता एतेषां वेशेनैव जीवतां प्रतिग्रहं न गृह्णीयात् ८५ दशेति चक्री
तैलिकः दशशूनासमध्वजः सुराविक्रयी ८६ दशेति दशसूनासहस्राणि यः वाहयति तेन तुल्यः स्मृतो राजा
तस्य प्रापयति सः सैनिकः सूनाप्रोक्तो हिंसकः अराजन्यः प्रसूतितः राज्ञः प्रतिग्रहः घोरः ८७ य इति एतादृ
शस्य राज्ञः यः प्रतिग्रहं गृह्णाति सः पर्यायेन क्रमेण इमान् एकविंशति नरकान् याति ८८

तामिस्रमिति नरकाणां नामान्याह त्रिभिः ८८ संजीवनमिति ९० लोहेति ९१ एतदिति ब्रह्मवेदं वदंतीति ते ब्रह्मवादिनः एतन्नरकस्वरूपं विदितः जानंतः राज्ञः प्रतिगृह्णंति कीदृशाः ब्राह्मणाः प्रेत्य परलोके श्रेयः अभिकांक्षिणः ९२ ब्राह्म इति तन्मूलान् धर्मार्थमूलान् कायक्लेशान् चिंतयेत् तत्वार्थमेव चिंतयेत् ९३ उत्थायेति उत्थाय आवश्यकं मूत्रपुरीषादि कृ

तामिस्रमंधतामिस्रं महारौरवरौरवौ नरकं कालसूत्रं च महानरकमेव च ८८ संजीवनं महावीचिं तपनं संप्रतापनं संघातं च सकाकोलं कुड्मलं पूतिमृत्तिकां ९० लोहशंकुमृजीषं च पंथानं शाल्मलीं नदीं असिपत्रवनं चैव लोहदारकमेव च ९१ एतद्विदंतो विद्वांसो ब्राह्मणा ब्रह्मवादिनः न राज्ञः प्रतिगृह्णंति प्रेत्य श्रेयोभिकांक्षिणः ९२ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत् कायक्लेशांश्च तन्मूलान् वेदतत्वार्थमेव च उत्थायावश्यकं कृत्वा कृतशौचः समाहितः पूर्वां संध्यां जपंस्तिष्ठेत् स्वकाले चापरां चिरं ९४ ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च ९५ श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि युक्तश्छंदांस्यधीयीत मासान् विप्रोर्द्धपंचमान् ९६

त्वा कृतशौचः पूर्वां संध्यां गायत्रीं जपंस्वकाले सूर्योदयपर्यंतं तिष्ठेत् अपरां सायंकाले चिरं तिष्ठेत् नक्षत्रदर्शनपर्यंतं जपंस्तिष्ठेत् आनोदयात् ९४ ऋषय इति यस्मादिसर्वे अवाप्नुयुः ९५ श्रावण्यामिति द्वाभ्यामाह यथाविधि स्वगृह्योक्तविधिना उपाकृत्य वेदमारभ्य उपकरणसंज्ञं कर्म कृत्वा श्रावण्यां प्रौष्ठपद्यां वा छंदोगः प्रौष्ठपद्यां वह्वृचः अध्वर्यवः श्रावण्यां कृत्वा विप्रः अर्द्धपंचमो मासो येषां ते सार्द्धचतुष्टया नित्यर्थः अधीयीत पठेत् ९६

पुष्ये इति वा हि: ग्रामाद्बहिः अर्द्धपंचमेषु गतेषु पुष्येन क्षत्रे पौर्णमास्यां छंदसां वेदानां उत्सर्जनं वेदसमाप्तिं द्विजः कुर्यात्
९७ यथेति यथाशास्त्रं यथाविधि छंदसां वेदानां उत्सर्गं वाहिः कृत्वा पक्षिणीं रात्रिं विरमेत् एकं अहर्निशं तद्दिनं पक्षिणी
तु अहोरात्रिमित्यमरः ९८ अत ऊर्द्धमिति अत ऊर्द्धं उत्सर्गानंतरं शुक्लेषु पक्षेषु छंदांसि पठेत् वेदांगानि कृष्णपक्षे यत्नव
शिकाकल्पेति ९९ नेति शूद्रे जनसमूहसंनिधौ न अधीयीत इति अविस्पष्टं वेदं न अधीयीत निशांते निशाप्रांते ब्रह्म वेदं अ
धीत्य पठित्वा परिश्रांतः सन् पुनः न स्वप्येत् न स्वप्यात् १०० यथेति छंदस्कृतं मंत्रभागः संहिताभागः पठेत् ब्राह्मं छंद

तुष्येत छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि ९७ यथाशास्त्रं तु कृत्वैवमुत्स
र्गं छंदसां बहिः विरमेत्पक्षिणीं रात्रिं तदेवैकमहर्निशं ९८ अत ऊर्द्धं तु छंदांसि शुक्लेषु नियतः पठेत् वेदांगा
नि तु सर्वाणि कृष्णपक्षे तु संपठेत् ९९ नाविस्पष्टमधीयीत न शूद्रजनसंनिधौ न निशांते परिश्रांतो ब्रह्मा
धीत्य पुनः स्वपेत् १०० यथोदितेन विधिना नित्यं छंदस्कृतं पठेत् ब्राह्मं छंदस्कृतं चैव द्विजो युक्तो ह्यना
पदि १ इमान्नित्यमनध्यायानधीयानो विवर्जयेत् अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकं २
कर्णश्रावेनिले रात्रौ दिवा पांसुसमूहने एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ३

स्कृतं मंत्रभागः संहिताभागः पठेत् ब्राह्मं छंदस्कृतं ब्राह्मणभागः पठेत् ब्रह्मच छंदसो नाम्यायुक्तः अनापदि युक्तः
नियमवान् द्विजः १ इमानिति अथ अनध्यायानाह इमान्वक्ष्यमाणान् नित्यं अनध्यायान् द्विजः विसर्जयेत् कीदृ
शः विधिपूर्वकं शिष्याणामध्यापनं कुर्वाणः दिवा पांसुसमूहने पांशुउत्कर्षे रात्रौ अनिले कर्णश्रावे अश्रवस्ये द्विज
शब्दकारिणि काले वर्षासु एतौ अनध्यायौ अध्यायज्ञाः अध्यापनधर्मज्ञाः २ विद्युदिति एतेषु आकालिकं कालेम

पोदीकृत्य इत्याकालिकं तावत्कालपर्यंतं अनध्यायः १०४ एतानिति एतान अनध्यायान् अभ्युदितसंज्ञान् यदा प्रादुष्कृता
ग्निषु उद्धृताग्निहोत्रकालेषु प्रगटिताग्निषु यदा अनध्यायं विद्यात् अनृतौ अकाले अभ्रदर्शने अनध्यायं ५ निर्घातइति
ज्योतिषां च दादित्यगुरूप्रभृतीनां उपसर्जने उपसर्गहेतुभूते ग्रहयुद्धपरिवेषरा अन्योन्यपीडनेन ६ प्रादुरिति सज्योतिः
तावत्कालपर्यंतं अनाध्यायः स्यात् प्रातरस्य अनध्यायो तालातो दिवा तथा रात्रौ सायंसंध्यामारभ्य रात्रावनध्यायः

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे आकालिकमनध्यायमेतेषु मनुरब्रवीत् ४ एतांस्त्वाभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ५ निर्घाते भूमिचलने ज्योतिषां चोपसर्जने एतानाकालिकान् विद्यादनध्यायानृतावपि ६ प्रादुष्कृतेष्वग्निषु विद्युत्स्तनितनिःस्वने सज्योतिः स्यादनध्यायः शेषं रात्रौ यथा दिवा ७ नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च धर्मनैपुण्यकामानां पूतिगंधे च सर्वदा ८ अंतर्गतशवे ग्रामे वृषलस्य च सन्निधौ अनध्यायो रुद्यमाणे समवाये जनस्य च ९ उदके मध्यरात्रौ च विन्मूत्रस्य विसर्जने उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिंतयेत् १० प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनं त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ११

शेषं तात्कालिकः यद्वा पाठः ७ नित्येति धर्मनैपुनकामानां निपुनं धर्मं धर्मरहस्यगादौ धर्मकाले परो ये काषयते सह धर्मनैपुनकामानां निपुणं धर्मं तत्र इच्छितानां तार्थी ग्रामेषु च पुनः नगरेषु नित्य अनध्याय एव स्यात् एतद्धि स्नातकविषयं अंतर्गतेति १ अंतः शवग्रामे अनध्यायः स्यात् च पुनः वृषलस्य धूमच्छेदकस्य सन्निधौ अनध्यायः च पुनः जनस्य समवाये रुद्यमाणे अनध्यायः ९ उदकइति १० प्रतिगृह्येति एकोद्दिष्टस्य केतनं नवश्राद्धानि मंत्रणं प्रतिगृह्य त्र्यहं ब्रह्म वेदः कीर्तयेत

अनध्यायः स्यात् १११ एकोद्दिष्टेति तावत् ब्रह्म वेदं न कीर्तयेत् अनध्यायः स्यात् ११२ शयान इति अवसास्थिकं कृत्वा वासनं कृत्वा ब्रह्म न अधीयात् ११३ नीहारो बाणशब्दे च शब्दे अनध्यायः अष्टकासु तथा वेदं हानि विस्मरणं प्रापयति ११४।११५ घोष्विति मत्तके रवर उच्छ्रेति साति ११६ नेति मैथुनं वासः मैथुनसंबंधिनं वासः वस्त्रं वाशित्वा परिधाय श्राद्धिकं वस्तु प्रतिगृह्य

एकोद्दिष्टस्य यावत्तु गंधलेपश्च तिष्ठति विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ११२ शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकं नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ११३ नीहारे बाणशब्दे च संध्ययोरेव चोभयोः अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ११४ अमावास्या गुरुं हंति शिष्यं हंति चतुर्दशी ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ११५ पांसुवर्षे दिशां दाहे गोमायुविरुते तथा श्वखरोष्ट्रे च रुवति पंक्तौ च न पठेद्द्विजः ११६ नाधीयीत श्मशानांते ग्रामांते गोव्रजेऽपि वा वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ११७ प्राणि वा यदि वाऽप्राणि यत्किंचिच्छ्राद्धिकं भवेत् तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ११८ चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ११९ उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं अष्टकासु त्वहोरात्रं ऋत्वंतासु च रात्रिषु १२०

अनध्यायः स्यात् ११७ प्राणीति प्राणि यच्छ्राद्धि अप्राणि वस्त्रादि यत्किंचित् श्राद्धिकं भवेत् तत् श्राद्धिकं आलभ्य प्राप्य अनध्यायः पाणिरेव अस्यो यस्य सः पाण्यास्यः द्विजः अग्निमान् स्मृतः ११८ आकालिकं दिनांतरे तावत्कालपर्यंतं अनध्यायः स्यात् ११९ उपेति त्रिरात्रं क्षपणं अनध्यायं स्मृतं ऋत्वंतसु रात्रिषु ऋतुसंधिगतासु श्राद्धिकं भुक्त्वा तावत्प्रति ग्रहेषु नि अनध्यायः द्वितीयामाघमासस्य ज्येष्ठश्रावणयोस्तथा मार्गस्य चैत्राश्विनयो ऋतुसंधिः स उच्यते १२०

अश्वादिमारूढः नाधीयति रिरिणस्थः उषरभूमिस्थः सन्वेदं न अधीयीत २१ वमित्वा शुद्धं कृत्वा न अधीयीत २२
अतिथीनिति अनोपीनं अनुज्ञाप्य न अधीयीत चपुनः शास्त्रेण परिरक्षते अभ्युदधुष्टे २३ सामध्वनाविति समेध्वे
नो सति ऋग्यजुषी नाधीयीत चपुनः वेदस्य अंते अधीत्य चपुनः आरण्यकं अधीत्य आरण्यकाधार्यं अधीत्य अ
नध्यायः २४ ऋग्वेद इति एतदिति त्रयो वेदः त्रयी निष्कर्षं अन्वेषणं प्रत्यहं कुर्यात् एतद्विद्वांसः विदंतः जानंतः पश्चा

नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनं न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः २१ न विवादे न कलहे न से
नायां न संगरे न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके २२ अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशं रुधिरे च
स्रुते गात्राच्छस्त्रेण च परिक्षते २३ सामध्वनावृग्यजुषी नाधीयीत कदाचन वेदस्याधीत्य चाप्यंतमारण्य
कमधीत्य च २४ ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः २५
एतद्विदंतो विद्वांसः त्रयीनिष्कर्षमन्वहं क्रमशः पूर्वमभ्यस्य पश्चाद्वेदमधीयते २६ पशुमंडूकमार्जारश्व
सर्पनकुलाखुभिः अंतरागमने विद्यादनध्यायमहर्निशं २७ द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः स्वा
ध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः २८ अमावास्याष्टमी चैव पौर्णमासी चतुर्दशी ब्रह्मचारी भवेन्नि
त्यमप्यृतौ स्नातको द्विजः २९ षष्ठ्यष्टम्यौ त्वमावास्यामुभयत्र चतुर्दशीं वर्जयेत्पौर्णमासीं च तैलं मांसं भगं गु
रे ३० न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ३१

न अनंतरं वेदं स्वकीयं अधीते २६ पश्विति पशुः छागः गुरुशिष्ययोः पश्वादीनां अंतरागमने अहर्निशं अनध्यायः २७ द्वा
वेति द्विजः द्वावेव विवर्जयेत् अशुद्धां भूमिं च पुनः आत्मानं अशुचिं २८ अमावेति स्नातकः द्विजः अमावास्यादिषु
नित्यं ऋतावपि ब्रह्मचारी भवेत् २९ षष्ठीति तैले तैलाभ्यंगे मांसभक्षणे भगे सुरतौ गुरे श्मश्रादिक्रियायां वर्जयेत् ३०

नैतिनिमित्तं विना वासोभिः सह स्नानं समाचरेत् आविस्नाते अंत्यजादिना स्वानि तत्वा नाशाने ३१ देवतानामिति देवतादीनां छायां काम
तः नाक्रामेत् बभ्रूणां गवां कपिलानां छायां च पुनः दीक्षितस्य छायां नाक्रामेत् ३२ मध्यमिति चतुःपथं मध्यंदिने मध्याह्नकाले न सेवे
त् ३३ उद्वर्तनेति उद्वर्तनादितिषु कामतः आनंधितिष्ठेत् उद्वर्तनं अभ्यंगमलापकर्षणं विण्मूत्रे रक्तमेव श्लेष्मनि
ष्ठ्यूतवांतानि एतेषु स्नानेषु कामतः अनधितिष्ठेत् ३४ वैरिणामिति परस्य योषितं न सेवेत् ३५ नहीदृशमिति परदा

देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा नाक्रामेत् कामतः छायां बभ्रूणां दीक्षितस्य च ३२ मध्यंदिने अर्द्धरात्रे
श्राद्धं भुक्त्वा च सामिषं संध्ययोरुभयोश्चैव न सेवेत चतुष्पथं ३३ उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च श्लेष्मनि
ष्ठीवतान्तानि नाधितिष्ठेत कामतः ३४ वैरिणं नोपसेवेत सहायं चैव वैरिणः अधार्मिकं तस्करं च परस्यैव च
योषितं ३५ नहीदृशमनायुष्यं लोके किंचिन्न विद्यते यादृशं पुरुषस्येह परदारोपसेवनं ३६ क्षत्रियं चैव सर्पं च ब्रा
ह्मणं च बहुश्रुतं नावमन्येत वै भ्रष्णुः कृशानपि कदाचन ३७ एतत्त्रयं हि पुरुषं निर्दहत्यवमानितं तस्मादेतत्त्रयं
नित्यं नावमन्येत बुद्धिमान् ३८ नात्मानमवमन्येत पूर्वापरसमृद्धिभिः आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्ल
भां ३९ सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ४०

रोपसेवनं यादृशं अनायुष्यकरं ततः अन्यतरं ३६ क्षत्रियमिति भूष्णुः वर्द्धिष्णुः क्षत्रियादिकं अनवमान्येत न तिरस्कुर्वीत
३७ एतदिति क्षत्रियं ब्राह्मणं सर्पं एतत्त्रयं अवमानितं तिरस्कृतं निर्दहति ३८ नेति एनां श्रियं दुर्लभां नावमन्येत नासा
ध्यं व्यवसायिनः पूर्वापरसाद्धिभिः पित्रादिक्रमागताभिः ३९ सत्यमिति प्रियमपि अनृतं न ब्रूयात् ४०

भद्रमिति अभद्रं अपि वस्तु भद्रं भद्रमिति ब्रूयात् शुष्कवैरं निःप्रयोजनं वैरं न कुर्यात् ४१ नेति अतिकल्यं प्रातःशर्येन अज्ञा तेन पुरुषेन समं न अधिगच्छेत् प्रत्यूषो हर्मुखं कल्यमित्यमरः अतिसायंकालं अति मध्यंदिने स्थिते तथा वृषलैः स तेन नगच्छेत् ४२ हीनांगेति हीनांगादींश्च न क्षिपेत् न तिरस्कुर्यात् ४३ द्वाभ्यामाह युग्मं न स्पृशेदिति अशुचिः सज्योतिर्गि

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ४१ नातिकल्यं नातिसायं नाति मध्यंदिने स्थिते नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ४२ हीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान् रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् ४३ न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान् न चापि पश्येदशुचिः स्वस्थो ज्योतिर्गणान्दिवि ४४ स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु ४५ अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ४६ मंगलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः जपेच्च जुहुयाच्चैव नित्यकालमतन्द्रितः ४७ मंगलाचा रयुक्तानां नित्यं च प्रयतात्मनां जपतां जुह्वतां चैव विनिपातो न विद्यते ४८ वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ४९

णां न पश्येत् ४४ न स्पृष्ट्वेति एतान् विप्रादीन् अशुचिः सन् स्पृष्ट्वा अद्भिः प्राणान् प्राणेन्द्रियायातान् उपस्पृशेत् सर्वाणीनि गात्राणि नाभिं च पाणितलेन तु स्पृशेत् ४५ अनातुर इति स्वानि पाणिच्छिद्राणि अनिमित्ततः न स्पृशेत् सरहस्यानि गुह्य स्थानीयानि पाणिरोमाणि तानि वर्जयेत् ४६ मंगलेति मंगलाचारयुक्तः स्यात् स्वालंकारयुक्तः स्यात् गायत्रीं जपेत् मंगलेति मंगलाचारयुक्तानां विनिपातो व्याघ्रादीनि चरणासादिः अनिष्टप्राप्तिः न विद्यते वेदमिति तं परं धर्मं आहुः अन्यधर्मः

वेदेति भूतानां अद्रोहे नैव पौर्वकीं जातिं स्मरति ५० पौर्वकीमिति ब्रह्मैव वेद एवा पुनः अभ्यसने ब्रह्माभ्यासेन अनन्तं निरंतरं आनंत्यं सुखं फलं अश्नुते ५१ सावित्रानिति सावित्रान् सवितृदेवताकान् गायत्र्यादिमंत्रान् शांतिहोमान् च कुर्यात् अष्टकासु हेमंतशिशिरकृष्णनवमीषु अन्वष्टकासु पितॄन् अर्चेत् ५२ उच्छिष्टान्नं निषेकं रेतः दूरादेव समाचरेत् ५३ मैत्र

वेदाभ्यासेन सततं शौचेन तपसैव च अद्रोहेन च भूतानां जातिं स्मरति पौर्विकीं ५० पौर्वकीं स्मरणं जातिं ब्रह्मैव चाभ्यसेत्पुनः ब्रह्माभ्यासेन चाजस्रमानंत्यं सुखमश्नुते ५१ सावित्रान् शांतिहोमांश्च कुर्यात्पर्वसु नित्यसः पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च ५२ दूरादेवयष्यामूत्रं दूरात्पादावसेचनं उच्छिष्टान्नं निषेकं च दूरादेव समाचरेत् ५३ मैत्रं प्रसादनं स्नानं दंतधावनमंजनं पूर्वाह्ण एव कुर्वीत देवतानां च पूजनं ५४ देवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ईश्वरांश्चैव रक्षार्थं गुरूनेव च पर्वसु ५५ अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकं कृतांजलिरुपासीत गच्छतः पृष्ठतोन्वयात् ५६ श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्मसु धर्ममूलं निषेवेत सदाचारमतंद्रितः ५७ आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः आचाराद्धनमक्षय्यमाचारो हंत्यलक्षणं ५८ दुराचारो हि पुरुषो लोके भवति निंदितः दुःखभागी च सततं व्याधितोल्पायुरेव च ५९ सर्वलक्षणहीनोपि समवाचारवान्नरः श्रद्दधानोनुसूयश्च शतं वर्षाणि जीवति ६०

मिति मैत्रं मूत्रपुरीषोत्सर्गः अंजनं प्रसादनं केशानां अभिवाकर्म पूर्वाह्ण एव कुर्वीत ५४ देवतेति ईश्वरं ग्रामाधिपं योगक्षेमार्थं गच्छेत् अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः गुरून् आचार्यान् ५५ अभिवाद्येति स्वं स्वकीयं आसनं दद्यात् ५६ श्रुतीति ५७ आचारादिति अलक्षणं अलक्ष्मीं ५८ दुराचारेति दुराचारः अश्रद्दधानः ५९ सर्वेति ६०

यत्यत्परतंत्रं कर्म पराधीनं कर्म तत्तत् यत्नेन वर्जयेत् यत्यत् आत्मवासं कर्म तत्तत् यत्नेन च सेवेत ६१ सर्वसुखमिति सुखदुःखयोः लक्षणं कारणं एतद्विधात् ६२ यदिति अस्य द्विजस्य यत्कर्म कुर्वतः अंतरात्मनः परितोषः स्यात् तत्कर्म कुर्वीत ६३ आचार्यमिति आचार्यं उपनेतारं प्रवक्तारं उपाध्यायं व्याख्यातारं पितरं मातरं गुरुं ब्राह्मणान् गाश्च सर्वांश्च वतपस्विनः प्रायश्चित्तप्रवृत्तान् एतान् आचार्यादीन् न हिंस्यात् न साक्षात् हननमिति वचनेनापि हिंस्यात् दुःखं नोत्पा

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ६१ सर्वं परवशं दुःखं सर्वमात्मवशं सुखं एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ६२ यत्कर्म कुर्वतोस्य स्यात्परितोषोंतरात्मनः तत्तद्यत्नेन कुर्वीत विपरीतं च वर्जयेत् ६३ आचार्यं च प्रवक्तारं पितरं मातरं गुरुं न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः ६४ नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनं द्वेषं दंभं च क्रोधं च तैक्ष्ण्यं च परिवर्जयेत् ६५ परस्य दंडं नोद्यच्छेत्क्रुद्धो नैनं निपातयेत् अन्यत्र पुत्राच्छिष्याद्वा शिक्षार्थं ताडयेत्तु तौ ६६ ब्राह्मणानवगूर्यैव द्विजातिर्वधकाम्यया शतं वर्षाणि तामिस्रे नरके प्रतिपद्यते ६७ ताडयित्वा तृणेनापि संरंभान्मतिपूर्वकं एकविंशतिमायाताः पापयोनिषु जायते ६८

दृयेत् प्रतिकूलाचरणं हननं न कार्यं ६४ नास्तिकामिति च पुनः वेदविदां मिथ्यात्वाख्यवसायश्च अन्यत्प्रसिद्धं तैक्ष्ण्यं हिंसाभिरतिं इत्यादि वर्जयेत् ६५ परस्येति परस्य अन्यस्य दंडं न उद्यच्छेत् न कुर्यात् क्रुद्धः सन् पुत्रात् शिष्यात् अन्यत्र एवं दंडं निपातयेत् शिक्षार्थं तु निश्चयेन तौ पुत्रशिष्यौ ताडयेत् ६६ ब्राह्मणानिति द्विजाति विधिकाम्यया ब्राह्मणान् अवगूर्य वदं उत्थाप्यैव ६७ ताडयित्वेति तृणेनापि ताडयित्वा एकविंशति जन्मानि प्राप्य ६८

अयुद्धेति अयुध्यमानस्य शास्त्रेण धर्मेण युयुत्सोः ब्राह्मणस्य अंततः मध्यतः असृक् उत्पाद्य प्रेत्य परलोके अप्राज्ञत
यानरः सुमहद्दुःखं प्राप्नोति ६९ शोणितमिति तावतः अब्दान् वर्षान् अमुत्र परलोके अद्यैः अदनीयैः सह सोनितोत्पा
दकः अद्यते भक्ष्यते ७० न कदाचिदिति द्विजे तस्मात्कदाचिदपि विद्वान् नरः अवतरेन् न दण्डं उत्पादयेदित्यर्थः ७१ अ
धार्मिकमिति अधार्मिकादीनां मध्ये च पुनः हिंसारतिः असौ इहलोके सुखं वृद्धेत ७२ नेति धर्मेण धर्मशास्त्र मर्यादया
सीदन्नपि तरः सनः अधर्मेण निवेशयेत् अधार्मिकानां आसु विपर्ययं पश्यन् यद्यपि चौर्यान् कौचादिनाधनसमृद्धिः

अयुध्यमानस्योपाद्य ब्राह्मणस्यासृगंततः दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ६९ शोणितं यावतः पांशून्
संग्रह्णाति महीतलात् तावतोऽब्दानमुत्राद्यैः शोणितोत्पादकोऽद्यते ७० न कदाचिद्द्विजे तस्माद्विद्वानवगुरेदपि
नाताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् ७१ न धार्मिको नरो यो हि यस्य चाप्यनृतं धनं हिंसारतिश्च यो नित्यं
नेहासौ सुखमेधते ७२ न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् अधार्मिकानां पापानामाशु पश्यन्
विपर्ययं ७३ नाधर्मश्चरितो लोके सद्यः फलति गौरिव शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ७४ यदि ना
त्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु नत्वेव तु कृतं कर्म कर्तुर्भवति निःफलं ७५ अधर्मेणैधते तावत्ततो भद्राणि
पश्यति ततः सपत्नाञ्जयति समूलश्च विनश्यति ७६

तथापि तस्याः समृद्धेरपि आशु विनाशः ७३ नेति चरितः अधर्मः सद्यः गौरिव न फलति साधर्म्ये यो दृष्टांतः पृथिवी
वा धर्मे पश्चुवैर्मैश्शनैः आवर्तमानस्तु प्रवर्तमानः अधर्मकर्तुर्मूलान् भोगान् साधनानि कृन्तति छिनत्ति ७४ य
दीति यदि आत्मनि पापः अधर्मः न फलति तदा पुत्रेषु फलेत् यदि पुत्रेषु न तर्हि नप्तृषु फलेदिति कर्तुः कृतं कर्म

निःफपलेनभवति ७५ अधर्मेनेति तावत्अधर्मेण अधर्माचरणेनपूर्वंपुण्येन एधतेवर्द्धतेयावदुत्कृष्टोधर्मः ततः
तस्मात्इंद्रादीपश्यति चपुनः सपत्नान्जयति धर्मसर्वस्वदानेततः धर्मेत्नमातसमूलसपुत्रज्ञातिधनबांधवा
दिहत्यंधर्मसहितः विनश्यति ७६ सत्येति सत्यंयथार्थभाषणांधर्मः श्रुतिस्मृत्यभिहितः आर्यवृत्तंसद्वृत्ताच
रणंतेषुसदारमेत ७७ चपुनः शौचं अंतर्बाह्यशौचेसदारमेत वाग्बाहूदरसंयुतः नियतगात्रः वाक्मौनं व्य
र्थालापरहितंवाहोःसंयमः बाहुबलाश्रयः उदरंबहुभोजितंभवेत् परित्यजेदिति धर्मसर्वस्वदीनं उत्तर

सत्यधर्मार्यवृत्तेषुशौचेचैवरमेत्सदा शिष्यांश्चशिष्याद्धर्मेणवाग्बाहूदरसंयुतः ७७ परित्यजेदर्थकामौयौ
स्यातांधर्मवर्जितौ धर्मंचाप्यसुखोदर्कंलोकसंक्रुष्टमेवच ७८ नपाणिपादचपलोनवेत्रचपलोनृजुः
नस्याद्वाक्चपलश्चैवनपरद्रोहकर्मधीः ७९ येनास्यपितरोजाताः येनयाताःपितामहाः तेनयायात्सतां
मार्गंतेनगच्छन्नरिष्यति ८० ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः बालवृद्धातुरैर्वैद्यैर्ज्ञाति
संबंधबांधवैः ८१

कालेअसुखोदर्कंचपुनः लोकसंक्रुष्टंधर्मंलोकनिंदितंपरित्यजेत् ७८ नेतिपाणिपादचपलोनभवेत् अनियु
क्तचरस्तुनग्रहणायनेत्रेचलेपरस्त्रिषुपरद्रोहार्थंकर्मनकुर्यात् अनृजुःनस्यात् किंतुऋजुरेवस्यात् ७९ ने
ति येनधर्ममार्गेणास्यपितरःमताः येनधर्ममार्गेणपितामहाःजाताः अस्यार्थेयेधर्मापित्रादिभिःकृता
येःसःप्रीतिंगताः सयैःसविवाहादिकृताः येसःसर्वास्वधीतयथाश्रमणंयातेनमार्गेणगच्छन्नरिष्यति
तेननन्नश्यतितेनसतांमार्गेश्रयात्इत्यर्थः ८० ऋत्विजइतित्रिभिराह ऋत्विगादिभिःसंविवादंनकुर्यात्

वेदविद्भिः मित्रैर्वा ज्ञातिसंबंधबांधवैः सह विवादं न कुर्यात् ज्ञातयः पितृपक्षीयाः संबंधिनः वैवाह्याः बांधवाः
मातृपक्षीयाः जामिभिः भगिनीभिः ८२ मातेति एतैरिति एतैः ऋत्विगादिदासांतैः विवादरहितैः उपेक्षितैः इमा
न् लोकान् जयति स्वीकरोति ८३ आचार्येति पूजिता आचार्यादयः ब्रह्मलोकादीन् प्रापयंति ८४ जामयः भगिन्यः
विवासिन्यः ८५ आकाशइति ८६ छायेति यो दासवर्गः सः स्वास्वकीया छायानुगता भवति दुहिता परं कृपापात्रं

मातापितृभ्यां जामीभिः भ्रात्रा पुत्रेण भार्यया दुहित्रा दासवर्गेण विवादं न समाचरेत् ८२ एतैस्त्यजन् विवा
दान् सर्वपापैः प्रमुच्यते एतैर्जितैश्च जयति सर्वान् कामानिमान् गृहीन् ८३ आचार्यो ब्रह्मलोकेशः प्राजा
पत्ये पिता प्रभुः अतिथिस्त्विंद्रलोकेशो देवलोकस्य चार्त्विजः ८४ जामयोऽप्सरसां लोके वैश्वदेवस्य
बांधवाः संबंधिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ८५ आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः छाया स्वो दासवर्गश्च दुहिता कृपणं परं तस्मादेतै
रधिक्षिप्तः सहेतासंज्वरः सदा प्रतिग्रहसमर्थोऽपि प्रसंगं तत्र वर्जयेत् प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्र
शाम्यति ८८ न द्रव्याणामविज्ञाय विधिं धर्मं प्रतिग्रहे प्राज्ञः प्रतिग्रहं कुर्यात् अवसीदन्नपि क्षुधा ८९
हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतं अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत् ९०

तस्मात्कारणात् एतैः आचार्यादिभिः अधिक्षिप्तः तिरस्कृतः असंज्वरः क्लेशरहितः सन् सहेत ८७ प्रतिग्रहेति प्रतिग्र
हं गृहीतुं समर्थोऽपि तत्र प्रसंगं वर्जयेत् प्रतिग्रह स्वीकारेण आशु ब्राह्मं तेजः साम्यति नेति द्रव्याणां विधिं द्रव्यदेव
ता प्रतिग्रहे मंत्रं अविज्ञाय धर्मं द्रव्यं दैवं हिरण्यादि प्राज्ञः पंडितः क्षुधा अवसीदन् अवसादं गच्छन् अप्रतिग्रहेन प्र
तिग्रहं कुर्यात् ८९ हिरण्यमिति अविद्वान् मूर्खः हिरण्यादि घृतं प्रतिगृह्णानः दारुवत् भस्मीभवति ९० श्री ४०

हिरण्यमिति हिरण्यं हिरण्यप्रतिग्रहं आयुर्हरति च पुनः अन्नं आयुर्हरति भूर्भुवः प्रतिग्रहः तनुं देहं ओषतः दह
तः च पुनः गौः गवां प्रतिग्रहः तनुं दहतः अश्वः अश्वप्रतिग्रहः चक्षुर्हरति वासः वस्त्रप्रतिग्रहः त्वचं हरति
तिलघृतं घृतप्रतिग्रहः तेजः हरति तिलप्रतिग्रहः प्रजां हरति ८९ अतपा इति अतपस्वी तपोरहितः अनधीया
नः मूर्खः एतादृशः प्रतिग्रहरुचिर्द्विजः यथा अंभसि अश्मप्लवेन तरति कश्चित्समज्जति तथा तेन दात्रा सह

हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुं अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः ८९ अतपस्त्वनधी
यानः प्रतिग्रहरुचिर्द्विजः अंभस्यश्मप्लवेनेव सह तेनैव मज्जति ९० तस्माद्विद्वान्विभियात् यस्मात्त
स्मात्प्रतिग्रहात् स्वल्पकेनाप्यविद्वांस्तु पंके गौरिव सीदति ९१ न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे
न बकव्रतिके पापे नावेदविदि धर्मवित् ९२ त्रिष्वप्येतेषु दत्तं हि विधिनाप्यर्जितं धनं दातुर्भवत्यनर्थाय परत्रादा
तुरेव च ९३ यथाप्लवेनोपलेन निमज्जत्युदके तरन् तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ ९४

प्रतिगृहीता द्विजः मज्जति ९० तस्मादिति तस्मात् अविद्वान् विभियात् स्वल्पकेनापि प्रतिग्रहेण अविद्वांस्तु
सीदति ९१ त्रिभिराह नेति वार्यपि जलमपि अवेदविदि ९२ त्रिष्विति एतेषु त्रिषु बैडालव्रतिबकव्रत्ति अवेद
विदिषु दत्तं दातुः अदातुः उभयोः अनर्थाय भवति ९३ यथेति यथा उपलेन प्लवेन पाषाणप्लवेन उदके तरन्
निमज्जति तथा अज्ञौ दातृप्रतीच्छकौ दातृगृहीतारौ अधस्तान्निमज्जति ९४

म.स्मृ.टी.
५७

धर्मेतिधर्मध्वजाधर्मस्थापकः पुरुषैः ख्यापयन्छाद्मिकः छन्नव्याजः प्रकाशं धार्मिकत्वेरहसिनिन्दितमपि अपहरतिलु
ब्धः कृपणः प्रसिद्धः प्रतिग्रहादिलम्पट इतिइत्यादृशः वैडालव्रतिकसंज्ञः हिंस्रः हिंसारुचिः सर्वाभिसंधिकः परगु
णान्सहते सर्वेषु पित्रायस्येति ९८ अधोदृष्टिः उपरोधभयात् मुखनिरोद्धाकः नैकृतिकः छद्मवृत्तिः स्वार्थ

धर्मध्वजीसदालुब्धः छद्मिकोलोकदंभिकः वैडालव्रतिकोज्ञेयोहिंस्रःसर्वाभिसंधकः ९७ यस्यध
र्मध्वजोनित्यंसुरध्वजइवोत्थितः प्रच्छन्नानीवपापानिवैडालानांव्रतंमतं ९८ अधोदृष्टिर्नैष्कृतिकः
स्वार्थसाधनतत्परः शठोमिथ्याविनीतस्तुबकव्रतधरोद्विजः ९९ येबकव्रतिनोविप्रायेचमार्जारलिंगि
नः तेपतंत्यंधतामिस्रेतेनपापेनकर्मणा नधर्मस्या नधर्मस्यापदेसेनपापंकृत्वाव्रतंचरेत् व्रतेनपापं
प्रच्छाद्यकुर्वन्स्त्रीशूद्रदंभनं २०० प्रेत्येहचेदृशाविप्रागर्ह्यंतेब्रह्मवादिभिः छद्मनाचरितंयच्चव्रतंरक्षां
सिगच्छति १ अलिंगीलिंगवेषेणयोवृत्तिमुपजीवति सलिंगिनांहरत्येनस्तिर्यग्योनौचजायते २
परकीयनिपानेषुस्नायाद्धिकदाचन निपानकर्तुःस्नात्वातुदुःकृतांशेनलिप्यते ३

साधनतत्परः स्वकार्यसाधकः शठः वक्रमिति ९९ यइति नेतिधर्मस्य अनपदेशेनव्याजेनपापंव्रतंचरेत्
स्त्रीशूद्रदंभनंस्त्रीशूद्रयोर्वंचनंकुर्वन् २०० प्रेत्येति ईदृशाः विप्राः गर्ह्यंते छद्मनाचारितंव्रतंरक्षांसिप्रतिग
च्छंतिनिःफलंभवति १ अलिंगीतिपः अलिंगी आश्रमीभावलिंगी वेषेण आश्रमवेषेनवृत्तिंउपजीवतिसः
लिंगिनांआश्रमिणांएनः पापंहरति अनरण्यंतर्पयतिस्वयंतिपक्षयोनौम्रगालयोनौप्रजायते २ परकीयेति ३

राम
५७

स्नानविधिमाह परकीयनिपानेषु कदाचन स्नायात् स्नात्वा निपानकर्तुः दुःकृतांशेन लिप्यते कूपसमीपं पशि
वद्धं पशुपानाय निपानसंज्ञं ५ यानेति पश्चात्यानादीनि अदत्तानि उपभुंजानः अस्य एतेषां प्रभोः एनसः
तुरीयभाक् च तुर्य्यांशभाक् स्यात् ६ यमादीनाह त्रिभिः यमान्नित्यकर्माणि सततं सेवेत अनुष्ठेयत्यानिय
मानि किंतु नियमानाह आनृशंस्यादि ध्यानं ईश्वरप्रसन्नता व्रतं स्नातकव्रतादि उपवासः मासोपवासादिः ९

सप्तोद्धृत्य ततः पिंडान् कामं स्नायीत पंचधा ३ उदपानात्स्वयं गृह्य वहिः स्नानेन दुष्यति ४ यानशय्यासना
न्यस्य छत्रोपानत्कृहालीच अदत्तान्युपभुंजान एनसः स्यात्तुरीयभाक् ५ नदीषु देवखातेषु तडागेषु सरस्सु च
स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ६ यमान्सेवेत सततं न नित्यं नियमान्द्विजः यमान्पतत्यकु
र्वाणो नियमान्केवलान्भजेत् ७ आनृशंस्यं क्षमा सत्यमहिंसा दममस्पृहा ध्यानं प्रसादो माधुर्यमार्जवं
शौचं मिज्यातपो दानं स्वाध्यायोपस्थनिग्रहः व्रतोपवासो मौनं च स्नानं चे नियमा दश ९ अहिंसा सत्यव
चनं ब्रह्मचर्यमकल्पता अस्तेयमपि पंचैते यमाश्चैव व्रतानि च १० अक्रोधो गुरुशुश्रूषा शौचमाचारला
घवं अप्रसादाश्च नियमाः पंचैवोपव्रतानि च ११ नाश्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा स्त्रिया क्लीवे
न च हुते भुंजीत ब्राह्मणः क्वचित् १२ अश्लीलमेतत्साधूनां यत्र जुह्वत्यमी हविः प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जये त् १३

शौचमिति ९ अहिंसेति १० अक्रोधेति ११ नेति अश्रोत्रिय यस्तेन तते विस्तृते ब्राह्मणः क्वचिन्न भुंजीत ग्रामयाजि
नापुरोहितेन भुंजीत स्त्रीप्रधानं स्त्रिया हुते होमे न तत्र न भुंजीत क्लीवेन हुते होमे तत्र न भुंजीत १२ अश्लीलमिति त
त्र होमे अमी चत्वारः अश्रोत्रियादयः हविः यत्र जुह्वति तत्र अश्लीलं देवानां प्रतीकं विपरीतं भवति १३ श्री:२१

मत्तेति मत्तानां क्रुद्धानां रोगिणां एतेषां च पुनः केशकीटादिभिः सह अवपन्नं पदा कामतः पदा स्पृष्टं अन्नं न भुञ्जीत कदाच
न २०७ भ्रूणेति भ्रूणघ्ना अवेक्षितं दृष्टं २०८ पतत्रिणा अवलीढं २०९ स्तेनेति कैः । चिद् एर्वि नेकः कोमोत्तोति इतिपुष्य
वत् २ तं तत् दुष्टान्नं यत्ताविवाहादौ तु अनिमंत्रितः भोक्तुम् अन्नं २१० स्तेन गायेति दीक्षितस्य असंस्थितानि ग्नीषोमीप
यसोः कदर्यस्य बद्धस्य वाग्मात्रेण विरुद्धस्य निगडादिना योऽभिसस्तस्य कल्केवतः पुंश्चली परपुरुषरता इद्रियं च

मत्तक्रुद्धातुराणां तु न भुञ्जीत कदाचन केशकीटावपन्नं च पदा स्पृष्टं तु कामतः २०७ भ्रूणघ्नावेक्षितं चैव सं
स्पृष्टं चाप्युदक्यया पतत्रिणावलीढं च शुना संस्पृष्टमेव च २०८ गवा चान्नमुपघ्रातं घुष्टान्नं च विशेषतः
गणान्नं गणिकान्नं च विदुषां च जुगुप्सितं २०९ स्तेनगायनयोश्चान्नं तक्ष्णो वार्धुषिकस्य च दीक्षितस्य कद
र्यस्य निगडस्य च २१० चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः उग्रान्नं सूतिकान्नं च पर्याचान्तम
निर्दशं २११ अनर्चितं वृथामांसं अवीरायाश्च योषितः द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतं २१२

वसास्य यमेव अस्तवा कालपरिपाकेन अश्नं भवति तत् भुर्लं राज्यं चरति पर्युषितं २१० चिकित्सेति क्रूरस्य
हिंसारुचे उग्रान्नं क्षत्रियात् शूद्राण्यामुत्पन्नः उग्रसंज्ञः तस्यान्नं उग्रान्नं यद्वा वाक्कायव्यापारेणोद्वेजकः उग्रः
वो स्त्रीभोजने यत्र एकेनावमानं कृतं तत्पर्याचान्तं अनिर्दशं अनतिक्रान्तदशाहं अनिर्गताशौचं २११ अनर्चित इति
अहरहाय अवक्षुतपापसृतं तत् अनर्चितं अविहितफलसाधनं मांसं तद्वृथामांसं च पुनः अवीरायाः योषितः अवीरा
पतिपुत्ररहिता द्विषितः अन्नेन गराधिपतेस्तस्य राज्ञो अन्नं पतितान्नं च महापातकिनां अन्नं अवक्षुतं यस्य अज्ञातस्य उपरि

पिशुनेति पिशुनः सूचकः अनृती परिछिद्रवादी च पुनः क्रतुविक्रयी यागया विक्रयी स्वागफलं फलविक्रयी चर्मभ
वक शौचिकः एतेषां अन्नं शैलूष नट्टवत्तीनां तुवायः शौचिकः शौंडिक वैद्य वादनजीविनो वा च पुनः कृतघ्नस्य अन्नमेव
कर्मारेति कर्मारस्य लोहकारस्य च पुनः रंगावतरकस्य वा चोपजीविनः वैण्यस्य वेणुछेदनजीविनः वेणुवादनजीवि
नो वा २२ श्वपचामिति श्वपचांश्च पोषकानां श्ववतां तावेतिपाठः श्ववतां सारमेयवतां मृगयार्थं शौंडिकानां मद्यकर्तृणां

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च २१ कर्मारस्य निषादस्य
रंगावतरकस्य च सुवर्णकर्तुर्वैणस्य शस्त्रविक्रयिणस्तथा २२ श्वपचां शौंडिकानां च चैलनिर्णेजकस्य च रजक
स्य नृशंसस्य यस्य चोपपतिर्गृहे २३ मृष्यंति ये चोपपतिं स्त्रीजितानां च सर्वशः अनिर्दशं च प्रेतान्नमतुष्टिकर
मेव च २४ राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं आयुः सुवर्णकारान्नं यशः चर्मावकर्तिनः २५ कारुकान्नं
प्रजां हंति बलं निर्णेजकस्य च गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति २६ पूयं चिकित्सकस्यान्नं पुंश्चल्या
स्त्वन्नमिंद्रियं विष्ठा वार्द्धुषिकान्नं च शस्त्रविक्रयिणो मलं २७ य एतेन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः
तेषां त्वगस्थिरोमाणि वदंत्यन्नं मनीषिणः २८

च पुनः चैलनिर्णेजक वस्त्रप्रक्षालकस्य रजकस्य वस्त्रादीनां नीलादिरंगकारः नृशंसस्य हत्यर्थं नरस्तुतिकर्तुः च
पुनः यस्य गृहे उपपतिः जारः २३ मृष्यंतीति ये उपपतिं जारं मृष्यंति न त्यजंति विजित्वा रमंत अनिर्दशं अनिर्गता
शौचं च पुनः प्रेतान्नं एकादशाहस्यान्नं च पुनः अतुष्टिकरमेव युयत् २४ एतेषां अन्नभक्षणे दोषमाह राजान्नं ते
जः तपोबलं आदत्ते २५ कारुकान्नमिति कारुकाणं सूपकारान्नं प्रजां हंति असंतोषकर एव च पुनः लोकेभ्यः

म·स्मृ·टी·
५६

स्वर्गलोकेऽप्यः परिहृतानीति २८ मृगमिति मृगतुल्यं पुंश्चल्या अन्नं इंद्रियं गुह्येंद्रियसमं शुक्रसमं वार्द्धुषिकस्य परनिंद
वाः अलमप्रसंसी तस्यान्नं विष्ठासमं च इति येषणे अन्येतु अभोज्यान्नाः मे याम्गुरणावाममनुनावापे सांतरं अन्यत
मस्यान्नं अनुक्तस्यान्नं अमत्या अज्ञानेन भुक्त्वा त्र्यहं त्रिदिनपर्यंतं क्षपणं अन्नपरित्यागं कार्यं उपोषणमित्यर्थः म
त्या ज्ञानेन चेत् भुक्त्वा कृच्छ्रसंज्ञं व्रतं चरेत्कुर्यात् चपुनः रेतोविण्मूत्रमेवमत्या भुक्त्वा कृच्छ्रं चरेत् २९ नाद्यादिति विद्वान् शू
द्रस्य पक्वान्नं नाद्यात् अश्राद्धिनः श्रद्धाहीनस्य यद्वा नित्यश्राद्धरहितस्य वा अस्मात् शूद्रात् आममेव आमान्नं ग्रा

भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहं मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च २९ नाद्याच्छूद्रस्य
पक्वान्नं विद्वानश्राद्धिनो द्विजः आददीताममेवास्मादवृत्तावेकरात्रिकं ३० चंद्रसूर्यग्रहे नाद्यात्स्नात्वा तु भुक्तयोः
अमुक्तयोरस्तमयोरद्याच्चैव परेहनि ३१ श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्द्धुषेः मीमांसित्वोभयं देवाः समम
न्नमकल्पयत् ३२ तान्प्रजापतिरित्याह मा कृध्वं विषमं समं श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ३३ श्रद्ध
येष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः श्रद्धाकृते ह्यक्षयते भवतः स्वागतैर्धनैः ३४ धनधर्मं निषेवेत नित्य
मैष्टिकपौर्तिकं परितुष्टेन भावेन पात्रमासाद्य शक्तितः ३५

ह्येतो भोजनाभावे एकरात्रिं एकदिनपर्याप्तं ३० चंद्रेति चन्द्रसूर्ययोः भुक्तयोः स्नात्वा अद्यात् अमुक्तयोः चपुनः
पुरोहनि अद्यात् ३१ श्रोत्रियेति कदर्यस्य कदर्यस्य लुब्धस्य च श्रोत्रियस्य चपुनः वार्द्धुषेर्वदान्यस्य उदारस्य एतदुभयं
देवाः मीमांसित्वा विचारयित्वा उभयोः अन्नं समं अकल्पयत् व्यवस्थापितवंतः ३२ तानिति तान्देवान् प्रति प्रजा
पतिः इति आह विषमं अन्नं समं कृच्छ्रं मा कुरुध्वं वदान्यस्य श्रद्धापूतं अन्नं ग्राह्यं अश्रद्धया दत्तं इतरत् श्रोत्रियस्य

राम:
५६

अनंतं हि तं न ष्टं भवति ३३ श्रद्धेति श्रद्धया इष्टं यागादि पूर्तं कूपादि नित्यं कुर्यात् इष्टापूर्ते श्रद्धाकृते श्रद्धयाकृते
स्वगतैर्धनैः स्वकर्मोपार्जितैः धनैः तत्सौर्यकन्यादिनाप्राप्तं येषु तत्सुगृहे अक्षये भवतः श्रुतसौर्य तपः कन्यागा
न्याशिष्यान्वयागतं धनं सप्तविधं शुद्धं उदयो यस्य तद्विधः श्रुतं अध्ययनं तपः शौर्यं क्षात्रधर्मेण लब्धं ३४
दानेति शाह्वं नाहं नित्यं ऐष्टिकं पौर्तिकं कुर्यात् प्रतिपदे इष्टपूर्तौ स्यदं पौर्तिकं पात्रं आसाद्य प्राप्य शक्तितः ३५
यत्किंचिदिति यत्किंचिदपि दातव्यं हि निश्चयेन तत्पात्रं उत्पद्यते संमिलति तत्पात्रं सर्वतः पापात्तारयति ३६

यत्किंचिदपि दातव्यं याचितेनानसूयया उत्पद्यते हि तत्पात्रं यं तारयति सर्वतः ३६ वारिदस्तृप्तिमाप्नोति
सुखमक्षयमन्नदः तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं ३७ भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्य
दः गृहदोग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमं ३८ वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वदः अनडुहः
श्रियं पुष्टां गोदो व्रध्नस्य विष्टपं ३९ यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः धान्यदः शाश्वतं सौख्यं
ब्रह्मदो ब्रह्मशाश्वतं ४० सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते वार्यन्नगोमहीवासस्तिलकांचन
सर्पिषां ४१ येन येनतु भागेन यद्यद्दानं प्रयच्छति तत्तेनैवन प्राप्नोति प्रतिभावेजितः स्मृतः ४२ यो
चितं प्रतिगृह्णाति ददात्यर्चितमेव च तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ४३

रति ३६ वारिदेति तिलप्रदः प्रजां संततिं इष्टां प्राप्नोति ३७ भूमिदेति भूमिदः भूमिं प्राप्नोति राज्यं प्राप्नोति गृहदः
अग्र्याणि श्रेष्ठानि वेश्मानि प्राप्नोति ३८ वासोद इति गोदः गवां दाता व्रध्नस्य विष्टपं सूर्यलोकं भास्करो हस्करो व्रध्न
इत्यमरः ३९ यानेति ब्रह्मदः वेदस्य अध्यापकः ब्रह्मसाम्यतां सात्म्यं प्राप्नोति ४१ सर्वेषामिति ब्रह्मदा
नं वेदाध्ययनं विशिष्यते ४२ यश्ति अर्चितं विधिना विध्युक्तप्रकारेण संकल्पितं गृह्णाति ददाति ४३ श्री ४

नेति तपसा न वेश्मायेत् अभिमाणं न कुर्यात् इष्ट्वा यागं कृत्वा अनृतं मृषा न वदेत् आर्तो ब्राह्मणैः पीडितोपि विद्वान्पंडितः अनपवदेत् अपवादं न कुर्यात् न वदेत् विप्रान् दत्वा दानं न कीर्तयेत् ४७ यज्ञ इति यज्ञः अनृतेन क्षरति नश्यति ततः फलं भवति ४५ धर्ममिति पुत्रिका कृमयः पिपीलिका वल्मीकमिव संचिनुयात् संचयेत् ४८

न विस्मयेत तपसा वदेदिष्ट्वा च नानृतं नार्तोप्यपवदेद्विप्रान्न दत्वा परिकीर्तयेत् ४५ यज्ञोनृतेन क्षरति तपः क्षरति विस्मयात् आयुर्विप्रापवादेन दानं च परिकीर्तनात् ४५ धर्मं शनैः संचिनुयात् वल्मीकमिव पुत्रिकाः परलोकसहायार्थं सर्वभूतान्यपीडयन् ४६ नामुत्र हि सहायार्थं पिता माता च तिष्ठतः न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलं ४७ एकः प्रजायते जंतुरेक एव प्रलीयते एकोनुभुंक्ते सुकृतमेक एव च दुष्कृतं ४७ मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ विमुखा बांधवा यांति धर्मस्तमनुगच्छति ४८ तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः धर्मेण हि सहायेन तमस्तरति दुस्तरं ४९ धर्मप्रधानं पुरुषं तपसा हतकिल्बिषं परलोकं नयत्याशु भास्वंतं खशरीरिणं ५० उत्तमैरुत्तमैर्नित्यं संबंधानाचरेत्सह निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ५१

नेति अमुत्र परलोके सहायार्थं पित्रादयः न तिष्ठंति केवलः एकः धर्मः सहायार्थं तिष्ठति ४० एक इति मृतमिति तं मृतं धर्मः अनुगच्छति ४८ तस्मादिति तमः नरकं तरति धर्मेति कीदृशं पुरुषं एकशरीरिणं आकाशवत् अप्रतिहतगति ५० उत्तमैः कुलैः सह संबंधं कुर्यात् आचरेत् कुलं उत्कर्षं निनीषुः अधमान्

प्रापयित्वा त्यजेत् ॥४४॥ उत्तमानिति उत्तमैः सह सम्बन्धं कुर्वन् ब्राह्मणः श्रेष्ठतामेति एवं क्षत्रियवैश्ययोरपि प्रत्यवायेन प्रतिकूलाचरणेन शूद्रतां ब्राह्मण इति स्वधर्मेण श्रेष्ठतामेति ॥४५॥ क्रूराचारैः पुरुषैः सेनादिभिर्न सम्बन्धः असंवसन् वसेत् दमः इन्द्रियाग्रहः समाहितः तथाव्रत इति पाठः ॥४६॥ ग्राह्यवस्तून्याह एधेति गन्धसुगन्धं कर्पूरादिकं यत् अभ्युद्यते अप्रार्थिते च पुनः उदकादिकं सर्वं प्रतिगृह्णीयात् ॥४७॥ आहृतामिति आनीतां अभ्युद्यतां अप्रार्थ्य प्राप्यां दत्तां भिक्षां नोदितां ग्राह्यां प्रजापतिर्मेने अपि दुःकृतकर्मणः सकाशात् ॥४८॥ नाश्नन्तीति यः पुरुषः एतादृशीं भिक्षां अवमन्यते तस्य पुरुषस्य पितरः नाश्नन्ति

उत्तमानुत्तमानेव गच्छन्हीनांश्च वर्जयेत् ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रतां ॥४५॥ दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन् अहिंसो दमदानाभ्यां व्रजेत्स्वर्गं समाहितः ॥४६॥ एधोदकं मूलफलमन्नमभ्युद्यतं च यत् सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां ॥४७॥ आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदितां मेने प्रजापतिर्ग्राह्यामपि दुःकृतकर्मणः ॥४८॥ नाश्नन्ति पितरस्तस्य दश वर्षाणि पंच च न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥४९॥ चिकित्सककृतघ्नानां शिल्पकर्तुश्च वार्धुषेः षंढस्य कुलटायाश्च उद्यतामपि वर्जयेत् न विद्यमानमेवैवं प्रातिग्राह्यं विजानता विकल्प्यविद्यमाने तु धर्महीनः प्रकीर्तितः ॥५०॥ शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि धान्यं मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत् ॥५१॥

अग्निः हव्यं न वहति न स्वीकरोति इत्युक्ते भिक्षाशब्दः प्रशंसायां प्रयुक्तो न भिक्षैव भिक्षैवं चेद्ब्रह्मचारिणः सार्ववर्णिकी अभिहिता तस्मात् अर्थविशेषणं भिक्षा सा दृश्य अपरं च ॥४९॥ चिकित्सकेति चिकित्सकादिभिः उद्यतां भिक्षां वर्जयेत् ॥५०॥ न विद्यतेति इधादिव्यतिरेकेन मद्यवस्त्रद्रव्यं तस्याप्यनेन विशेषेण ग्राह्यत्वेऽपकं ॥५०॥ ग्राह्याण्याह शय्यामिति शय्यां गृहादीन् नानुदेत नत्यास्वयं न त्यजेदित्यर्थः ॥५१॥

गुरूनिति गुरूणां भृत्यांश्च उज्जिहीर्षन् अवसन्नान् उद्धरिष्यन् सर्वतः प्रतिगृह्णीयात् ततः प्रतिग्रहात् स्वयं न तृ
प्येत् गुरुष्विति गुरुषु अभ्यतीतेषु नष्टेषु सत्सु तैर्गुर्वादिभिर्विना गृहे वसन् साधुनः सकाशात् आत्मनः वृत्तिं अन्वि
च्छन् सदा गृह्णीयात् ६०।६१ भोज्यान्नाह आर्द्धिक इति अर्द्धसीरी कृषीफलभागी कुलमित्रं पितृपितामहादिक्रमा
प ति: दासः गर्भदासः नापितः एते शूद्रेषु भोज्यान्नाः यः पुरुषः आत्मानं निवेदयति प्रयच्छति वाङ्मनः कायकर्म

गुरून् भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ६० गुरुषु त्व
भ्यतीतेषु विना वा तैर्गृहे वसन् आत्मनो वृत्तिमन्विच्छन् गृह्णीयात्साधुतः सदा ६१ आर्द्धिकः कुलमित्रं च
गोपालो दासनापितौ एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् योऽन्यथा सन्तमात्मानमन्यथा सत्सु भा
षते स पापकृत्तमो लोके स्तेन आत्मापहारकः ६४ वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः तांस्तु यः स्ते
नयेद्वाचं स सर्वस्तेनकृन्नरः ६५ महर्षिपितृदेवानां गत्वानृण्यं यथाविधि पुत्रे सर्वं समासज्य वसेन्मा
ध्यस्थमास्थितः ६६

भिः गृहस्थाश्रमप्रकरणं २ आत्मनिवेदनमित्याह यादृशेति अस्य शूद्रस्य यादृशः यज्जातिविशिष्टः कुलतः क
र्मतः आत्मा मनः आत्मा पुत्रो वा यस्य भवेत् यादृशं चिकीर्षितं तदीयं कर्म वाञ्छितं यथा येन द्विजं उपचरेत् त
था आत्मानं निवेदयेत् ६२ य इति यः असन्तं आत्मानं अन्यथा सन्तं भाषते चेत् स्वयं सत्सु साधुषु अन्यथा साधुरिति भा
षते सः स्तेनः आत्मापहारः ६४ वाच्यर्थमिति वाग्विनिःसृता वागिन्द्रियाद्विनिःसृता मुखान्निर्गताः वाचः वाच्यर्थाः

वाच्याश्चते अर्थाश्च वाच्यार्थाः वाङ्मूलाः वचनमूलाः नियतास्तथा यः वाच्यार्थः स एव स्तेनः स्तेन इति भावः तं पुनः
यः पुरुषः तं वाचं स्तेनयेत् विपरीतं वदेत् अन्यदुक्त्वा अन्यदनुतिष्ठति सः सर्वः स्तेयकृत् चौर्यकृत् महर्षीन् माध्यस्थे
प्रवृत्तौदासीन्यं आस्थितः वसेत् वेदाध्ययने न तु तन्त्यादेन नयतेः आगमर्थं गृह्यायनं प्रविशेदित्यर्थः ९९ एकाकी
चिंतयेदित्यर्थः आत्मनः हिताहितरूपं परमेश्वरं चिंतयेद्ध्यायेदित्यर्थः ९७ एवमिति ९८ अनेनेति २०० इति श्री
मानवधर्मशास्त्रे रामचंद्रभट्टविरचि० दीपिकायां चतुर्थोऽध्यायः ४ अथ भक्ष्याभक्ष्यप्रकरणमाह श्रुत्वेति कांश्चि

एकाकी चिंतयेन्नित्यं विविक्ते हितमात्मनः एकाकी चिंतयानो हि परं श्रेयोऽधिगच्छति ९७ एषोदिता गृहस्थ
स्य वृत्तिर्विप्रस्य शाश्वती स्नातकव्रतकल्पश्च सत्ववृद्धिकरः शुभः ९८ अनेन विप्रो वृत्तेन वर्तयन्वेद
शास्त्रवित् व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ९९ इति मानवे धर्मशास्त्रे गृहस्थाश्रमकथनं
नाम चतुर्थोऽध्यायः ४ श्रुत्वैतानृषयो धर्मान्स्नातकस्य यथोदितान् इदमूचुर्महात्मानमनलप्रभवं
भृगुं १ एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठतां कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो २ स ता
नुवाच धर्मात्मा महर्षीन्मानवो भृगुः श्रूयतां येन दोषेण मृत्युर्विप्रान् जिघांसति ३ अनभ्यासेन वे
दानामाचारस्य विसर्जनात् आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ४

स्यानिव्रतां दृष्ट्वा ब्रह्मा नदा ब्रह्मणः शुक्रमयतत ततः शुक्रं अग्निकुंडे क्षिपत् तेन अग्निकुंडात् जातः भृगुः अनल
प्रभवं भृगुं ऋषयः इदं ऊचुः द्वितीयश्लोको अनलरूपत्वात् एवमिति विप्राणां यथोक्तं एवं अनुतिष्ठतां मृत्युः
कथं प्रभवति २ स इति सः भृगुः तान्महर्षीन् उवाच येन दोषेण विप्रान् मृत्युः जिघांसति इति श्रूयतां ३ ४

अनभ्यासेनेति अन्नदोषाद् दुष्टाभक्ष्यान्नदोषान्मृत्युः विप्राञ्जिघांसति ४ लशुन इति लशुनं श्वेतकंदो हस्तपत्रः
लशुनं गृंजनं रक्तपत्रं लोहितसूक्ष्मकंदं पलांडुं स्थूलकंदं कंदेष्वाजइति संज्ञा कवचानि छत्राकं सर्पच्छत्रं शिलींध्राणि
एतानि द्विजानामभक्ष्याणि च पुनः अमेध्यस्थानप्रभवानि उत्पन्नानि ५ लोहितानिति लोहितानआरक्तान्वृक्षनि
र्यासादीन विवर्जयेत् वृश्चनप्रभवान्वृक्षच्छेदजातान् लोहितग्रहणात् हिंगुकर्पूरादीनां अनिषेधः शेलुं श्लेष्मा
तकफलं गव्यं गोरिदं गव्यं पेयूषं प्रसंप्रसूतायाः गोर्दुग्धमतिकोरं पेयूषं पेयूषीइति संज्ञा एतानि प्रयत्नेन वर्जयेत् ६ वृथे

लशुनं गृंजनं चैव पलांडुं कवचानि च अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ५ लोहितान्वृक्षनिर्यासान्
वृश्चनप्रभवांस्तथा शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ६ वृथाकृशरसंयावपायसापूपमेव च अनु
पाकृतमांसानि देवान्नानि हवींषि च ७ अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा आविकं संधिनीक्षीरं वि
वत्सायाश्च गोः पयः ८ आरण्यानां च सर्वेषां मृगाणां माहिषं विना स्त्रीक्षीरं चैव वर्ज्याणि सर्वशुक्तानि चैव हि ९

ति वृथाकृशरः देवताद्युद्देशमंतरेण साधितं कृशरान्ति लमुद्गतंडुलमिश्रितान्नं सिद्धं कृशरं संयावः गुडक्षीर
घृतादि गोधूमचूर्णविकारः पायसं अपूपमेवं अनुपाकृतमांसानि यज्ञे असंस्कृतस्य पशोः मांसानि देवता
न्नानि देवतोद्देशेन संकल्पितान्नानि हवनात्पूर्वं हविः हवनीयद्रव्यं ऋत्विक्यजमानव्यतिरिक्तानां हविः अन
तिक्रांतदशाहं अनिर्दशाहस्याः गोः क्षीरं औष्ट्रं पयः एकशफं वडवादीनां पयः अवेः आविकं पयः संधिनीक्षीरं
वृषेण संधीयते या सा संधिनी मृतवत्सायाः पयः आरण्येति स्त्रीक्षीरं द्विस्तनीनां ९

भक्ष्यमाह दधीति पुष्पमूलफलैः शुभैरसैः यानि अभिषूयंते मिश्रीक्रियंते तानि भक्ष्याणि १० वर्ज्यानाह क्रव्य
इति क्रव्यं मांसं तन्मांसादः क्रव्यादः गृध्रादीन् तथा सर्वान् ग्रामनिवासिनः पारावतप्रभृतीन् ननिर्दिष्टान् अनिर्दि
ष्टान् भक्ष्यत्वेन अकथितान् एकशफान् टिटिभिः शब्दानुकारी एतादृशान् वर्जयेत् ११ कलविंकमिति कलविं
कं ग्रामचटकं प्लवं जलकुक्कुटं हंसः चक्रवाकः ग्रामकुक्कुटं सारसं रज्जुदालं वनकुक्कुटं दात्यूहः दात्यूहः कालकं
टक इत्यमरः एतादृशोच्चवर्जयेत् परान्नं विदूरहि चक्रांकं ग्रामकुक्कुटं रज्जुनं गृंजनं चैव जगध्वा चांद्रायणं

दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभवं यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैः १० क्रव्यादशकुनीन्सर्वा
न् तथा ग्रामनिवासिनः अनिर्दिष्टांश्चैकशफान् टिट्टिभं च विवर्जयेत् ११ कलविंकं प्लवं हंसं चक्राह्वं ग्रा
मकुक्कुटं सारसं रज्जुदालं च दात्यूहं शुकसारिके १२ प्रतुदान् जालपादान् च कोयष्टिनखविष्किरान् निमज्जत
श्च मत्स्यादीन् सौनं वल्लूरमेव च १३ बकं चैव बलाकां च काकोलं खंजरीटकं मत्स्यादान्विड्वराहांश्च म
त्स्यानेव च सर्वशः १४ यो यस्य मांसमश्नाति स तन्मांसाद उच्यते मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यांश्च वर्जये
त् १५

चरेत् १२ प्रतुदानिति प्रतुद्य शब्दं कुर्वाणान् तित्तिरादीन् जालपादांश्च जालकारांश्च पादांश्च कोयष्टिकः कारंब
कः नखैः आ विष्किरान् नखविकाराः तान् नखविकारान् श्येनादीन् तथा निमज्जनः मत्स्यादीन् पक्षीन् शूनास्थानो
मांसं सौनं वल्लूरं शुष्कमांसं १३ बकं बलाकां काकोलं विड्वराहं ग्रामशूकरं सर्वशः मत्स्यानेव च बकादिकं वर्जयेत्
बकमिति १४ यदिति यः यस्य जीवस्य मांसं अश्नाति सः तन्मांसादः उच्यते मत्स्यादीन् वर्जयेत् १५

म.स्म.टी.

६२

पाठेनेति पाठीनादीन्मत्स्यानाह पाठीनरोहितावुदितसंज्ञौ लोहितवर्णौ हव्यकव्ययोः कार्ये आद्यौरवाद्यौ भक्ष्यौ राजीवान् पद्मवर्णान् सिंहतुण्डांश्च सिंहमुखान्मत्स्यान् सशल्कान् शल्कैः सह वर्तन्ते इति सशल्काः तान्सशल्कान्भक्षयेत् १६ नेति एकचरान्न भक्षयेत् अज्ञातांश्च मृगद्विजान् जातितोऽप्रज्ञाता मृगाः पक्षिणश्च न भक्षयेत् सर्वान्पंचनखान्भक्ष्येषु समुद्दिष्टान् १७ श्वाविधमिति श्वाविधं सेधा शल्यकं शल्लकी गोधा खड्गमेकशृङ्गानुकारीकैः लंकेशशशास्तथा भक्ष्यानाह

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवान्सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः १६ न भक्षयेदेकचरानज्ञातांश्च मृगान्द्विजान् भक्ष्येष्वपि समुद्दिष्टान्सर्वान्पंचनखांस्तथा १७ श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदतः १८ छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः १९ अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् यतिचान्द्रायणं वापि शेषेषूपवसेदहः २० संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः अज्ञानयुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः २१

अनुष्ट्रान् उष्ट्रव्यतिरिक्तान् एकतोदतः १८ भक्षणे पतनहेतूनाह छत्राकमिति मत्या ज्ञात्वा जग्ध्वा भक्षयित्वा द्विजाः पातति पतितो भवेत् प्रायश्चित्ताभावः पुनः लशुनग्रहणं मायाश्रितातिशयपापार्थं १९ अमत्येति एतानि छत्राकादीनि षट् अमत्या अज्ञानेन जग्ध्वा भक्षयित्वा कृच्छ्रं कृच्छ्रसंतापनं व्रतं चरेत् यतीनां पतत् चान्द्रायणं तत चरेत् अन्येषु शेषेषु छत्राकादिव्यतिरिक्तेषु वस्तुषु भुक्तेषु सत्सु अहः उपवसेत् २० संवत्सरेति अज्ञानयुक्तशुद्ध्यर्थं एकं कृच्छ्रं संवत्सरस्य संवत्सरपर्यन्तं चरेद्द्विजोत्तमः ज्ञातस्य ज्ञानपूर्वं भक्षितस्य विशेषतः २१

राम:

६२

द्वाभ्यामाह यज्ञार्थमिति मृगपक्षिणः वध्याहिंस्या यज्ञार्थं ब्राह्मणैः प्रशस्ता उक्ता हिंसाविधिमाह अगस्त्यः भ
त्यानां पित्रादीनां तृप्त्यर्थं पुराद्रुति आचरत् इतीति किं पुराणेषु भक्ष्याणां मृगाणां अगस्त्ये प्रोक्षितानां मांसैः
पुरोडाशाः बभूवुः ब्रह्मक्षत्रसवेषु च ब्रह्मक्षत्रे मिलित्वा सर्वे कुर्वन्ति यथा ब्राह्मणाः क्षत्रियो गृहपतीभूत्वा ब्राह्मणैः
ऋत्विग्भूतैः सत्रं तत्र नानारसाः पुरोडाशाः भवन्तीति मांसमयाः पुरोडाशास्तत्र संस्थिते ब्राह्मणे क्षत्रिये गृहपतिः मृगयारो
तीति मृगयां संपाद्य ब्राह्मणस्य मृगयाकारणानात् क्षत्रियस्य ब्राह्मणमिलितस्याधिकारः २२ यत्किंचिदिति भ

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च २३ यत्किंचित्स्नेहसंयुक्तं भ
क्ष्यं भोज्यमगर्हितं तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् २४ चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः य
वगोधूमजं सर्वं पयसश्चैव विक्रियाः २५ एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः मांसस्यातः प्रवक्ष्यामि वि
धिं भक्षणवर्जने २६ प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया यथाविधि नियुक्तस्तु प्राणानामे
व चात्यये २७ प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् स्था

क्ष्यं मोदकादि भोज्यं ओदनादि तत्पर्युषितं आद्यं भक्ष्यं यत् हविःशेषं तत् आद्यं भक्ष्यं भवेत् २४ चिरेति द्विजातिभिः अस्ने
हाक्तं यवगोधूमजं चिरस्थितं भक्ष्यमपि आद्यं भक्ष्यं भवति च पुनः दुग्धस्य विक्रियाः २५ मांसभक्षणे प्रोक्षितादन्यं न भक्षयेत्
इति अन्यनिषेधपरं च पुनः नियुक्तः सन् निमन्त्रितः सन् ब्राह्मणानां काम्यया भक्षयेत् च पुनः ब्राह्मणानामत्ययेना
शे उपस्थिते मांसं भक्षयेत् औषधार्थमित्यर्थः २७ प्राणस्यान्नमित्यारभ्य यज्ञायेति पर्यन्तं चार्वाकपूर्वपक्षः निरू
प्यते प्राणस्येति प्राणस्य क्षुत्पिपासे इति श्रुतिः प्रजापतिः इदं सर्वं अन्नं प्राणस्य अकल्पयत् सर्वं स्थावरं जंगमं प्राणा

चराणामिति अचराः भक्ष्याः गोधूमादयः चराणां प्राणिनां अन्नं दंष्ट्रिणां व्याघ्रादीनां अदंष्ट्रिणः मृगादयः अन्नं
भोज्यं अहस्ता मत्स्यादयः सहस्तानां मनुष्याणां अन्नं शूराणां सिंहानां भीरवः मृगादयः अन्नं २९ अहनि अहनि यत
अद्यान् भक्ष्यान् प्राणिनः अत्ता भोक्ता न दुष्यति प्राणात्यये सति धात्रैव अद्याः भक्ष्याः प्राणिनः च पुनः अत्तारश्च
भक्षका एव सृष्टाः ३० इति एष दैवो विधिः यज्ञेति मांसस्य जग्धिर्भक्षणं यज्ञाय यज्ञविषये एव पुरोडाशमात्रं अतः
अन्यथा अविधिना प्रवृत्तेः मांसभक्षणं राक्षसः विधिरुच्यते नद्यथा प्रोक्षितमभ्युक्षितं मांसं तथा ब्राह्मणकाम्य

चराणामन्नमचरा दंष्ट्रिणां चाप्यदंष्ट्रिणः अहस्ताश्च सहस्तानां शूराणां चैव भीरवः २९ नात्ता दुष्यत्यद
न्नाद्यान् प्राणिनोऽहन्यहन्यपि धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ३० यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृ
तः अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ३१ क्रीत्वा स्वयं वाप्युत्पाद्य परोपहृतमेव वा देवान् पितॄंश्चार्च
यित्वा खादन्मांसं न दुष्यति नाद्यादविधिना विधिज्ञो नापदि द्विजः जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽव
शः ३३ न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः यादृशं भवति प्रेत्य वृथामांसानि खादतः ३४ नियुक्तस्तु यथा
न्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां याति संभवानेकविंशतिं ३५

यात्वल्पं दोषमिति ज्ञेयं विपरीते तु लिप्यत इति महाभारते वचनेन प्रसंगदोषप्रतिपत्तिर्ध्येपि मांसभक्षणे मल्पप्रत्य
वाम हेतुः ३१ क्रीत्वेति क्रीत्वा स्वयं उत्पाद्य मृगयादिना परोपहृतमेव वा परेण अन्येन उपहृतं आनीतं मांसं देवान् पितॄन्
अर्चयित्वा खादन्मांसं न दुष्यति एतत् क्षत्रियविषयं ३२ नेति तैः पशुभिः द्विजः ब्राह्मणः अद्यते भक्ष्यते अवशः पराधीन
सन् ३३ नेति धनार्थिनः केतुः मृगहन्तुः तादृशं एनः पापं न भवति वृथा मांसानि खादतः प्रेत्य यादृशं एनः भवति ३४
नियुक्त इति प्रतिप्रसवमाह यथान्यायं विधिना नियुक्तः आर्त्विज्यादौ निमंत्रितः मानवः ब्राह्मणः मांसं न अत्ति न भक्ष

यतिसः प्रेत्यभवेजन्मनि एकविंशतिपर्यंतंपशुतांपाति इतिब्राह्मणविषयं ३५ असंस्कृतेतिमंत्रैः उपाकरणप्रयोजनप्रो
क्षणादिभिः असंस्कृतान्पशून्नविप्रः उपलक्षणमात्रं अन्योपिकथंचनअद्यान्नभक्षयेन्मंत्रैः संस्कृतान्पशूनअ
द्यात् शास्वतंविधिं आस्थितः शाश्वतमित्यनेनपुनिकृतत्वमुक्तं तेतान्यैः कृतमितितेननुसर्वथादोषभावः कुर्यादिति
घृतपशुसंगे आशक्तौ कुर्यात् पिष्टपशुंतथाकुर्यात् वृथापशुंहंतुंकदाचननहिंसेत् ३७ यावन्तीति वृथापशुघ्नः पु

असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रःकथंचन मंत्रैस्तुसंस्कृतानाद्याच्छास्वतं विधिमास्थितः ३६ कुर्याद्धृतपशुं
संगेकुर्यात्पिष्टपशुंतथा नत्वेवतुवृथाहंतुंपशुमिच्छेत्कदाचन् ३७ यावंतिपशुरोमाणि तावत्कृत्वेहमारणं
वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनि ३८ यज्ञार्थंपशवःसृष्टाःस्वयमेवस्वयंभुवा यज्ञोस्यभूत्यैसर्वस्य
तस्माद्यज्ञेवधोवधः ३९ ओषध्यःपशवोवृक्षाःतिर्यंचःपक्षिणस्तथा यज्ञार्थंनिधनंप्राप्ताःप्राप्नुवंत्यु
च्छ्रितीःपुनः ४० मधुपर्केचयज्ञेचपितृदैवतकर्मणि अत्रैवपशवोहिंस्यानान्यत्रमनुरब्रवीत् ४१ एष्व
र्थेषुपशून्हिंसन्वेदतत्वार्थविद्द्विजः आत्मानंचपशुंश्चैवगमयत्युत्तमांगतिं ४२

सषः प्रेत्ययावंतिपशुरोमाणि अष्टोकोटिरोमाणितावंति इहलोकेमरणधर्मात्मानंशरीरंकृत्वावृथाघ्नतांपशुप्रा
यतां सप्राप्नोतिजन्मनि ३८ यज्ञार्थमितियज्ञः अस्यद्विजस्यसर्वस्यतत्क्रियादेः भूत्यैऐश्वर्यायभवतितस्मात्यज्ञेव
धः अवधः एवयज्ञेवाधइतिपाठः ३९ औषध्यइति तिर्यंचः तिर्यग्योनेः यज्ञार्थं निधनंप्राप्ताःपुनः उत्तीः
उत्कृष्टजातीः उत्कृष्टजातित्वंप्राप्नुवंति ४० मधुपर्केति अत्रमधुपर्केपशुवधःसत्ययुगपरोज्ञेयः ४१ एष्विति
एषुअर्थेषुमधुपर्कादिषुपशून्हिंसन्सः द्विजः आत्मानंपशूनुउत्तमांगतिंगमयतिप्रापयति ४२

गृह इति गृहे निवसन् आत्मवान् यतवान् द्विजः अवेदविहितां न समाचरेत् गृहे गृहस्थे गुरोः ब्रह्मचर्ये अरण्ये वा वानप्रस्थ इति नाब्रह्मचारी वनस्थ त्साह चर्याद्गृहस्थस्यापि हिंसादोषः ४२ येति अस्मिन् चराचरे या वेदविहिता हिंसा विधियुक्ता हिंसा तां हिंसां अहिंसामेव विधिवज्जानीयात् धर्मं वेदान्निर्बभौ नितरां बभौ प्रकाशं ते इत्यर्थः ४४ यइति

गृहे गुरावरण्ये वा निवशेन्नात्मवान् द्विजः नावेदविहितां हिंसामापद्यपि समाचरेत् ४३ या वेदविहिता हिंसा नियतास्मिंश्चराचरे अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ४४ यो हिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते ४५ यो बंधनवधक्लेशान्प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यंतमश्नुते ४६ यद्ध्यायति यत्कुरुते धृतिं बध्नाति यत्र च तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ४७ नाकृत्वा प्राणिनां हिंसां मांसमुत्पाद्यते क्वचित् न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ४८ समुत्पत्तिं च मांसस्य वधबंधौ च देहिनां प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ४९ न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ५० अनुमंता विशसिता निहंता क्रयविक्रयी संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ५१ स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ५२

यो हिंसकानि भूतानि यानि तानि यः हिनस्ति आत्मसुखेच्छया सः जीवन् सन् मृतः मृत सन् जीवन्मृतक इत्यर्थः चैकस्मिंश्चिल्लोके सुखं न एधते न प्राप्नोति इत्यर्थः ४५।४६।४७।४९ अनुमंतेति अनुमंता मदनुज्ञया हन्तः विशस्ता अवयवमांसविभागकर्ता स्वमांसमिति ततस्मात् पुरुषात् अपुण्यकृत पापकर्ता नास्ति ५२ श्रीष

वर्षे इति ५३ फलमिति ५४ मांसेति यस्य मांसमहं इह अद्मि सः अमुत्र परलोके मांसभक्षयिता भक्षयिष्यति एतन्मां
सस्य मांसत्वं मनीषिणः प्रवदंति ५५ नेति मांसभक्षणे दोषो न यज्ञादौ पुरोडाशमात्रं न मद्ये मद्यपाने दोषो सौत्राम
ण्यां सुराग्रहान् गृह्णाति इति श्रुतेः रागवशात्सर्वसाधारणमवान्नेनैवैः तस्मात्पुण्याः आघ्राणं न तु पानं पानात्पति
तो भवेदिति वचनात् मैथुने न दोषो विवाहे विषय एव व्यवायः कार्यः नान्यस्त्रीषु भूतानां मनुष्याणां एषा प्रवृत्तिर्या चे
न्निवृत्तिस्तु हि महाफला तत्र किमु वक्तव्यं इति मांसप्रकरणं ५६ अथ प्रेतशुद्धिमाह प्रेतशुद्धिं देहद्रव्याशौचं चतुर्णामपि

वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः मांसानि च न खादेद्यस्तयोः पुण्यफलं समं ५३ फलमूलाशनैर्मेध्यै
र्मुन्यन्नानां च भोजनैः न तत्फलमवाप्नोति मन्मांसपरिवर्जनात् ५४ मांसभक्षयितामुत्र यस्य मांसमि
हाद्म्यहं एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ५५ न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा
भूतानां निवृत्तिस्तु महाफला ५६ इति मांसप्रकरणं प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च चतुर्णामपि व
र्णानां यथावदनुपूर्वशः ५७ दंतजातेनुजाते च कृतचूडे च संस्थिते अशुद्धा बांधवाः सर्वे सूतके च तथोच्यते ५८

वर्णानां अनुपूर्वशः क्रमेण ब्राह्मणादि वर्णक्रमेण दंते ति दंतजाते जातदंते सर्वे बांधवाः अशुद्धा भवंति च पुनः
अनुजाते अनुपश्चाज्जाय ते अनुजातः परस्य विशेषणं दंतोत्पत्ति कालपर्यंतं इत्यर्थः च पुनः कृते चूडे अनुपती
ते चकारात् उपनीते पि संस्थिते कोर्थः मृते सति सर्वे बांधवाः अशुद्धा भवंति तथा सूतके जननाशौचे बांधवाः
अशुद्धाः योगीश्वरः आदंतजननात्सद्यः आचूडान्नैशिकी स्मृता त्रिरात्रिमाव्रतादेशा दशरात्रमतः परं ५८ श्रीध

134

म॰स्मृ॰टी॰
६६

आशौचनिमित्तं कालनियममाह शावं आशौचं दशाहं पर्यन्तं सपिंडेषु विधीयते रहितं ब्राह्मणविषयकं अस्थिसंचयनात्
अर्वाक् अहं वेदैकदेशाध्येतृविषयं एकाहं यासाग्निसमग्रशाखाध्येतृपरं तद्धयासंचयश्च ब्राह्मणानां प्रायेण चतुर्थे
अहनि भवति अतो दिनचतुष्टयमेकशाखामंत्रमात्रमधीतवतो दशाहस्थाने त्र्यहः सपूर्णां शाखामध्यान् एका
हो वेदस्थो नाग्निमतः ५९ सपिंडेति सप्तमे स्वं विहाय स्वापेक्षया त्वक्रमेण निवर्तते सप्तमे पुरुष इति सान्यामिधान
स्य स्वापेक्षया वाचीनेषु षट्सु तेषामपि च संततौ जन्मनाम्नोः अवेदने अज्ञाते समानोदकभावः समानोदकसंज्ञः

दशाहं शावमाशौचं सपिंडेषु विधीयते अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा ५९ सपिंडता तु पुरुषे सप्तमे स
प्तविनिवर्तते समानोदकभावस्तु जन्मनाम्नोरवेदने ६० यथेदं शावमाशौचं सपिंडेषु विधीयते जननेऽप्येवमेवं
स्यान्निपुणां शुद्धिमिच्छता ६१ उभयत्र दशाहानि कुलस्यान्नं न भुंजते दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते
सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ६२ सत्र धर्म प्रवेचस्य हान
धर्मफलैषिणः त्रेताधर्मोपिलिस्वार्पमारण्यस्पेतदुच्यते ६४

भवति शावस्पर्शे विशुध्यंते त्र्यहात् उदकदायिनः इति वा कौ: ६० यथेदमिति मथाइदं आशौचं शौचाशौचं दशाहपर्यन्तं सपिंडेषु
विधीयते जननेपि एवं दशाहं स्यात् निपुणां यथोदितां शुद्धिं इच्छतां ६१ उभयत्रेति उभयत्र शावाशौचे जननाशौचे च दशाहानि
कुलस्यान्नं न भुंजते न भुंजीत दानप्रतिग्रहं वर्ज्यं पञ्चं वर्जयेत् यज्ञो होमादि तत्र होमं वर्जयेत् न तु होमयेत् स्वाध्याया विद्याध्यय
नेन भवेत् ६२ सर्वेषामिति सपिंडानां शावआशौचं सूतकं जननिमित्तं अस्पृश्यत्वमशौचं मातापित्रोरेव न पिंडानां स्य

राम॰
६६

स्यधृपत्वं सत्तकर्मानुरोधेन उपस्पृश्यस्नात्वापिताशुचिः स्यात् ६३ सत्रेति सत्रकर्मवहुकर्तृयत्तकर्मतथाव्रतेत्राधर्मः उ-
उपलक्षणमेतत्तीयोधर्मोयस्येति नैताधर्मः वानप्रस्थः आरण्यध्यानेब्रह्मचर्यस्य एतद्विधिः उच्यते ६४ निरस्येति पुमान् शुक्रं नि-
रस्ययोनौपातयित्वा उपस्पृश्यस्नात्वाशुध्यति ऋतुसांकेत्यात् वैजिकादेवसंवंधात् चस्त्रीत्याति रिक्ताक्षिपुजानेतानाप्रशन
मरणयोः वीजसंवंधात् अहोरात्रेदिनपर्यंतं अघं आशौचं अनुरुंध्यात् वैजिकादिति दृष्टाहाशौचाभावार्थं वीजमात्रेसंवं-
धः तनुस्वभार्याद्वारसंवंधइति तात्पर्यार्थः ६५ अह्नेति एकेनाह्नारात्र्याचैकयाएवं एकदिनं त्रिरात्रैः त्रिभिरात्रिभि-

निरस्यतुपुमांछुक्रमुपस्पृस्यैवशुध्यति वैजिकादपसंवंधादनुरुंध्यादघंत्र्यहं ६५ अह्नाचैकेनरात्र्या
चत्रिरात्रैरेवचत्रिभिः शवस्पृशोविशुध्यंति त्र्यहात्तूदकदायिनः ६६ गुरोःप्रेतस्यशिष्यस्तुपितृमेधंस
माचरेत प्रेतहारैःसमंतत्रदशरात्रेणशुध्यति ६७ रात्रिभिर्मासतुल्याभिःगर्भस्रावेविशुध्यति
रजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वला ६८ वालेदेशांतरस्थेचपृथक्पिंडेचसंस्थितेसवासा
जलमाप्लुत्यशुद्धोभवतिमानवः ६९

त्रिगुणितैः एवंनवभिः एवंदशदिनपर्यंतंशवस्पृशः असपिंडपत्वं धनार्थंमौल्येनशववाहकाः विशुध्यंति उदकदा-
यिनः सपिंडास्त्र्यहःशुध्यंति ६६ गुरोरिति शिष्यः प्रेतस्यगुरोः पितृक्रियांसमाचरेत् प्रेताहारैः प्रेतवाहकैः समंमि-
लित्वा ६७ रात्रिभिरिति गर्भमासतुल्याभिः रात्रिभिः इति वहुवचनात् प्रथमद्वितीयमासयोरपिस्रावे त्रिरात्रं त्रि-
याएवाशौचं अन्येषांतुसद्यः पुनरजसि उपरते निवृत्तेपुनः रजोऽग्रमेस्नानेनसाध्वीसुद्धाभवेत् असाध्वीचेत् आ-
त्वंतरपर्यंतं अशुद्धास्यात् ६८ वालेपिवाले अजातदंते अकृते चूडे देशांतरस्थेचपुनः पृथक्पिंडे असपिंडेस-

म.स्म.टी.
६७

मानोदकमातुलतत्सुतश्यालकादौ ६९ नृणामिति नृणां बालानां अकृतचूडानां नैशिकी स्मृता निवृत्तचूडकानां आव्रतादेशात् आव्रतबंधात् त्रिरात्राच्छुद्धिः इष्यते ७० ऊनद्विवार्षिकं ऊने अपरिपूर्णे द्विवर्षे मस्याशौचे नाद्विवार्षिकः तं प्रेतं शुचौ भूमौ अवदुर्गे नेकृत्वा गंधमाल्यादिभिः अलंकृत्य स्मशानादन्यत्र ग्रामाद्बहिः निदध्युः स्थापयेयुः बांधवाः आस्थिसंचयनादृते विनास्थिसंचयनं न कर्तव्यं ब्रह्मपुराणे विप्रे द्विवर्षन्यूने तु मृते शुद्धिस्तु नैशिकी देहे तु छत्रिये शुद्धिं त्रिभिर्वैश्ये मृते सति निवृत्तचूडके विप्रात्रिरात्राच्छुद्धिरिष्यते निवृत्ते छत्रिये षड्भिः वैश्ये नव

नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ७० ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः अलंकृत्य शुचौ भूमावास्थिसंचयनादृते ७१ नास्य कार्योग्निसंस्कारो नापि कार्योदकक्रिया अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुः त्र्यहमेव तु ७२ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया जातदंतस्य वा कुर्युः नाम्नि वापि कृते सति ७३ सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतं जन्मन्येकोदकानां तु त्रिच्छु

भिरेव च शूद्रे द्विवर्षन्यूने तु मृते शुद्धिस्तु पंचभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहे विशुध्यति षड्वर्षांतमतीतो यः शूद्रश्च म्रियते यदि मासिकं चेमित्यांगिरसभाषितं ७१ नेति अस्य ऊनस्य द्विवर्षस्य निखननप्राप्तस्य अग्निः संस्कारः न कर्तव्य उदकक्रिया जलांजलिक्रिया न कर्तव्या अरण्ये काष्ठवत् अमंत्रपूर्वकं त्यक्त्वा त्र्यहं त्रिदिनपर्यंतं अशौचं क्षपेरन् क्षपयेयुः ७२ नेति अत्रिवर्षस्य अपरिपूर्णत्रिवर्षस्य बांधवैः उदकक्रिया न कर्तव्या जातदंतस्य स्त्री शवस्य पुंसवनेस्य नाम्नि कृते सति जन्मनि जननाशौचनिमित्ते ७३ सब्रह्मेति ब्रह्मसहचरतीति सब्रह्मचारी सवेदाध्यायी सहाध्यायी अतीते मृते एकाहं अशौचं क्षपनं स्मृतं जन्मनि एकोदकानां त्रिरात्राच्छुद्धिः ७४

रात्राच्छुद्धि

राम
६०

स्त्रीणामिति स्त्रीणां कन्यकानां असंस्कृतानां वाग्दत्तानां अपरिणीतानां बांधवाः प्रतिपत्तव्याः त्र्यहाच्छुध्यंति तद्य
था अकृतचूडायां सद्यः शौचं वाग्दानादूर्ध्वं संस्कारात् प्राक् पतिपक्षे पितृपक्षे त्रिरात्रमेव संस्कृतासु स्त्रीषु नशौचं
पितृपक्षे प्रसवमरणे चेत्पितृगृहे प्रसवे एकरात्रं मरणे त्रिरात्रमित्यर्थः यथोक्तेनाह्ने नकल्पेन प्रकारेण सनाभ
यः ज्ञात्यादयः शुध्यंति ७५ अक्षारेति अक्षारलवणान्नं अक्षारं अलवणं अन्नं येषां ते अक्षारलवणाः पुरुषाः
स्युः क्षारलवणसंयुक्तान्नाः वर्ज्याः स्युस्ते अशौचिनः त्र्यहं निमज्जेयुः तथा यादृशाहस्तानाथ नौ उदके नौ यंत्र

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवाः यथोक्तेनैव कल्पेन शुध्यंति तु सनाभयः ७५ अक्षारलवणान्नाः स्युः
निमज्जेयुश्च ते त्र्यहं मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ७६ सन्निधावेष वै कल्पः शावाशौचस्य की
र्तितः असंनिधावयं ज्ञेयो विधिः संबंधिबांधवैः ७७ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं यच्छेषं दश
रात्रस्य तावदेवाशुचिर्भवेत् ७८ अतिक्रांते दशाहे तु त्रिरात्रमशुचिर्भवेत् संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्य ति ७९

हं निमज्जनं कुर्यादिभिः आस्तादितायां क्षितौ पृथक् २ शयीरन् ७६ सन्निधावेति सन्निधौ एव समीपे मरणे एषः
कैवल्पविधिः शावाशौचस्य कीर्तितः असंनिधावेव अयं विधिः संबंधिनां शौचे इत्याह ब्रह्मचारिमनोर्वैः बांध
वैः ज्ञातिभिः ७७ विगतमिति संबंधि बांधवैरित्युभयत्र क्रमादनतीततान्नामी त्राशौचे दशरात्रस्य तान्निमित्ता
शौचस्त्वाशौचमध्यश्रवणे अशौचशेषेनैवेति विगतं तु इत्यत्र सुद्धिं ७८ दशाहादिप्राप्तमशौचस्यापवादमा
ह अतिक्रांत इति दशाहे अतिक्रांते दशाहे अतिक्रांते त्रिरात्रं अशुचिर्भवेत् व्यतीते संवत्सरे अपः स्पृष्ट्वा स्ना
ने नशुध्यति तथा देवलः नाशशुद्धिः प्रशवाशौचे व्यतीते बुदि नेच्छापि प्रोषिते कालशेषः स्यात् अशेषं त्र्यहमेव

तु सर्वेषां संवत्सरे पूर्णे प्रेतोदकत्वादर्वागशुचिः सर्वेषां द्विजानां तत्राह मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा अहस्तु नव
मासर्वाक् ऊर्ध्वं स्नानेन शुध्यति पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ७९
निर्दशमिति मानवः समानोदकः ८० अन्तरिति पुनर्दशाहमध्ये आशौचप्राप्तौ तदपवादमाह अन्तर्दशाहे मरणजन्मजन्मनि
मरणं चेत्स्यातां यावत् अनिर्दिशं स्यात् तावद्विप्रः अशुचिः स्यात् जननेन मरणे जाते पूर्वशौचं अवशिष्टैरहोभिः विशुध्य
ति उशनाप्याह स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वेणैव शुद्धिः स्यात्स्वकालेनैव शुध्यति तथाङ्गिराप्याह
सूतके मृतकं चेत्स्यात् मृतके त्वथ सूतके तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकं यद्विंशानाते। पि शानाशौचे सम

निर्दिशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म तु सवासा जलमाप्लुत्य शुद्धो भवति मानवः ८० अन्तर्दशाहे स्यातां
चेत्पुनर्मरणजन्मनि तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दिशं ८१ त्रिरात्रमाहुराशौचमाचार्ये सं
स्थिते सति तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः

मुत्पन्ने सूतकं तु यदा भवेत् शावेन शुध्यति सूतिः न सूतिः शावशोधिनी यदि स्यात्सूतके सूतिः मरणे वा मृतिर्भवे
त् शेषेणैव भवेच्छुद्धिः अहःशेषे त्रिरात्रिकमिति अपवादमाह मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता पितुः शेषे
ण शुद्धिः स्यात् मातुर्मातृकपक्षिणी को शोकः पितुर्दशाहमध्ये तु मातुश्चेन्मरणं यदि न तिलोदकादिकं कर्म दाहम
त्राहृते विना पितृकर्म समाप्याथ मातृआशौचं चपक्षिणं मातुः क्रियां ततः कुर्यात् तिलाञ्जल्यादिकं च यत् पितुराशौचं
समाप्य सपिण्डीकरणं तं कृत्वा पश्चान्मातुः पक्षिणी या पक्षिणी मध्ये सर्वाः क्रिया कार्याः अथवा आह्निक षोडशश्राद्धं स
पिण्डीकरणं तेनाहि मातुः ततः कुर्यात् पितुः पुत्रः षोडशं वाष्टपिण्डनं अथैकस्मिन् दिने चाथ सपिण्डीकरणं तयोरिति
त्रिरात्रमिति आचार्ये संस्थिते मृते त्रिरात्रं आशौचं आचार्यपुत्रे आचार्यपत्न्यां वा मृते दिवारात्रं अहोरात्रमित्यर्थः ८२

श्रोत्रियइति श्रोत्रिये प्रातिवेश्ये स्वगृहपार्श्ववर्तिनि सांगवेदाध्येतरि उपसंपन्ने मृते त्रिरात्रमशुचिः मातुले पक्षिणीं रात्रिं च पुनः शिष्यर्त्विक्बांधवेषु पितृव्यस्यादिपुत्रेषु पक्षिणीं २३ प्रेतेति राजनि प्रेते सति सज्योतिः सूर्यनक्षत्रयोरन्यतरोपलक्षिते काले संध्यासमये इत्यर्थः यस्य यस्याद्विषये स्थितिः यस्य विषये देशे स्थितिः तस्य मृते तत्र देहः शुद्धिकारणं अश्रोत्रिये मृते अहः कृत्स्नं समयं अनूचाने सांगवेदाध्येतरि तथा गुरौ वेदशास्त्रार्थव्याख्यातरि मृते अहः कृत्स्नं आशौचं २४ शुद्धेदिति पूर्णमाशौचमित्यर्थः २५ नेति अघाहानि अघस्य आशौचस्य अहानि

श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् मातुले पक्षिणीं रात्रीं शिष्यर्त्विग्बांधवेषु च २३ प्रेते राजनि सज्योतिर्यस्य यद्विषये स्थितिः अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ शुध्यादि प्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति २५ न वर्द्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेत् २६ दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति आचम्य प्रयतो नित्यं जपेदशुचिदर्शने शौरान्मंत्रान्यथोत्साहं पावमानीश्च शक्तितः २८

दिनानि न वर्द्धयेत् अग्निषु क्रिया न प्रत्यूहेत् न हन्यात् विघ्नं न कुर्यात् तथा अंतरायः प्रत्यूहः इत्यमरः हावयेन्न तु हापयेत् च पुनः तत् कर्म श्रौतास्निकर्म कुर्वाणः एतेन कर्मणा सनाभ्यः येगोत्रिणः न अशुचिर्भवेत् २६ दिवेति दिवाकीर्तिर्नापितं चांडालं वेति केचित् च पुनः तत्स्पृष्टिनं शवस्पृष्टिनं स्पृष्ट्वा स्नानेन शुध्यति २७ आचम्येति अशुचिदर्शने शौरान्मंत्रान् गायत्र्यादीन् जपेत् च पुनः शक्तितः पावमानीं सूक्तं जपेत् पावमान्यः पुनंतु मामिति

१८५

नारमिति नराज्जातं नारं सस्नेहं नरस्यास्थि स्पृष्ट्वा स्नात्वा शुध्यति द्विजात्यस्थिविषयं शूद्रस्यास्थिस्पर्शने त्रिरात्रमाशौचं
निःस्नेहं शुष्कं अस्थि स्पृष्ट्वा पादं प्रक्षाल्य आचम्य गामालभ्य स्पृष्ट्वा अर्कं वीक्ष्य आलोक्य शुद्धो भवेत् ८६ आदिष्टीति
आदिष्टी ब्रह्मचारी आव्रतस्य समापनात् उदकं जलांजलिं न कुर्यात् व्रतं समाप्य जलांजलिं कृत्वा त्रिरात्रेणैव शुध्यति त
था एतदनंतोनवत्सरे वत्सराभ्यंतरे प्रदानसपिंडे वोद्धव्यं ८७ द्वाभ्यामाह वृथेति वृथा पंचयज्ञरहिताः क्लीबादयो वा
संकरजातीनां च पुनः यतीनां च पुनः आत्मत्यागिनां च पुनः पाखंडमाश्रितानां च पुनः कामतः परतीनां स्ववर्णव्यभि

नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ८६ आदिष्टी नोदकं
कुर्यादाव्रतस्य समापनात् समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ८७ वृथासंकरजातीनां प्रव्रज्यासु च तिष्ठ
तां आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ८८ पाखंडमाश्रितानां च चरंतीनां च कामतः गर्भभर्तृद्रुहां चै
व सुरापीनां च योषितां ८९ आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुं निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ९०
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनां ९१ न राज्ञामघदोषोऽस्ति व्रतिनां
न च सत्रिणां ऐंद्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ९२

चारिणीनां एवं वृथादीनां सुरापानं तानां योषितां उदकदानं जलांजलिदानं क्रियास्तत्कर्मपि निवर्तितेन कुर्यात् ८८ आ
चार्यमिति व्रती ब्रह्मचारी आचार्यादीन् निर्हृत्य दग्ध्वा व्रतेन वियुज्यते ८९ दक्षिणेति दक्षिणेन द्वारेण पुरद्वारेण मृतं शू
द्रं निर्वहेत् निष्कामयेत् यथायोगं यथाक्रमं द्विजन्मानः द्विजातयः तद्यथा पश्चिमेन वैश्य उत्तरेण क्षत्रियं पूर्वे
ण ब्राह्मणोऽपि इति ९१ नराज्ञामिति राज्ञां राजकर्मणि अघदोषः अशौचदोषो नास्ति व्रतिनां पूर्वसंकल्पितव्रते दो
षो नास्ति स्नातकव्रतादिकानां वा सत्रिणां सत्रकर्मणां दोषो नास्ति अघदोषः अशौचकृतमनाधिकारित्वं ऐंद्रस्था

नं परं लोकं उपासीनाः आकांक्षमाणाः एतत्कर्म कुर्वंतो वृत्तभूताः ब्रह्मवत् शुद्धाः हि निश्चयेन तेन तदा एषां शौचाभावः ६४ ग
तद्इति परिरक्षार्थमित्युक्ते महात्मिके स्थाने राज्ञो धनार्थिनं तेया व्यवहारदर्शनेनासौ चाभावः अद्यःशौचं आसनं सिंहासनं
अत्र शौचे कारणं सिंहासनस्थस्याभावः ९८ डिंभाहवहतानां डिंभाहवे अराजक युद्धे अशास्त्र कलहे तत्र हतानां विद्युता
तेन हतानां पार्थिवेन गोब्राह्मणार्थे विपन्नानां मृतानां संबंधिनो ये सपिंडास्तेषामाशौचं न कार्यं डिंभाहवहतादीनां अ
शौचाभावः यस्य पार्थिवः शुद्धत्वं इच्छति तस्य शुद्धः स्वस्वाधिकारस्थले मंत्री पुरोहितादिषु ९७ सोमेति कुतः राज्ञामशौच

राज्ञो महात्मिके स्थाने सद्यःशौचं विधीयते प्रजानां परिरक्षार्थमासनं चात्र कारणं ९८ डिंभाहवहतानां च विद्युता पार्थिवे
न च गोब्राह्मणस्यैवार्थे यस्य चेच्छति पार्थिवः ९७ सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च अष्टानां लोक
पालानां वपुर्धारयते नृपः ९८ लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययं
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः १०० विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रि
यो वाहनायुधं वैश्यः प्रतोदं रश्मिं वा यष्टिं शूद्रः कृतक्रियः १

मित्यपेक्षायामाह सोमादीनां अष्टौ लोकपालानां वपुर्नृपः धारयेत् वित्ताप्पत्योः कुबेरवरुणयोः ९८ लोकेशेति राजा लो
केशैः अधिष्ठितः तस्मात्कारणात् [illegible]: अशौचं न विद्यते अयं राजा लोकेशोऽयं प्रभवो यस्य स लोकेशप्रभवः तस्मा
दशौचाभावः उद्यतैरिति आह वे संग्रामे उद्यतैः शस्त्रैः कृष्णादिभिः व्यवच्छेदरूपैः क्षत्रधर्महतस्य च सद्यः शौचं सद्यः यज्ञः
पितृयज्ञः संततिर्भवति तथा अशौचं सद्यः अशौचं शौचाभावे इति स्थितिः मर्यादा १०० विप्र इति सूतकान्ते कृतक्रियः कृतशौ
चः कृतश्मश्रुवपनादि तैलेन पिंडाकेन सह कृतस्नानः विप्रगृहमागत्य अद्य स्पृष्ट्वा कृताचमनः शुध्यति एवं कृतशौचः क्ष
त्रियः वाहनायुधं स्पृष्ट्वा शुध्यति एवं कृतशौचः वैश्यः प्रतोदं रश्मीन्वा स्पृष्ट्वा शुध्यति एवंविधः शूद्रः कृतशौचः यष्टिं स्पृष्ट्वा

एतदिति २ असपिंडमिति चपुनः मातुः बांधवान् मातुष्वस्रीयादिस्वकान् तत्पितुः ष्वसृपित्रादीन् तथाप्तान् शालादीनि
र्हृत्य दग्ध्वा त्रिरात्रेण सपिंडमिति चपुनः मातृ विशुध्यति ३ यदीति यत् अन्नं अदन् भक्षयन् अह्ने वा अशौचं ४ अन्वेति ५
नेति ५ शूद्रसंस्पर्शगर्हितादूषितायस्यायमः स्वस्थान इति शूद्राग्निं तृणं काष्ठं हवींषि च प्रेतत्वं हि मदात तस्य स्वधर्म
णा लिप्यते ज्ञानमिति ज्ञानं अध्यात्मिकं तपः प्राणायामा अग्निस्पर्श आहारः जलपानादि देहिनां एतानि शुद्धेः क

एतद्वोऽभिहितं शौचं सपिंडेषु द्विजोत्तमाः असपिंडेषु सर्वेषु प्रेतशुद्धिं निबोधत १ असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य
बंधुवत् विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान् २ यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति अनदन्नन्नमह्नैव न चेत्
तस्मिन् गृहे वसेत् ४ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ५
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् अस्वर्ग्या ह्याहुतिः सा स्यात् शूद्रसंस्पर्शगर्हिता ६ ज्ञानं तपोऽग्निराहारो मृन्मनो
वार्युपांजनं वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनां ७ सर्वेषामेव शौचानामर्थशौचं परं स्मृतं योऽर्थे शुचिः स हि
शुचिर्न मृद्वारिशुचिः शुचिः २ सर्वेषामेव शौचानामर्थशौचं परं स्मृतं प्रच्छन्नपापा जप्येन तपसा वेदवित्तमः ६

ऽभिहितमित्यर्थः ७ सर्वेषामिति सर्वेषां शौचानां मध्ये अर्थशौचं मानशौचं इंद्रियनिग्रहादिकं परं उत्कृष्टं स्मृतं यः कश्चन प
दार्थः अर्थे मानसिके शौचे इंद्रियनिग्रहाशुचिः स एव शुचिः मृद्वारिभ्यां शुचिः शुचिर्न किंतु एतादृशः स्वयमेव शुचिः
परमार्थशुचित्वमाह क्षांत्येति विद्वान् क्षांत्या कायक्लेशेन शुध्यति अकार्यकारिणः यत्नाद्धितकारिणः दानेन षंढत्वधादि
नाशुध्यति प्रच्छन्नपापानां अविख्यातदोषाणां अघमर्षणादिश्रुतजाप्येन शुद्धिः वेदवित्तमाह द्विजः तपसा कृच्छ्रादि चांद्रायणादि

मदिति शोध्यं वस्तु अमेध्योपहतं मन्त्रोयैः शुध्यते नद्या वेगेन शुध्यति वर्षावृष्टप्रवाहेन वेगेन नदी शुध्यति मनोदुष्टा मान
सिकव्यभिचारेण स्त्री रजोदर्शनेन शुध्यति संन्यासः प्रव्रज्या द्विजन्मनां मानसोपचारे शुद्धिकृत १० अद्भिरिति गात्राणि अं
गानि हस्तपादादीनि अद्भिः प्रक्षालनेन शुध्यति मनः सत्याचारेण शुध्यति भूतात्मा विद्यातपोभ्यां शुध्यति तत्र विद्या भूतश
देन तद्विकारभूतो देहेन्द्रियसंघोल्लक्ष्यते तेन स्थूलोहं कृशोहं इत्येवं तदभिमानित्वेन गोपमात्मा वर्तते सः भूतात्मा तस्य त
पो विधे शुद्धिनिमित्ते तपः ब्रह्मजिज्ञासस्वेति पंचकोशव्यतिरेकप्रतिपादनपरं वाक्यं विद्याशब्देन चोपनिषदे स्थूलमन

मलो यैः शुध्यते शोध्यं नदी वेगेन शुध्यति रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः १० अद्भिर्गात्राणि शुध्यन्ति
मनः सत्येन शुध्यति विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ११ एवं शौचविधिः प्रोक्तः शारीरस्याविनिर्ण
यः नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयं १२ तैजसानां मणीनां च सर्वस्याश्ममयस्य च भस्मनाद्भि
र्मृदा चैव शुद्धिरुक्ता मनीषिभिः १३

स एव हृस्वसमं गोर्धेयमात्मेत्यात्यपदार्थानिरूपवाक्यजन्यं ज्ञानं विद्या वैखानसाधुपासना वा तपः अनशनादि भूतात्मा
जीवात्मा बुद्धिः सूक्ष्मदेहः ज्ञानेन आत्मज्ञानेन शुध्यति शरीरादिव्यतिरिक्तं संशयविपर्ययरूपत्वेन स्वरूपज्ञानं वि
शोधनं ११ एवमिति नानाविधानां धातूनां तथा द्रव्याणां शुद्धेः निर्णयं शृणुत १२ अथ पात्रद्रव्यशुद्धिमाह तैजसा
नामिति तैजसानां सुवर्णादीनां मणीनां मुक्तादीनां सर्वस्याश्ममयस्य अश्ममयदृषदुपलादीनां तेषां सौवर्णादीनां सो
च्छिष्टानां भस्मवारिणा शुद्धिः उक्ता १३

निर्लेपमिति अब्जं मुक्ताफलशंखसत्यादि राजतं च अनुपस्कृतं रेखादिरहितं अश्मादिना असंस्पृष्टं अद्भिः प्रक्षालनेन
शुध्यति १४ अपामिति हैमं हेमविकारः रौप्यं रौप्यविकारं जलाग्निः संयोगात् तानि वैभौ शुद्धौ भवतः स्वयोन्यैव जला
ग्निसंयोगेनैव निर्णेकः शुद्धिर्गुणवत्तरः उत्कृष्टः १५ ताम्रेति ताम्रमयं कांस्यरैत्याणां येतलानां त्रपुणः रंगस्य च पु
नः सीसकस्य पात्रस्य ताम्रादेः क्षाराम्लोदकेन शुध्यति १६ द्रवाणामिति सर्वेषां द्रवाणां द्रवभूतानां घृतादीनां अस्पृश्य
मारणाधिकस्य काकाद्युपहतस्य अमेध्यसंस्पृष्टस्य सर्वद्रव्यस्य उत्प्लवनं ज्वालीयेन द्रव्यद्रवेण भांडस्यान्तिपूरं गयावन्हि:

निर्लेपं काञ्चनं भांडमद्भिरेव विशुध्यति अब्जमश्ममयं चैव राजतं चानुपस्कृतं १४ अपामग्नेश्च संयोगाद्धैमं रौ
प्यं च निर्बभौ तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः १५ ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च शौचं
यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः १६ द्रवाणां चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतं प्रोक्षणं संहतानां च दारव
णां च तक्षणं १७ मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु
१८ चरूणां स्रुक्स्रुवाणां तु शुद्धिरुष्णेन वारिणा स्फ्यशूर्पशकटानां च मुशलोलूखलस्य च १९

सरणं शुद्धिः संहतानां स्यूतानां पट्टचर्मादीनां बहूनां धान्यवाससां प्रोक्षणं शुद्धिः दारवाणां काष्ठपात्राणां अमेध्यलि
प्तानां तक्षणं शुद्धिः १७ मार्जनमिति जलपात्रीहीनां स्रुकस्रुवादीनां यज्ञकर्मणि प्रयुज्यमानानां दक्षिणेन पाणि
ना कुशसहितेन कर्मांगतया मार्जनं प्रक्षालनं कर्तव्यं च मशानां जलपात्राणां होत्रिचमसादयः ग्रहाणां सोमपात्रा
णां षोडशीप्रभृतीनां शुद्धिः जलप्रक्षालनेन १८ चरूणामिति चरूणां चरुस्थालीस्रुकस्रुवौ प्रसिद्धौ सस्नेहा

निपात्यातिरसतानिलेपरहितानि उष्णेन वारिणा शुध्यंति स्त्रावेजः घृतं काष्ठखड्गः प्रसिद्धः शकटानां स्थानां उष्णेन वारिणा शुध्यन्ति उलूखलस्य च १९ अद्भिरिति बहूनां धान्यवाससां द्रोणाधिकधान्यानां राशीकृतानां प्रोक्षणेनैव शुद्धिः चाण्डालादिस्पृष्टत्वात् २० चैलवदिति चर्मणां शुद्धिः चैलवद्वस्त्रवत् शुद्धं चर्मादि वस्त्रवत् इति वचनात् चर्म अजादीनां तद्विकाराणां छत्रचामरादीनां उपलक्षणं वैदलानां वेत्रवैणवादीनां धान्यवत् प्रोक्षणेन शुद्धिरिष्यते २१ कौशेयेति कौशेयं कृमिकोशोत्थं इत्यमरः कौशेयं कोशप्रभवं पट्टादि आविकं ऊर्णामयं ऊषैः ऊषः स्यात् क्षारमृत्ति

अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते २० चैलवच्चर्मणां शुद्धिः वैदलानां तथैव च शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते २१ कौशेयाविकयोरूषैः कुतुकानामरिष्टकैः श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः २२ क्षौमवच्छंखशृंगाणामस्थिदंतमयस्य च शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा २३ प्रोक्षणात्तृणकाष्ठं च पलालं च विशुध्यति
मार्जनोपांजनैर्वेश्म पुनःपाकेन मृण्मयं २४

केत्यमरः क्षारमृत्तिकासहितोदकेन प्रक्षालनं शुद्धिः कुतपं नेपालकं अरिष्टफलसहितोदकैः अंशुपट्टं वल्कलं तंतुकृतं श्रीफलैः बिल्वफलोदकैः क्षौमाणां अतसीवल्कलजानां अतसीतंतुनिर्मितं क्षौमं गौरसर्षपसहितैः उदकगोमूत्रैः शुध्यति २२ क्षौमवदिति २३ प्रोक्षणादिति पलालं चलमधान्यं वेश्ममार्जनं उदकशोषः उपांजनैर्गोमयादिलिंलिंपनैः मृण्मयं पुनःपाकेन शुध्यति २४

म.स्मृ.टी.
७२

मद्यैरिति मद्याद्यैरुपस्पृष्टं मृन्मयं पुनः पाकेन शुध्यति २४ भूमिशुद्धिमाह संमार्जनमिति संमार्जनादिना पंचधा पंच
प्रकारेण भूमिः शुध्यति पांशुतृणादीनां प्रोत्सारणं मार्जनं उपांजनेन गोमयेनालिप्तेन सेकः क्षीरगोमूत्रगोमयवारि
भिः उल्लेखनेन तक्षणेन भूमिः शुध्यति गृहं मार्जनानुलेपनाभ्यां शुध्यति गृहस्य प्रत्यग्रगृहणे संमार्जनलेपनयोः प्रति
दिवसनिमित्तं २५ पक्षिजग्धमिति पक्षिभिः जग्धं अन्नं गवाघ्रातं गोघ्राणनिश्वासोपहितं अन्नं अवधूतं अवधूतानां पस्पो

मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृन्मयं २४ संमार्जनोपांजनेन सेके
नोल्लेखनेन च गवां च परिवासेन भूमिः शुध्यति पंचधा २५ पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं दूषितं के
शकीटैश्च मृत्प्रक्षेपेण शुध्यति २६ यावन्नापैति मेध्याक्तो गंधो लेपश्च तत्कृतः तावन्मृद्वारि देयं स्यात्सर्वा
सु द्रव्यशुद्धिषु २७ त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयत् अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्य
ते २८ आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः २९

परिच्युतं केशकीटैर्दूषितं एतादृशं अन्नं मृत्प्रक्षेपेण शुध्यति २६ यावदिति अमेध्याक्तः अमेध्याः शरीरजा मला
वसाशुक्रादयः एतैर्वसादिभिः आक्तः आलिप्तः सन् कृतः गंधलेपः यावन्नापैति तावन्मृद्वारि देयं स्यात् मृत्तोयेन
शुद्धिः कर्तव्या सर्वासु द्रव्यजातिषु २७ त्रीणीति स्पृष्टास्पृष्टं अदृष्टं यद्वस्तु अद्भिर्धौतं निर्णिक्तं प्रक्षालितं यच्च शु
द्धिसंदेहो भवति यद्वाचा प्रशस्यते ब्राह्मणब्राह्मणवचनेन शुद्धं भवति २८ आपदीति भूमिष्ठा आपः यासु अप्सु गोर्वै
तृष्ण्यं भवेत् चांडालादिभिः असंस्पृष्टाश्चेत् अमेध्येन अव्याप्ताः असंस्पृष्टा न स्पर्शिताः २९

राम:
७२

नित्यमिति कारुहस्तः कारवो रजकचेलधावकसूपकाद्याः तेषां हस्तः शुचिः शुचित्वं तत्साध्यकर्मणि च वस्त्रधावनादौ सूत
कादिसंभावोपि पण्यं पण्यार्हं विक्रेयं ब्रह्महत्यादिसूतिकादिनिमित्तं प्रसारितं तत् शुद्धं भिक्षाणां समूहो भैक्ष्यं ब्रह्मचा
रिगतं प्राप्तं स्यात् क्रमणादिनापि न दुष्यति ३० नित्यमिति स्त्रीणां आस्यं मुखं संभोगकाले चुंबनादिविषये शुचिः ३१
श्वभिरिति क्रव्याद्भिः व्याघ्रादिभिः एतैर्हतं मांसं शुचिः ३२ शुचिरिति पंथाः संचरणे सोमसूर्यांशुभिः शुचिः वहिश्चरः वायुः ३३

नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितं ब्रह्मचारीगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ३० नित्यमास्यं शुचिः स्त्री
णां शकुनिः फलपातने प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ३१ श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवी
त् क्रव्याद्भिश्च हतस्यान्यैश्चांडालाद्यैश्च दस्युभिः ३२ शुचिरग्निः शुचिर्वायुः सप्रवृत्तो वहिश्चरः जलं शुचि
विविक्तस्थं पंथाः संचरणे शुचिः ३३ ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः यान्यधस्तान्यमेध्यानि देहा
च्चैव मलाश्च्युताः ३४ वसामूत्रमसृङ्मज्जा रेतो विट्कर्णविण्नखाः श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां म
लाः ३५ मक्षिका विप्रुषः छाया गौरश्वः सूर्यरश्मयः रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ३६
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ३७

ऊर्ध्वमिति देहच्युता मलाः अमेध्यानि ३४ मक्षिकेति एतानि मक्षिकादीनि चांडालस्पर्शकृतानि स्पर्शे मेध्यानि निर्दि
शेत् विप्रुषः अल्पजलकणा उच्छिष्टभूताः अवश्यायबिंदवः छाया ह्लादेः गोः अश्वः भूः भूमिः ३५ विण्मूत्रेति विण्मू
त्रोत्सर्गे तयोः शुध्यर्थं मृद्वारि अर्थवत् प्रयोजनवत् गंधाद्यपहारमित्यर्थः ३६ वसेति वसादयो द्वादश नृणां मलाः
रजसो मलकर्षणं मज्जा पूयसत्यायुर्मांसं त्वगादेरुपलक्षणं कर्णविट् स्वदेहमात्रमलानामुपलक्षणं दूषिका नेत्रमलं कीच

मूत्रपुरीषयशौचायमृत्परिमाणमाह एकेति शुद्धिं अभीप्सतापुंसामृदः दातव्याः उभयोः हस्तयोः ३९ एतच्छौचमि
ति कृत्वेति मूत्रपुरीषं कृत्वा हस्तपादौ प्रक्षाल्य आचांतः सन् खानि छिद्राणि मुखादीनि उपस्पृशेत् तत्राह कूर्मपुराणे
अंगुष्ठानामिकाभ्यां चक्षुषी नेत्रद्वयं ततः तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटद्वयं कनिष्ठांगुष्ठयोगेन श्रवणे च
समं स्पृशेत् सर्वासामथ योगेन हृदयं तु तलेन च संस्पृशेद्वै शिरस्तद्वदंगुष्ठेनाथवा द्वयं इति वेदं अध्येष्यमाणः वेदाध्य
यनं कुर्वाणः अध्ययनादौ नाचांतः त्रिः आचम्य खानि छिद्राणि स्पृशेत् च पुनः स्नाने भोजनं कुर्वं आरादेव आचमेत् अ

एका लिंगे गुदे तिस्रस्तथा वामकरे दश उभयोः सप्त दातव्याः मृदः शुद्धिमभीप्सता ३९ एतच्छौचं गृहस्थानां द्वि
गुणं ब्रह्मचारिणां त्रिगुणं वानप्रस्थानां यतीनां च चतुर्गुणं ३९ कृत्वा मूत्रपुरीषं तु खान्याचांत उपस्पृशेत् वेद
मध्येष्यमाणश्चाप्यन्नमश्नंश्च सर्वदा ४० शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनां वैश्यवच्छौचकल्पश्च द्वि
जोच्छिष्टं तु भोजनं त्रिराचमेदपः पूर्वं द्विः प्रमृज्य ततो मुखं शारीरं शौचमिच्छन् हि स्त्री शूद्रस्तु सकृत् सकृत् ४१ शूद्रा
नोच्छिष्टं कुर्वते मुख्याः विप्रुषोऽगं न यांति याः न श्मश्रूणि गतान्यास्यं न दंतांतराधिष्ठितं ४२

चांतः पुनराचामेदित्यर्थः ४० त्रिराचमेदिति त्रिः त्रीन्वारान् आचमेत् अपः पूर्वं ततः मुखं द्विः प्रमृज्यात् स्त्रीशूद्रयोः
शाकृत् तालुगाः आपः स्पृष्टा शुध्यंति ४१ शूद्रधर्ममाह न्यायवर्तिनां शूद्राणां मासिकं मासि मासि वपनं अध्याद्धं कार्यं
न्यायवर्तिनां शूद्राणां वपनं क्षौरं कार्यं वैश्यवत् शौचकल्पः पंचदशदिनपर्यंतः द्विजपाकभांडं विशिष्टं द्विजो
च्छिष्टं भोजनं द्विजैर्दत्तं कार्यं शूद्रस्तु द्विजसेवया इति वाक्येन ४२ नोच्छिष्टमिति यः विप्रुषः अंगं न यांति ना प्राप्नुवंति

नामुख्याः मुखोद्भवाः उच्छिष्टं न कुर्वंते पद्यं गंगच्छंति तद्यं गस्पृष्टान्नात् शुद्धिः आस्यं मुखं गतानि प्रविष्टानि श्मश्रू
णि गतानि लं वृत्तानि नोच्छिष्टं कुर्वंति दंतांतराधिष्ठितं दंतश्लेषाचान्नादिकं न उच्छिष्टं करोति अच्युतं दंतसमं संयदंत
वदंतश्लेषु जिह्वास्पर्शं शुचिर्भवेत् इति वाक्येन ७३ स्पृशंतीति यो विंदवः आचमयतः परान् समीपवर्तिनः द्विजाननैः
विंदुभिः अप्रयतः अशुचिः न भवेत् भौमिकैः भूमिसंबंधिकैः समास्ते याः ७४ उच्छिष्टेनेति द्रव्यहस्तः अग्निपक्वाद्

स्पृशंति विंदवः पादौ य आचमयतः परान् भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् उच्छिष्टेन तु संस्पृष्टो द्रव्य
हस्तः कथंचन अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् ७५ वांतो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्
आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतं ७६ सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च पीत्वापोऽध्ये
ष्यमाणश्च आचामेत्प्रयतोऽपि सन् ७७ एष शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च उक्तो वः सर्ववर्णानां
स्त्रीणां धर्मान्निबोधत ७८ बालया वा युवत्या वा वृद्धया वापि योषिता न स्वातंत्र्येण कर्तव्यं किंचित्कार्यं
गृहेष्वपि ७९ बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने पुत्राणां भर्तरि प्रेते न भजेत्स्वतंत्रतां ८० पि
त्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ८१

द्रव्यहस्तः हस्तगतभक्ष्यं वस्तु उच्छिष्टेन पुरुषेण संस्पृष्टः तद्द्रव्यं तद्धस्तु भूमौ अनिधाय आचांतः सन् शुचितां इयात् प्रा
प्नुयादित्यर्थः ७५ वांतेति विरिक्तः कृतविरेचः कृतपुरीषः मिथुनिनः मैथुनकर्तुः ऋतावपि गमने न शुध्यति यस्मादि
कार्यार्थं ७६।७७।७८ स्त्रीधर्मानाह न स्वातंत्र्यं स्त्रिया क्वचिदित्यर्थः ७९ बाल्येपि पाणिग्रहस्य भर्तुर्यौवने वसे तिष्ठे
त् भर्तरि प्रेते पुत्राणां वसे तिष्ठेत् ८० पित्रेति पित्रादीनां एषां विरहेन स्त्री उभे कुले गर्ह्ये कुर्यात् ८१ श्री १४७

सदेति व्ययेद्रव्यस्य आयव्यये अमुक्तहस्तया संयतहस्तया व्यय पराङ्मुखी भाव्येत्यर्थः ५० तस्मै दद्यादिति संस्थितं
मृतं तत्कर्म न लंघयेत् न व्यभिचरेत् ५१ मंगलार्थमिति स्वस्त्ययनं स्वस्तिवाचनं आसां यज्ञः विवाहहोमः प्रजापते

सदा प्रहृष्टया भाव्यं गृहकर्मसु दक्षया सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ५० यस्मै दद्यात्पिता त्वेनां भ्राता
वानुमते पितुः तं शुश्रूषेत जीवंतं संस्थं न च लंघयेत् ५१ मंगलार्थं स्वस्त्ययनं यज्ञस्त्वासां प्रजापते प्रयुज्यते विवा
हेषु प्रदानं स्वाम्यकारकं ५४ अनृतावृतुकाले च मंत्रसंस्कारकृत्पतिः सुखस्य नित्यं दाता हि परलोके च योषिता ५५
विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः उपचर्यास्त्रिया साध्व्या सततं देववत्पतिः ५६ दानप्रभृति या तु स्याद्यावदाय
पतिव्रता भर्तृलोके न त्यजति यथैवारुंधती तथा ५७ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं पतिं शुश्रूषते
येन तेन स्वर्गे महीयते ५८ पत्यौ जीवति या तु स्त्री उपवासव्रतं चरेत् आयुष्यं हरते पत्युः नरकं चैव गच्छति ५९
पाणिग्रहस्य साध्वी स्त्री जीवतो वा मृतस्य वा पतिलोकमभीप्सेत न चरेत्किंचिदप्रियं ६० कामं तु क्षपयेद्देहं पुष्प
मूलफलैः शुभैः न तु नामापि च गृह्णीयात्पत्यौ प्रेते परस्य तु ६१ आसीतामरणात्क्षांता नियता ब्रह्मचारिणी यो
पतीधर्म एकपत्नीनां कांक्षंती तमनुत्तमं ६२ अनेकानि सहस्राणि कौमारब्रह्मचारिणः दिवं गतानि विप्राणामकृ
त्वा कुलसंततिम् ६३

कन्याया आधिदेवताया स्वाम्यकारकं स्वाम्यत्वं कारकं ५४ अनृतावितित ५५ विशीलं इति विशीलः शीलरहितः निष्ठु
र इत्यर्थः कामवृत्तः अन्यस्त्रीशक्तः गुणैः विद्यादिभिः परिवर्जितः ५६ दानेति दानप्रभृति कन्यादानप्रभृतिः ५७ नास्ती
ति पत्याविति पाणीति ६० काममिति परस्य अन्यस्य नाम अपि न गृह्णीयात् किंपुनः अन्यत्स्पर्शालापादि ६१

आसीतेति धर्मं एकपत्नीनां पतिव्रतानां पतिधर्मपरायणानां तं धर्मं अनुत्तमं को वेत्ति ६३ अनेकेति द्वाभ्यामाह युग्मं कौमारब्रह्मचारिणां विप्राणां अनेकानि सहस्राणि अकृत्वा कुलसंततिं दिवंगतानि साध्वी स्त्री मृते भर्तरि ब्रह्मचर्ये वास्थिताः अपुत्रापि स्वर्गं गच्छति यथा ते ब्रह्मचारिणः स्वर्गं गताः ६३।६४ अपत्येति पुत्रस्य लोभात् या स्त्री भर्तारं अतिवर्तते तेन ततः अतिक्रम्य अन्यत्र गच्छति सा निंदां आप्नोति ६५ नेति अन्योत्पन्नापरपुरुषोत्पन्ना स्त्रीणां प्रजा न

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ६४ अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते सेह निंदामवाप्नोति पतिलोकाच्च हीयते नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे: न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ६६ पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते निंद्यैव सा लोके भवति परपूर्वेति चोच्यते व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निंद्यतां शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ६८ पतिं या नाभिचरति मनोवाक्कायसंयुता सा भर्तृलोकमाप्नोति सद्भिः साध्वी प्रचोच्यते ६९ अनेन नारीवृत्तेन मनोवाग्देहसंयुता इहाग्र्यां कीर्तिमाप्नोति पतिलोके परत्र च ७० एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीं दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ७१

भवेत् मुक्तानुभवेदित्यर्थः यपुनः अन्यपरिग्रहे अपि न प्रजानयुक्ताभवेत् ६६ पतिमिति या स्त्री स्वपतिं अपकृष्टं पुंस्त्वरहितं हित्वा उत्कृष्टं अन्यं वा निषेवते सा परपूर्वेत्युच्यते ६७ व्यभिचारेति भर्तुः शकाशात् ६८ पतिमिति ६९ अनेनेति अनेन वृत्तेन भर्तृशुश्रूषणेन नारी ७० एवमिति पूर्वं मारिणीं स्त्रीं अग्न्युत्थापनपात्रसंबंधिनीभिर्यज्ञपात्रैः सह अग्निहोत्रस्याग्निना दाहयेत् ७१

भार्यायेति पूर्वं मारिण्ये अरणीपात्रसंबंधिन्यै भार्यायै अंत्यकर्माणि अग्नीन् प्रदानीन् दत्वा पुनः दारक्रियां कुर्यात् च पुनः आधानं अग्न्याधानमपि कुर्यात् १२ अनेनेति कृतदारो गृहे वसेत् इति वा पाठः इति श्रीरामचंद्रभट्टविरचिते पंचमोध्यायः ५ अत्र इति ब्रह्मचारी गृहस्थयोः धर्मो प्रतिपादिता अतः अधुना वानप्रस्थधर्मानाह वैखानसाश्रमे वैखानसशास्त्रप्रयुक्तं आश्रमं च पुनः वन्यमूलफलादीनां विधिवत् प्रतिप्रस्थीयते अनेनेति सः वानप्रस्थ एव वान

भार्यायै पूर्वमारिण्यै दत्वाग्नीनंत्यकर्मणि पुनर्दारक्रियां कुर्यात्पुनराधानमेव च १२ अनेन विधिना नित्यं पंचयज्ञान्न हापयेत् द्वितीयमायुषो भागं गृहेषु ब्राह्मणो वसेत् १३ इति मानवे धर्मशास्त्रे गृहस्थाश्रमवर्णने पंचमोध्यायः ५ अतः परं प्रवक्ष्यामि धर्मं वैखानसाश्रमे वन्यमूलफलानां च विधिं ग्रहणमोक्षणे १ एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः वने वसेत्तु नियतो यथावद्विजितेंद्रियः २ गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ३ संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदं पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ४ अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदं ग्रामादरण्यं निःसृत्य निवसेन्नियतेंद्रियः ५

प्रस्थ साहचर्ये २ १२ गृहस्थेति यदा आत्मनः वलीपलितं पश्येत् जराजर्जरं पश्येत् ३ संत्यजेति ग्राम्यं आहारं गोभूतिलहिरण्यादि च पुनः सर्वं परिच्छदमपि गोभूतिलहिरण्यादि यापत्यांतरं प्रति परिचर्याभिलाषिन स्वपमपि वनं गंतुं मिच्छति तर्हि तया पत्न्यैव सह वनं गच्छेत् ४ अग्निहोत्रमिति अग्निहोत्रं वैतानाग्निं गृह्यं आवसथ्याग्निं च पुनः अग्निपरिच्छदं समादाय अजिनं स्रुक्स्रुवाजिनादि ग्रामान्निःसृत्य अरण्ये निवसेज्जितेंद्रियः सन् ५ श्री ६ ७

मुन्निरिति अकृष्टक्षेत्रोद्भवैः मुन्यन्नैः नीवारवेणुश्यामाकशाकादिभिः एभिरन्यन्नादिभिः एतान्येव महायज्ञान्वि
धिपूर्वकं निर्वपेदेव वसीतेति चर्म कृष्णाजिनादि चीरं वल्कलं कृतं प्रगे प्रातः समये ७ यदिति ततः भक्ष्याद्बलिं दद्या
त् बलिं पदं महायज्ञोपलक्षणं च पुनः शक्तितः भिक्षां दद्यात् ८ स्वाध्यायेदिति दांतः जितेंद्रियः स्यादिति सर्वत्र
संबंधः मैत्रः मैत्रीपरः समाहितः नियतचित्तः नित्यं दाता स्यात् ९ वैतानिकमिति यथा वैतानिकं अग्नित्र[illegible]

मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा एतान्येव महायज्ञान्निर्वपेद्विधिपूर्वकं ६ वसीत चर्म चीरं वा
सायं स्नायात्प्रगे तथा जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ७ यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां
च शक्तितः अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ८ स्वाध्याये नित्ययुक्तः स्याद्दांतो मैत्रः समाहितः
दाता नित्यमनादाता सर्वभूतानुकंपकः ९ वैतानिकं च जुहुयादग्निहोत्रं यथाविधि दर्शमस्कंदयन्पर्व पौ
र्णमासं च योगतः १० ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् उत्तरायणं च क्रमशो दक्षस्यायनमेव च
११ वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक्पृथक् १२

[illegible]साध्यं च पुनः अग्निहोत्रं यथावत् आदिकं होमद्रव्यसाध्यं दर्शं श्राद्धं अस्कंदयन् अलंघयन् च पुनः योगतः पौर्णमासं प
र्वस्कंदयन् १० ऋक्षेष्ट्याति ऋक्षेषु कृत्तिकादिषु आग्रयणे आगतमेव च पुनः उत्तरायणं संवत्सरइष्टिं विशेषः
दक्षस्यायनं नैमित्तिकयज्ञशाखायां दशायनं संज्ञं ११ वासंतेति वासंतादि शारदैर्वार्षिकश्यामाकादि रूपलक्षणैः १२

दिवतेति च पुनः स्वयंकृतं लवणं हस्तादिनारकृतं युंजीत भुंजीत् १२ स्थलजेति स्थलजं वास्तुकादि उदकशाकानि मोचका
दीनि च पुनः फलसंभवांश्च स्नेहान् अद्यात् भक्षयेत् १४ वर्जयेदिति कवकानि छत्राकानि शिग्रुकं शोभाञ्जनं श्लेष्मातकफलानि ल
मेत इति फलानि मालास्तृणं भूस्तृणो इत्यमरः त्यजेति वासांसि जीर्णानि १५ नेति फालकृष्टं हलोत्कृष्टं केनचिदुत्सृष्ट
नाश्नीयात् सद्य इति सद्यःप्रक्षालकः वा स्यात् तदहः पर्याप्तकः स्यात् संचयरहित इत्यर्थः च पुनः समानिचय एव वा वर्षपर्या

देवताभ्यस्तु तद्धुत्वा मन्ये मेध्यतरं हविः शेषमात्मनि भुंजीत लवणं च स्वयंकृतं १३ स्थलजौदकशाकानि पुष्पमू
लफलानि च मेध्यवृक्षोद्भवानद्यात्स्नेहांश्च फलसंभवान् १४ वर्जयेन्मधुमांसानि भौमानि कवकानि च भूस्तृणं शि
ग्रुकं चैव श्लेष्मातकफलानि च १५ त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितं जीर्णानि चैव वासांसि शाकमूलफला
नि च १६ न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् न ग्रामजातान्यार्तोऽपि पुष्पाणि च फलानि च १७ अग्निपक्वाश
नो वा स्यात् कालपक्वभुगेव वा अश्मकुट्टो भवेद्वापि दन्तोलूखलिकस्तथा १८ सद्यःप्रक्षालको वा स्यान्माससंचयिको
पि वा षण्मासनिचयो वा स्यात्समानिचय एव वा १९ नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः चातुर्थ
कालिको वा स्यात्स्याद्वाप्यष्टमकालिकः २०

प्राग्भमे वहायनो ब्रीहिः शरत्समाः इत्यमरः वर्षपर्याप्तान्नसंचयवानित्यर्थः १९ नक्तमिति दिवा आहृत्य आनीय शक्तितः
अन्नं नक्तं नक्तकाले अश्नीयात् नक्तभोजनं नक्तकालमाह आत्मनो द्विगुणां छायामतिक्रामति भास्करः तं नक्तं नक्तका
लमित्याहुः न नक्तं निशि भोजनं चतुर्थकालिको वा स्यात् एकस्मिन् दिने दिवा भुक्त्वा द्वितीयदिने त्वभुक्त्वा तृतीयदिने
दिवा नक्तयोः भोजनमिति चतुर्थकालिकत्वं अष्टमकालमाह सायंप्रातर्भोजनकालत्वात् प्रत्यहं द्वौ कालौ भवतः एवमष्ट

चांद्रायणेति पक्षांतयोः शुक्लकृष्णयोः अंते मासांते ऽश्नीयात् मासोपवास इत्यर्थः पक्षापक्षांतयोः शुक्लपक्षांते कृष्णपक्षांते
वाश्नीयात् पक्षगमे पवाश्नीयात् इति योगीश्वरः क्वथितां यवागूं नीवारादिचूर्णविकारं २१ पुष्पेति केवलैः अन्नांतरासंसृष्टैः
स्वयं शीर्णैः फललोकग्रादिजनेन शक्तिहीनैः वैखानसमते स्थितः वानप्रस्थाश्रमस्थः २२ भूमाविति भूमौ विपरिवर्तेत इतस्
ततो भ्रमन् विपरिवर्तेत दिनं प्रपदैः पदाग्रैः तिष्ठेद्वा प्रपदं तु पदाग्रं स्यादित्यमरः २३ स्थानासनाभ्यां विहरेत् स्थानः कदाचि
दूर्ध्वस्थितः कदाचिदुपविष्टः ताभ्यां स्थानासनाभ्यां विहरेत् सवनेषु अपः उपनयन् त्रिषवणं स्नानं कुर्वन् २३।२४ उपस्पृ

चांद्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत् पक्षांतयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् २१ पुष्पमूलफलैर्वापि केव
लैर्वर्तयेत्सदा कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः २२ भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनं स्थानासनाभ्यां
विहरेत्सवनेषूपयन्नपः २३ ग्रीष्मे पंचतपास्तु स्यात् वर्षास्वभ्रावकाशकः आर्द्रवासास्तु हेमंते क्रमशो वर्द्धयं
स्तपः २४ उपस्पृशन् त्रिषवणं पितॄन्देवांश्च तर्पयेत् तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः २५ अग्नीनात्म
नि वैतानान्समारोप्य यथाविधि अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः २६ अप्रयत्नः सुखार्थेषु ब्रह्मचारी
धराशयः शरणेष्वममश्चैव वृक्षमूलनिकेतनः २७ तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् गृहमेधिषु
धान्येषु द्विजेषु वनवासिषु २८

शेदिति त्रिषवणे त्रिषु सवनेषु त्रिकालेषु उपस्पृशेत् २५ अग्नीति अग्नीन्वैतानान् आत्मनि समारोप्य अनग्निः पाका
दिरहितः अनिकेतः स्यात् गृहरहितः स्यान्मुनिः २६ अप्रयत्नेति शरणेषु वृष्ट्यादिनिवारककुटीरादिषु अममः निर्ममः भवे
त् २७ तापसेष्वेति विप्रेषु यात्रिकं प्राणयात्रामात्रं यावता प्राणधारणं तावद्भैक्ष्यं आहरेत् आचरेत् च पुनः अन्येषु गृहमेधिषु
वनवासिषु भैक्ष्यं आचरेत् २८

म॰स्मृ॰टी॰
७७

ग्रामादिति पाणिना दक्षिणेन प्रतिगृह्य अष्टौ ग्रासान् अश्नीयात् शकलेन वा शरावखंडेन २९ पुष्पं एतानिति एतान्पूर्वो
क्तान् व्रतान् च पुनः अन्यान् मासोपवासव्रतादीन् वा विप्रः वने वसन् सेवेत तु च पुनः दीक्षां वानप्रस्थदीक्षां सेवेत च पुनः आत्म
ऋषिभिः च पुनः गृहस्थैः वानप्रस्थैः सेविता धर्मा विद्यातपोविवृद्ध्यर्थं च पुनः शरीरस्य शुद्धये सेवते तिसर्वं त्रसंबंध
अपराजितामिति अपराजितां ईशानीं आस्थाय अजिह्मगः सन्व्रजेत् कीदृशः वानप्रस्थः शरीरस्य आनिपातात् युक्तः
नियतचित्तः पुनः कीदृशः वार्यनिलाशनः वार्धारो वा अनिलाधारो वा ३२ आसामिति आसां महर्षिचर्याणां वे

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसेत् प्रतिगृह्य पुटेनैव पाणिना सकलेन वा २९ एताश्चान्याश्च सेवेत दीक्षा
विप्रो वने वसन् विविधाश्चोपनिषदीरात्मसंशुद्धये श्रुतीः ३० ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः विद्या
तपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ३१ अपराजितां च आस्थाय व्रजेद्दिशमजिह्मगः आनिपाताच्छरीरस्य युक्तो
वार्यनिलाशनः ३२ आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुं वीतशोकभयो विप्रो ब्रह्मलोके महीयते ३३
वनेषु संविहृत्यैवं तृतीयं भागमायुषः चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेत् ३४ आश्रमादाश्रमं गत्वा हु
तहोमो जितेन्द्रियः भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्द्धते ३५ अथ संन्यासप्रकाशप्रकरणं ऋणानि त्रीण्य
पाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ३६

चातपः प्रभृतीनां मध्ये अन्यतमया वा चर्यया तनुं त्यक्त्वा विप्रः ब्रह्मलोके महीयते कीदृशः विप्रः वीतशोकभयापाय
लौकिकभयं ३३ अथ संन्यासाश्रमप्रकरणं वनोक्तिति एवं आयुषः तृतीयभागं नीत्वा चतुर्थं आयुषः भागं नीत्वा सं
गान्सर्वान्त्यक्त्वा परिव्रजेत् संन्यसेत् ३४ आश्रमादिति भिक्षाबलिपरिश्रान्तः भिक्षाबलिभ्यां रहितः सर्वपराहितेन हु
तहोमः शिखासूत्रपरित्यागे कृतहोमः एतादृशः प्रव्रजेत् प्रेत्य परलोके वर्द्धते मोक्षं प्राप्नोति लिंगदेहाधनवाछिन्नवि

राम
७७

भुत्वं मोक्षं त्वं एवं यन् नन्प्राप्नोतीत्यर्थः ३५. ऋणानीति त्रीणि ऋणानि अपकृत्य परिहृत्यमाणः मोक्षे निवेशयेत् देवर्षिपितृ
ऋणानि यज्ञेन दैवं ऋणं वेदाध्ययने नार्षं पुत्रोत्पादने न पैत्रिकं ऋणमेतद् ऋणत्रयं अपाकृत्य परिहृत्य परिव्रजेत् तु पुनः त्रीणि
ऋणानि अनपाकृत्य अनपाहृत्य मोक्षं सेव्यमानः अधः प्रव्रजति पतति ३६ अधीत्येति मोक्षे मोक्षसाधने संन्यासे मनः निवे
शयेत् ३ अनधीत्येति द्विजः नैष्ठिकादिः तथा च श्रुतिः ब्राह्मणः प्रव्रजतीति ३७ प्राजापत्यामिति प्राजापत्यां प्रजापतिदैवत
संबंधिं निरूप्येष्टिं कृत्वा सर्ववेदसदक्षिणां सर्वं वेदो धनं दक्षिणा यस्याः सा सर्ववेदसमेव सा वेदसं सर्वस्वदक्षिणां आ

अनधीत्य विधिवद्वेदान् अनुत्पाद्य तथा सुतान् अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ३७ प्राजापत्यां निरूप्ये
ष्टिं सार्ववेदसदक्षिणां आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ३८ यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात्
तस्य तेजोमया लोका भवंति ब्रह्मवादिनः ४० यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयं तस्य देहाद्विमुक्तस्य भयं
नास्ति कुतश्चन ४१ आगारादभिनिःक्रांतः पवित्रोपचितो मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ४२ एक
एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् । सिद्धिमेकस्य संपश्यन् न जहाति न हीयते ४३ अनग्निरनिकेतः स्यात् ग्राम
मन्नार्थमाश्रयेत् उपेक्षकोऽसंकसुको मुनिर्भावसमाहितः ४४

त्मनि अग्नीन् वैतानाग्नीन् श्रुत्युक्तविधानेन समारोप्य ब्राह्मणः एवं गृहात् प्रव्रजेत् न तु क्षत्रियादि ३८ यदिति ४० यस्मादि
ति यस्माद्द्विजो भूतानां अण्वपि अनु अपि भयं न उत्पद्यते न जायते यस्य द्विजस्य देहात् विमुक्तस्य कुतश्च न कस्मिन्नपि लो
के भयं नास्ति न विद्यते इत्यर्थः ४१ आगारादिति आगाराद्गृहात् अभिनिःक्रांतः पवित्रजपयज्ञादिभिः संपूर्णः समुपोढेषु
कामेषु सम्यक् अनुभूतेषु कामेषु मुनिः परिव्रजेत् ४२ एकेति एक एव एकाकी सन् मोक्षार्थं असहायवान् न जहाति न ही
यते द्वितीयपरिग्रहात् स्वयं न किंचित् जहाति ते न जहाति न त्यजति न हीयते द्वितीयपरिग्रहात् न च स्वयं त्यजेत् ४३ अ

नाग्निरिति अनिकेतः उपेक्षसाधकः प्राप्तिभोगसाधने उपेक्षशीलः असंचयिकः प्राणपात्रार्थं अगृहीतधनः मुनिभाव
समन्वितः ४४ कपालमिति खल्वल्पादि खंडे समता मैत्रीवृत्तिः मुक्तस्य त्यक्तस्य संगलक्षणं अतिवैराग्यमित्यर्थः ४५ नेति
निदेशं भृतिः ४६ ग्रैष्मानिति वर्षासु चातुर्मास्ये एकत्र एकस्मिन् ग्रामे संवसेत् ४७ असंपेसूर्यदर्शनं मार्गं न गच्छेत रात्रौ
न गच्छेदित्यर्थः ४८ सत्यामिति कस्यापि अपकारिणीं वाचं न वदेत् कल्कान्वितां सपापां न वदेत् कल्कोऽस्त्री श्राममलेन संदुत्यम
रः चपुनः परुषां वाचं न वदेत् चकारः समुच्चयार्थः चपुनः हिंस्रां वाचं न वदेत् चपुनः नृशंसां निधां न वदेत् तथ्यां पेशु

कपालं वृक्षमूलानि कुचैलमसहायता समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणं ४५ नाभिनंदेत मरणं नाभिनंदेत जीवनं
कालमेव प्रतीक्षेत निदेशं भृतको यथा ४६ ग्रैष्मान् हैमंतिकान्मासानष्टौ भिक्षुर्विचक्रमेत् दयार्थं सर्वभूतानां वर्षास्वे
कत्र संविशेत् ४७ नास्यं यं हि युज्येन्मार्गेणाद्भूमिमाक्रमेत् परिभूताभिरद्भिस्तु कार्यं कुर्वीत नित्यशः ४८ सत्यां वा
च महिंस्रां च वदेदनयकारिणीं कल्कान्वितामपरुषां मनृशंसां पापवेशनीं ४९ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं ज
लं पिबेत् सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ५० अतिवादांस्तितिक्षेत नावमन्येत किंचन नचैनं देहमाश्रि
त्य वैरं कुर्वीत केनचित् क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ५१
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः आत्मनैव सहायेन सुखार्थी विचरेदिह ५२

न्यां वाचं न वदेत् असत्यां वाचं न वदेत् ४९ दृष्टिपूतामिति मनःपूतां समाचरेत् ४९ अतीति अतिवदं अनिष्टभाषणं
तितिक्षेत सहेत ५० क्रुध्यंतमिति आक्रुष्टः कुशले शुभं वदेत् सप्तद्वारावकीर्णां चक्षुस्त्वक्श्रोत्रघ्राणरसनमनोहं
कारेषु विवक्षितां तद्विषयाधीनां वाचं न वदेत् अनृतां वाचं न वदेत् ५१ अध्यात्मेति निरामिषः निष्प्रतिग्रहः ५२

ने चेति न नक्षत्राङ्गविद्यया ज्योतिर्विद्यया षडङ्गया अनुशासनवादाभ्यां वेदाध्ययनकथाप्रवर्त्तिभ्यां न भिक्षां लिप्सेत ५३ नतापसैरिति तापसादिभिराकीर्णं आगारं गृहं न उपसंव्रजेत् वयोभिः पक्षिभिः श्वभ्यादिभिः अन्यैर्वण्यादिभिः आकीर्णं ५४ नीचेति नीचकेशनखश्मश्रुपात्री दण्डी कुसुंभवान् कुसुंभं कमण्डलुं दधात् अतैजसानीति तस्य यतेः पात्राणि निर्व्रणानि अधातुकानि तेषां पात्राणां अद्भिः शौचं प्रक्षालनं स्मृतं ५६ अलाबुरिति वैदलं पात्रं वैणवं पात्रं ५७ एककालमि

आत्मनैव सहायेन सुखार्थी विचरेदिह ५२ न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ५३ न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंवसेत् ५४ नीचकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ५६ अलाबु दारुपात्रं वा मृन्मयं वैदलं तथा एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ५७ एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे भैक्ष्ये प्रसक्तो हि यतिः विषयेष्वपि सज्जति ५८ विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ५९ अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् प्राणयात्रिक एव स्यान्मात्रासङ्गाद्विनिर्गतः ६० अभिपूजितलाभांश्च जुगुप्सेतैव सर्वशः अभिपूजितलाभैस्तु यतिर्मुक्तोऽपि बध्यते ६१

ति विस्तरे भिक्षाविस्तरे न प्रसज्येत न संसक्तो भवेत् ५८ अलाभ इति शरावसंपाते पाकस्य शेषे नेमत्राम यथा तथा नेनिर्णे प्रक्षालिते इत्यर्थः एतादृशकाले यतिः भिक्षां चरेत् ५९ अलाभ इति अलाभे भिक्षालाभे न विषादी स्यात् प्राणयात्रिक एव स्यात् यावद्देहेन प्राणानां यात्रिकः निर्वाहः स्यात् तावदेव ग्राह्यं नाधिकमित्यर्थः मात्रासङ्गात् मात्रापरिच्छेदः दण्डकमण्डलुकंबलादीमात्रा शब्दस्पर्शरूपरसगन्धेभ्यः पार्थवस्त्रादिसंगात् विनिर्गतः रहितः भवेदित्यर्थः ६० अभिपूजितेति

अल्पान्नेति अल्पान्नानां अभ्यवहारेणाचूरहः स्थानासनेन विषयैः शब्दादिभिः ह्रियमाणानि इंद्रियाणि निवर्तयेत ५९ अ
वेक्षेतेति वर्त्यमानगतागत्यः अवेक्षेत यमस्तं वैयमलोके ६० इंद्रियाणां निरोधोपायत सासंसारस्वरूपनिरूपणमाह चतुर्भिः
विप्रयोगमिति जरया वाभिभवनं जरयावलीपालितादि अभिभवो रूपविपर्ययः अवेक्षेत पश्येत व्याधिभिः उपपीडनं
अवेक्षेत विप्रैः पुत्रादिभिः अप्रियैः चौरव्याधादिभिः ६१ देहादिति अस्माद्देहात्प्राणानामुत्क्रमणं निःक्रमणं अवेक्षेत
अभ्यंतरात्मनः जीवस्य सतीगतीः जन्मानि योनिकोटिसहस्रेषु अवेक्षेत तद्यथा स्वधर्मकारस्वर्गसाधनेकजातिषु जन्म नि
वर्त्ययेदित्यर्थः अधर्मेति अधर्मप्रभवं अधर्मस्य उत्पन्नं अवेक्षेत धर्मार्थयोः प्रभवं अवेक्षेत ६२ सूक्ष्मतामिति संसारस्वरूपं

अल्पान्नाभ्यवहारेण रहस्थानेन च अहिंसया च भूतानाम् अमृतत्वाय कल्पते ६३ अवेक्षेत गतीर्नृणां कर्मदोषसमु
द्भवाः निरये पतनं चैव यातनाश्च यमक्षये ६४ विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः जरया चाभिभवनं व्याधि
भिश्चोपपीडनं ६५ देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवं योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ६६ अधर्मप्रभ
वं चैव सुखसंयोगमक्षयं ६७ सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ६८ गृह
स्थोऽपि चरेद्धर्मं यत्र तत्राश्रमे वसेत् समः सर्वेषु भूतेषु नालिंगधर्मकारणं ६९ फलं कतकवृक्षस्य यद्यप्यंबुप्रसादकं
न नामग्रहणादेव तस्य वारि प्रसीदति ७० संरक्षणार्थं जंतूनां रात्रावहनि वा द्विजः शरीरस्यात्यये चाहे समीक्ष्य वसुधां च
रेत् ७१ प्राणायामो ब्राह्मणस्य त्रयोपि विधिवत्कृताः व्याहृतिः प्रणवैर्युक्ता विज्ञेयं परमं तपः ७२ दह्यंते ध्मायमा
नानां धातूनां हि यथा मलाः तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् ७४

वेक्षानंतरं किं कार्यमित्यत आह योगेन योगाभ्यासेन परमात्मनः सूक्ष्मतां दुर्ग्रहतां अवेक्षेत ६५ गृहस्थ इति गृहस्थः य
त्राश्रमे स्थितः सर्वेषु भूतेषु समः सर्वत्र मैत्रीपरः लिंगं आश्रमलिंगं स्वरूपं धर्मकारणं न भवेत् ६६ तत्र दृष्टांतमाह नहि त
स्य फलस्य नामग्रहणादेव वारिणः प्रसीदति निर्मलं भवतीत्यर्थः तथाश्रमधारणान्न धर्मं न भवतीत्यर्थः ७० संरक्षणेति शरी
रस्यात्यये शरीरपीडा मा भूदिति जंतूनां संरक्षणार्थं समीक्ष्य वसुधां चरेत साद्विजः इति पाठः चरेत ७१ प्राणायामेति ७२ ३

धे तद् इति तस्या दोषाः विषयाभिषंगाः प्राणस्य वायोर्निग्रहा दह्यंते ७४

रामः
७९

प्राणायामेति प्राणायामैः दोषान् वाह्येंद्रियजानदयहेत् धारणाभिः चित्तस्य अनवस्थायरणाभिः किल्विषं योग
प्रतिबंधकं दहेत् प्रत्याहारेण विषयेभ्यो मनसः आकर्षणात् संसर्गान् विषयान् दहेत् ध्यानेन निराकारानुचिंतने
नानीश्वरान् ऐश्वर्यप्रतिबंधकान् बुद्धिविषयमानस्वरूपे स्वयं निरोधनो गुणान् रागद्वेषौ मोहकारान् दह्यात्
हीन् दहेत् ७५ उच्चेति उच्चावचेषु ब्रह्मादिकीटपर्यंतेषु अस्य अंतरात्मनः गतिं प्राप्तिं ध्यानयोगेन संपश्येत् ७६

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ७५
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ध्यानयोगेन संपश्येद्गतिमस्यांतरात्मनः ७६ सम्यग्दर्शनसंपन्नः
कर्मभिर्न निबध्यते दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ७७ अहिंसयेंद्रियासंगैर्वैदिकैश्चैव कर्मभिः
तपसश्चरणैश्चोग्रैः साधयंतीह तत्पदं ७८ अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनं चर्मा
वनद्धं दुर्गंधि पूर्णं मूत्रपुरीषयोः ७९ जराशोकसमाविष्टं रोगायतनमातुरं रजस्वलमनित्यं च
भूतावासमिमं त्यजेत् ८० नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ८१

सम्यगिति सम्यक् ईश्वरस्य दर्शनसंपन्नः संयुक्तः सन् कर्मभिर्न निबध्यते ७७ अहिंसेति अहिंसया इंद्रियाणां असं
गैः वैदिकैः कर्मभिः अष्टचत्वारिंशितसंस्कारैः उग्रैः तपश्चरणैः तत्पदं ब्रह्म साधयंतीह ज्ञानेनेत्यर्थः ७८ शरी
रस्य स्वरूपमाह अस्थीति मूत्रपुरीषयोः पूर्णं अनभसंबंधे षष्ठी युग्मं रजस्वलं मालिनं भूतावासं पंचमहा

भूतानां आवासस्थानं एतादृशं शरीरं ध्यानेन त्यजेत् १९ नदीकूलमिति तथा इमं पुरोवर्तिनं देहं त्यजन् दुःख
गृहीतात् ग्राहसदृशात् कृच्छ्रात् अपि मुच्यते २० प्रियाप्रियेति स्वेषु प्रियेषु पुत्रेषु बंधुषु वा सुकृतं सुखं अप्रियेषु शत्रु
षु दुःकृतं ध्यानयोगेन विसृज्य सनातनं ब्रह्माप्येति प्राप्नोति २१ यदेति सर्वभावेषु विषयेषु उपदो भाव
भावेन मनसा यदा निस्पृहा भवति २२ अनेनेति सर्वान्संगान् शनैः शनैः सर्वद्वंद्वं क्षुत्पिपासे शोकमोहौ रागद्वे
षौ विनिर्मुक्तः ब्रह्मणि अवतिष्ठति ब्रह्मस्वरूपं प्राप्नोति अनेनेति सर्वान्संगान् शनैः शनैः ध्यानकामेति

प्रियेषु स्वेषु सुकृतम् अप्रियेषु च दुःकृतं विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनं २२ यदा भावेन भव
ति सर्वभावेषु निस्पृहः तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतं २३ अनेन विधिना सर्वांस्त्यक्त्वा संगा
ञ्छनैः शनैः सर्वद्वंद्वविनिर्मुक्तः ब्रह्मण्येवावतिष्ठति २४ अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् २५ इदं शरणमज्ञानामिदमेव विजानतां इदमन्विच्छ
तां स्वर्गमिदमानन्त्यमिच्छतां २६ एष धर्मोनुसृष्टो वो यतीनां नियतात्मनां

एतत्सर्वं ध्यानिकं ध्यानीयं यत् एतत् अभिशब्दितं कर्मकांडोक्तं कथितं अनध्यात्मवित् कश्चित्क्रियाफलं न उप
भुंक्ते २५ अधियज्ञमिति अधियज्ञं यज्ञाधिकृत्य ब्रह्म जपेत् यज्ञप्रतिपादक वेदभागं च पुनः आधिदैविकं दे
वतामधिकृत्य तत्स्वरूपप्रतिपादकं मंत्रभागं च पुनः आध्यात्मिकं आत्मस्वरूपप्रति एतत्त्रयं ब्रह्म वेदं वेद
स्वरूपं जपेत् च पुनः यद्वेदांताभिहितं वेदांतेन अभिहितं कथितं ओंकारं सततं जपेत् २५ इदमध्यात्मिका
दित्रयं अज्ञानां पुंसां शरणं इह शरीरविधूपपरं ब्रह्म अधिगच्छति २६ एष इति हे द्विजाः नियतात्मनां नियम

त्तांपहतकल्मषाणां यतीनांरा एष धर्मोऽनुतिष्ठः कथितः वेदसंन्यासिकानां प्रपहतकषायसाधनप्रत्यावशात्कानां मोक्षहेतोः
वेदाभ्यासरतात्मनां संन्यासस्थानं सकर्मणा कर्मयोगेन कर्तव्यं उधर्मं वेदाभ्याससमात्रनिरतानां कर्मयोगं विबोधत ८६
८०।८१ सर्वेषामेति सगृहस्थः त्रीन् एतान् आश्रमान् बिभर्ति ८९ यथेति सांस्थितेः एकत्र स्थितं स्थानं ९०।९४ धृतिः
कार्यानुद्वेगः क्षमाशांतिः दमः तपः क्लेशसहिष्णुः अस्तेयं परद्रव्यानिस्पृहः कारणं शौचं मृत्तिकादिभिः इंद्रियनिग्रहः ह्री

वेदसंन्यासिकानां तु कर्मयोगं निबोधत ८६ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा एते गृहस्थप्रभवाश्च
त्वारः पृथगाश्रमाः ८७ सर्वेपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः यथोक्तकारिणं विप्रं नयंति परमां गतिं ८८ सर्वेषा
मपि चैतेषां वेदस्मृतिविधानतः गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ८९ यथा नदीनदाः सर्वे सागरे यांति संस्थितिं
एवमाश्रमिणः सर्वे गृहस्थे यांति संस्थितिं ९० चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः दशलक्षणको धर्मः
सेवितव्यः प्रयत्नतः ९१ धृतिः क्षमा दमोऽस्तेयं शौचमिंद्रियनिग्रहः ह्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्ष
णं ९२ दशलक्षणानि धर्मस्य ये विप्राः समधीयते अधीत्य चानुवर्तंते ते यांति परमां गतिं ९३ दशलक्षणकं धर्म
मनुतिष्ठन्समाहितः वेदांतं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ९४ संन्यस्य सर्वकर्माणि कर्मदोषानु
पानहे एष वो विहितो धर्मो ब्राह्मणस्य चतुर्विधः ९७

अकार्यान्निवर्तनं विद्या आत्मोपासना सत्यं यथार्थभाषणं अक्रोधः एवं धर्मलक्षणं दशकं संपूर्णः ९५ लक्षणो
ति ९६ दशलक्षणेति ९७ संन्यासेति कर्मदोषानुपानुदन् दूरीकुर्वन् नियतः सन् वेदमभ्यस्य ॐकारं वा अभ्यस्य
पुत्रैश्वर्ये पुत्रे ः पंचयज्ञविधानं पुत्रेण कार्यं एवंविधः सुखं वसेत् ९८।९९ इति श्रीमानवे धर्मशास्त्रे णामर्थे

द्विविरचितायां टीकायां षष्ठोध्यायः राजधर्मानाह राजधर्मानिति यथावृत्तः यथाचारः नृपः भवेत् तस्य तत्तः य
थासंभवः समुत्पत्तिर्जन्म तस्य यथा परमा सिद्धिः अर्थकामधीसिद्धिः तादृशान्वक्ष्यमाणेन लक्षणेन राजधर्मान्प्रवक्ष्यामि १
ब्राह्ममिति ब्राह्मसंस्कारं उपनयनादिसंस्कारान् प्राप्तेन क्षत्रियेण यथाविधि अस्य सर्वस्य जगतः परिरक्षणं कर्तव्यं २
अराजक इति अराजके अस्मिन्लोके भयात् सर्वतः विद्रुतः सन् अस्याविस्य रक्षार्थं प्रभुः राजानं असृजत ३ इंद्रेति पु

पुण्यो क्षयफलः प्रेत्यराज्ञो धर्मं निबोधत ९७ इतिश्री मानवे धर्मशास्त्रे वानप्रस्थसंन्यासं नाम षष्ठोध्यायः ६
राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः संभवश्च यथा तस्य सिद्धिश्च परमा यथा १ ब्राह्मं प्राप्तेन संस्कारं
क्षत्रियेण यथाविधि सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणं २ अराजके हि लोकेस्मिन् सर्वतो विद्रुते भयात्
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ३ इंद्रानिलयमार्काणामग्नेश्च वरुणस्य च चंद्रवित्तेशयोश्चैव मात्रा
निर्हृत्य शाश्वतीः ४ यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः तस्मादभिभवत्येष सर्वभूतानि तेजसा ५
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुं ६ सोग्निर्भवति वायुश्च
सोर्कः सोमः स धर्मराट् स कुबेरः स वरुणः स महेंद्रः प्रभावतः ७ बालोपि नावमंतव्यो मनुष्य इति भूमिपः
महती देवता ह्येषा नररूपेण तिष्ठति ८ एकमेव दहत्यग्निर्नरं दुरुपसर्पिणं कुलं दहति राजाग्निः सपशुद्रव्यसंचयं ९
ग्मे इंद्रादीनां लोकपालानां मात्राः अंशाः विहृत्य यस्मात्कारणात् एषां सुरेंद्राणां मात्राभ्यः अंशेभ्यः निर्मितः नृपः
तस्मात्कारणात् तेजसा सर्वभूतानि एषः नृपः अभिभवति ४।५ तपतीति सर्वेषां चक्षूंषि च पुनः मनांसि अर्कवन्नृपः
तपति संतापयतीत्यर्थः ६ सोग्निरिति ७ बाल इति ८ एकमिति एकमेव नरं अग्निर्दहति कीदृशं नरं दुरुपसर्पिणं

राम:
८१

दृष्टे न प्रकर्षेण उपसर्पितं न विलंघयितुं ९ कार्यमिति धर्मसिद्ध्यर्थं पुनः पुनः विश्वरूपं नानास्वरूपं दंड्येमादिरूपं मित्रेषु शत्रुतां शत्रौ मित्रतां वा कार्यप्रयोजनं तस्य पश्यति अवेक्ष्य राजा कुरुते देशकालौ विग्रहादियोग्यौ ज्ञात्वा मित्रेषु शत्रुतां शत्रौ मित्रतां वा करोतीत्यर्थः १० यस्येति ११ तमिति संमोहात् यः तं द्वेष्टि तस्याहि आशु विनाशाय राजा मनः कुरुते १२ यस्मादिति तस्मात्कारणात् इष्टेषु द्वेष्येषु यं धर्मं स नराधिपः व्यवस्येत् निश्चिनोति च पुनः अनिष्टं अयोग्यं अ

कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः १० यस्य प्रसादे पद्मा श्रीर्वि
जयश्च पराक्रमे मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ११ तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयं तस्य
ह्याशु विनाशाय राजा प्रकुरुते मनः तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः अनिष्टं चाप्यनिष्टेषु तं धर्मं
न विचारयेत् १३ तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं ब्रह्मतेजोमयं दंडमसृजत्पूर्वमीश्वरः १४ तस्य स
र्वाणि भूतानि स्थावराणि चराणि च भयात्भोगाय कल्पंते स्वधर्मान्न चलंति च १५ तं देशकालौ शक्तिं च
विद्यां चावेक्ष्य तत्त्वतः यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु १६ स राजा पुरुषो दंडः स नेता शासिता च सः
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः दंडः शास्ति प्रजाः सर्वाः दंड एवाभिरक्षति दंडः सुप्तेषु जागर्ति दंडं धर्मं विदुर्बुधाः १८

निष्टेषु अप्रियद्वेष्येषु अनिष्टेषु स्थितं अधर्मं न विचारयेत् १३ तस्येति तस्यार्थे एतं तु अर्थे ईश्वरः ब्रह्मा पूर्वं दंडरूपं आत्मजं पुत्रमसृजत् धर्मं धर्मजं स्वसुतं १४ तस्य राज्ञः भयात् स्वधर्मात् भूतानि न चलंति १५ तमिति दंडं अन्यायवर्तिषु देशकालादिकं शक्तिं धनविद्यावेदादि अवेक्ष्य यथार्हतः संप्रणयेत् १६ स इति स राजा पुरुषः दंडपुरुषरूपः दंडः स राजा नेता नयति इति नेता तस्य राजा धर्मस्य प्रतिभूः स्मृतः १७ दंड इति दंडः सुप्तेषु जागर्ति दंडभयात् केचित् नानुपतंति १८

समीक्ष्येति सः धृतः दंडः सम्यक् समीक्ष्य सर्वाः प्रजा रंजयति असमीक्ष्य अविचार्य प्रणीतः दंडः विनाशयति सर्वशः १९ त्रिभिराह यदीति द्वितीयेनान्वयः राजा अतंद्रितः दंड्येषु दंडं यदि न प्रणयेत् न प्रयोजयेत् तर्हि बलवत्तरः पुरुषः दुर्बलाननुरूपान् अद्यात् लुंपेत् कानिव अपक्वान् शूले आरोपितान् मत्स्यानिव २० अद्यादिति दंडेन ईश्वरात्मरूपेन अप्रयुक्ते दंडे कस्मिन्वस्तुनि स्वाम्यं प्रभुत्वं न स्यात् अधरोत्तरं अधरं प्रतिलोमजं उत्तरं अनुलोमजं एवं अ

समीक्ष्य स धृतः सम्यक् सर्वा रंजयति प्रजाः असमीक्ष्य प्रणीतस्तु विनाशयति सर्वशः १९ यदि न प्रणयेद्राजा दंडं दंड्येष्वतंद्रितः शूले मत्स्यानिवापक्ष्यान्दुर्बलान्बलवत्तरः २० अद्यात्काकः पुरोडाशं श्वा वालेह्याद्धविस्तथा स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरं २१ सर्वो दंडजितो लोके दुर्लभो हि शुचिर्नरः दंडस्य हि भयात्सर्वं जगद्भोगाय कल्पते २२ देवदानवगंधर्वा रक्षांसि पतगोरगाः तेपि भोगाय कल्पंते दंडेनैव निपीडिताः २३ दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः सर्वलोकप्रकोपश्च भवेद्दंडविभ्रमात् २४ यत्र श्यामो लोहिताक्षो दंडश्चरति पापहा प्रजास्तत्र न मुह्यंति नेता चेत्साधु पश्यति २५

धरोत्तरं प्रवर्तेत २१ सर्व इति सर्वो लोकः दंडजितः २२ देवेति दंडेन ईश्वरात्मरूपेण २३ दुष्येयुरिति दंडस्य विभ्रमात् हिंसारणात् अन्यथाप्रयोगात् सर्वे वर्णाः दुष्येयुः संकीर्णा भवेयुः च पुनः सर्वसेतवः मर्यादा भिद्येरन् २४ यत्रेति दंडस्य स्वरूपमाह यत्र देशे श्यामः दंडश्चरति श्यामः इत्यनेन मनुष्यरूपता श्यामः लोहिताक्षः राजाधिकृतत्वेन कोपनत्वात् यदि नेता साधु युक्तं यथा स्यात्तथा शास्त्रे पश्यति तत्र प्रजा न मुह्यंति २५ श्री ४ ७ ७

तस्येति तस्य दंडस्य संप्रणेतारं प्रयोक्तारं समीक्ष्यकारित्वे धर्मालोच्यकारिणं कुर्वाणं राजानं आहुः २५ तमिति तं दंडं सम्यक् प्रणयन् राजा त्रिवर्गेण धर्मार्थकामेन अभिवर्द्धते कामात्मा पुरुषः विषमः प्रणेता क्षुद्रः लुब्धः एतादृशः दंडेनैव निपात्यते २७ दंड इति असंस्कृतात्मभिः दुर्द्धरः दंडः धर्तुमशक्यः २८ ततः इति ततः देवान् हि वैरी

तस्याहुः संप्रणेतारं राजानं सत्यवादिनं समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं २५ तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते कामात्मा विषमः क्षुद्रो दंडेनैव निपात्यते २७ दंडो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः धर्माद्विचलितं हंति नृपमेव सबांधवं २८ ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं अंतरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् २९ सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना न शक्यो न्यायतो नेतुं शक्तेन विषयेषु च ३० शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा दंडः प्रणयितुं शक्यः सुसहायेन धीमता ३१ स्वराष्ट्रे न्यायवृत्तिः स्यात् भृशदंडश्च शत्रुषु सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ३२ एवं वृत्तस्य नृपतेः शिलोंछेनापि जीवतः विस्तीर्यते यशो लोके तैलबिंदुरिवांभसि ३३ अतस्तु विपरीतस्य नृपतेरजितात्मनः संक्षिप्यते यशो लोके घृतबिंदुरिवांभसि ३४

नाप्यसंभवेन दंडः पीडयेत् २९ स इति सः दंडः असहायेन मूढेन प्रमादमोहवता अकृतबुद्धिना अधर्मशास्त्रमरूनाभ्यासेन एतादृशेन राज्ञा न्यायतः नेतुं प्रवर्तयितुं दंडः न शक्यः ३० शुचिनेति शुचिना अलुब्धेन स्वराष्ट्र इति सुहृत्सु बंधुषु अजिह्मः स्यात् स्निग्धेषु मित्रेषु क्षमान्वितः स्यात् ३२ एवमिति एवं वृत्तस्य नृपतेः यशः शि

लोंछेनापि जीवतः भोगदानाभ्यां रहितस्य मुनेः यशः लोके विस्तीर्यते अंभसि तैलबिंदुरिव ३३ अतस्तु इति अ
जितात्मनः लोभाद्युपचितशत्रुस्य ३४ स्वे स्वे धर्मे निविष्टानामिति ३५ तेन राज्ञा पालित तस्य वः युष्माकं अहं प्रवक्ष्या
मि ३६ ब्राह्मणानिति राजा ब्राह्मणान्पर्युपासीत तेषां ब्राह्मणानां शासने तिष्ठेत् कीदृशान् ब्राह्मणान् त्रैविद्यवृद्धा

स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ३५ तेन यद्यत्सभृ
त्येन कर्तव्यं रक्षता प्रजाः तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ३६ ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पा
र्थिवः त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ३७ वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् वृद्ध
सेवी हि सततं रक्षोभिरपि पूज्यते ३८ तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः विनीतात्मा हि नृपतिर्न विनश्य
ति कर्हिचित् ३९ बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ४० वेनो विन
ष्टोऽविनयान्नहुषश्चैव पार्थिवः सुदाः पैजवनश्चैव सुमुखो निमिरेव च ४१ पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनु
रेव च ४२ त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीं आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ४३
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः

न् वेदत्रयसंपन्नान् विद्वान् संपूर्णान् वेदविदः वेदार्थज्ञान् शुचीन् सेवेत नित्यशः ३७ वृद्धानिति एतादृशो राजा रक्षो
भिः राक्षसैरपि पूज्यते ३८ तेभ्य इति तेभ्यः वृद्धेभ्यः विनयं इन्द्रियजयोपायं अधिगच्छेत् ३९ बहव इति बहवः राजानः
अविनयात् कामक्रोधलोभमदमानहर्षरूपषड्वर्गात् सपरिच्छदाः नष्टाः ४०।४१।४२ त्रैविद्य इति त्रैविद्येभ्यः त्रिवेदिभ्यः

त्रयीं विद्यां वेदत्रयीं शिक्षेत दंडविद्यां आन्वीक्षिकीं तर्कविद्यां आत्मविद्यां आत्मज्ञानभूतां वेदान्तं शिक्षेत वार्तायाः
आरंभाः वार्तारंभाः जीविकोपायाः कृष्यादीन् लोकतः शिक्षेत ४३ इंद्रियाणामिति इंद्रियाणां जये दिशं योगं समा
तिष्ठेदित्यर्थः ४४ दशेति कामसमुत्थानि दश व्यसनानि अष्टौ क्रोधजानि व्यसनानि दुरंतानि दुःखोदर्कानि
प्रयत्नेन वर्जयेत् ४५ कामजेष्विति कामजेषु व्यसनेषु प्रसक्तः महीपतिः अर्थधर्माभ्यां वियुज्यते क्रोधजेषु
व्यसनेषु प्रसक्तः महीपतिः आत्मनैव वियुज्यते ४६ तान्यष्टादश व्यसनान्याह मृगया १ अक्षः २ दिवास्वप्नः

इंद्रियाणां जये योगं समातिष्ठेद्दिवानिशं । जितेंद्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ४४ दश कामसमु
त्थानि तथाष्टौ क्रोधजानि च व्यसनानि दुरंतानि प्रयत्नेन विवर्जयेत् ४५ कामजेषु प्रसक्तो हि व्यसने
षु महीपतिः । वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ४६ मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः तौ
र्यत्रिकं वृथाट्या च कामजो दशको गणः ४७ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं वाग्दंडजं च पारुष्यं क्रो
धजोऽपि गणोऽष्टकः ४८ द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ४९

परिवादः सप्रशंसार्थं अद्वेष्यानामपि निंदा स्त्रियः स्त्रीणामाशक्तिः मदः पानमत्तता तौर्यत्रिकं नृत्यगीतं वाद्यं वृथा
धावृथाट्या वृथालापः वृथाद्या इति पाठे वृथा नरभ्रमणं वा एष दशकः कामजः रागमात्रजातः गणः ४७ पैशुन्यमिति पै
शुन्यं असद्दोषाविष्कारः परदोषसूचनं साहसं अल्पे विकारे स्वयं मानुषवधादिकं द्रोहः अपकारः परजीवांसा
ईर्ष्या असूया परस्तवासहिष्णुता अर्थदूषणं अर्थानां परकीयानां स्वयमग्रहणं विनाशनं ४८

म·स्म·टी·
२७

द्वयेरिति एतयोर्द्वयोरपि पूर्वोक्तयोर्दशाष्टयोः अष्टादशयोः मूलं च लोभं सर्वे कवयो विदुः तं मूलं लोभं यत्नेन वर्जये-
येत् उभौ च तौ गणौ दशाष्टौ तज्जौ तस्माज्जातौ तज्जौ लोभजौ ज्ञेयौ ४९ यानि मित्रं कामजे गणे रागजे गणे एतच्चतु-
ष्कं विद्यात् एतत्कष्टतमं दुःखदं विद्यात् ५० दण्डस्येति क्रोधजेपि गणे दण्डादि एतत्त्रिकं कष्टं विद्यात् ५१ सप्तेति
अपि सप्तकस्य पानादिवर्गस्य आत्मनः आत्मवान् व्यसनं दुःखदं पूर्वं गुरुतरं विद्यात् कीदृशस्य सप्तकस्य सर्वत्र प्रसङ्गिण
शीलस्य ५२ व्यसनेति चतुरः कामजाः क्रोधजाः एवं सप्त सप्तसेनस्य च पुनः मृत्योः द्वयोः मध्ये सप्तव्यसनं कष्टं

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ५० दण्डस्य पातनं चैव वाक्पा
रुष्यार्थदूषणे क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ५१ सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिनः पूर्वं पूर्वं गुरुतरं
विद्याद्व्यसनमात्मवान् ५२ व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते व्यसन्यधोधो व्रजति स्वर्यात्यव्यसनी
मृतः ५३ मौलाञ्छास्त्रविदः शूरान् लब्धलक्षान् कुलोद्भवान् सचिवान्सप्त चाष्टौ च प्रकुर्वीत परीक्षितान्
५४ अपि यत्सुकरं कर्म तदप्येकेन दुःकरं विशेषतोऽसहायेन किं नु राज्यं महोदयं ५५ तैः सार्द्धं चिंतयेन्नि
त्यं सामान्यं संधिविग्रहं स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ५६

उच्यते ५३ मौलानिति मौलान् परिपाट्या कुलोद्भवान् पितृपितामहाद्यागतान् एतादृशान् सचिवान् कुर्वीत ५४
अपीति अपि निश्चयेन यत्कर्म सुकरं स्यात् तत् कर्म असहायेन विशेषतः कर्तुं दुःकरं एवंविधं महोदयं राज्यं
किं किमपीत्यर्थः ५५ तैरिति तैः सचिवैः सार्द्धं विग्रहादिकं चिंतयेत् संधिः व्यवस्थाकरणं विग्रहे अपकारः
यानं परशत्रुं प्रति पाचास्थानं आसनं उपेक्षणं समयः समुदयं स्वं स्वं अभिप्रायं पृथक् २ उपलभ्य श्रुतधनप्राप्ति

राम
२७

उपलभ्य तु तं धनप्राप्त्युपायं गुप्तिं रक्षां लब्धस्य धनस्य वृद्धिं सम्यग्दानानि पात्रेषु प्रतिपादनानि तत्र योगीश्वरः संधिं
च विग्रहं यानमासनं संश्रयं द्वैधीभावं गुणानेतान् यथावत्परिपालयेत् ५६ तेषामिति तेषां समस्तानां च
पुनः आत्मनः हितं हितकार्यं विदध्यात् कुर्यात् कर्तव्यमित्यर्थः ५७ सर्वेषामिति सर्वेषां मन्त्रिणां मध्ये विशिष्टेन
ब्राह्मणेन राजा परमं मंत्रं मंत्रयेत् कीदृशं मंत्रं षाड्गुण्यसहितं षड्गुणमाह संधिर्नाविग्रहो यानमासनं द्वैधमाश्रय इ
त्यमरः । नित्यमिति अस्मिन् ब्राह्मणे समाश्वस्तः कृतविश्वासः सर्वकर्माणि निक्षिपेत् कुलीनान् वित्तसंपन्नान्स

तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् २ समस्तानां च कार्येषु विदध्याद्धितमात्मनः ५७ सर्वेषां तु विशिष्टेन ब्रा
ह्मणेन विपश्चिता मंत्रयेत्परमं मंत्रं राजा षाड्गुण्यसंयुतं ५८ नित्यमस्मिन् समाश्वस्तः सर्वकार्याणि निक्षिपेत
तेन सार्द्धं विनिश्चित्य ततः कर्म समाचरेत् ५९ अन्यानपि प्रकुर्वीत शुचीन् प्राज्ञानवस्थितान् सम्यगर्थसमा
हर्तॄन् अमात्यान्सुपरीक्षितान् ६० निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः तावतोऽतन्द्रितान् दक्षान् प्रकुर्वी
त विचक्षणान् ६१ तेषामर्थे नियुंजीत शूरान् दक्षान् कुलोद्गतान् शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ६२
समाहर्तॄन्प्रकुर्वीत धर्मशास्त्रार्थनिश्चयान् कुलीनान् वित्तसंपन्नान् समर्थान् कोशवृद्धये ६२

तेन ब्राह्मणेन सार्द्धं ५९ अन्यानिति असम्यक् अर्थसमुदयस्य समाहर्तॄन् आनयात्रीन् अनवस्थितान् चंचलान् ६०
निवर्तेत अस्य राज्ञः इतिकर्तव्यता यावद्भिः नृभिः निर्वर्त्यते तावतः अधिकारिणः कुर्वीत ६१ तेषामिति तेषामधि
कारिणां अर्थकार्ये समीपे अन्तःपुरे कुलोद्गतान् नियुंजीत तथा आकारकर्मान्ते रत्नाद्युत्पत्तिस्थाने भूषणशाला
दि निपादनं कर्म अन्तर्निवेशने अन्तःपुरे शुचीन् भीरून् एतादृशान् भृत्यान् युंजीत ६२ समाहर्तॄन् अर्थानाम् अप

म.स्मृ.टी.
८५

इति मंत्रिणः स्वरूपं अथ दूतलक्षणमाह दूतानिति शुचिं अलोलुपं ६३।६४ अमात्य इति अमात्यं मंत्रिणां रक्षः आयत्त:
मंत्रिणामधीनः अधीनो निघ्न आयत्तः इत्यमरः दंडे वैणायकी क्रिया विनयकारिणी क्रिया विनयहेतु क्रिया दूते दौत्ये
न कर्मणा संधिविपर्ययौ विग्रहे ६६ दूत एवेति संहतान् बंधून् भिनत्ति भेदयति ६७ स इति युग्मं तस्य नाम अस्य दूतस्य
निगूढेंगितं चेष्टितैः कृत्यं कार्यं आकारादिकं भृत्येषु कार्येषु चिकीर्षितं विद्यात् किं कर्त्वी राजा परराजचिकीर्षितं

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदं इंगिताकारचेष्टज्ञं शुचिं देशकुलोद्भवं ६४ अनुरक्तः शुचिर्दक्षः स्मृ
तिमान्देशकालवित् वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ६५ अमात्ये दंड आयत्तो दंडे वैनायिकी क्रिया
नृपतेः कोशराष्ट्रे च दूते संधिविपर्ययौ ६६ दूत एव हि संधत्ते भिनत्त्येव हि संहतान् दूतस्तु कुरुते कर्म भिद्यंते
येन वा न वा ६७ स विद्यादस्य कृत्यं च निगूढेंगितचेष्टितैः आकारमिंगितं चेष्टां भृत्येषु च चिकीर्षितं
६८ बुध्वा च सर्वं तत्त्वेन परराजचिकीर्षितं तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् ६९ जांगलं सस्य
संपन्नमार्यप्रायमनाविलं रम्यमानतसामंतं स्वाजीव्यं देशमाविशेत् ७०

स्वतत्त्वराजचिकीर्षितं तत्त्वेन स्वदूतद्वारा सर्वं बुध्वा ज्ञात्वा ६८।६९ राज्ञः निवासस्थानमाह जांगलमिति जां
गलं स्वल्पोदकं तरुपर्वतो देशो जांगलः तथापि अत्र समजलतरुपार्वतो देशो जांगलशब्देनाविधीयते तद्देशं वसे
त् सस्यसंपन्नं आर्यप्रायं धार्मिकबहुलं अनाविलं शंकरादि उपद्रवरहितं प्रलोकरोगी सुपहतिरहितं वा आजीव्यं

राम:
८५

कंदमूलादिभिरम्यं आनतं सामंतं विशेषकृतमांडलिकं आनः नम्रः सामंतो यस्मिन् तत् सामंतः स्यादधीश्वरः इ
त्यमरः एतादृशे देशे आविशेत् ७० षडविधदुर्गस्वरूपमाह धन्वदुर्गं मरुस्थलं यत्रास्ति निर्जलं तयात् देशावधि
भिः पंचकपोषितं जलं लभ्यते समानौ मरुधन्वानौ इत्यमरः महीदुर्गं पाषाणेष्टकादिभिः जलदुर्गं वार्क्षं वृक्षदुर्गं नृदुर्गं से
दुर्गं एतादृशं पुरं वसेत् ७१ येषां मध्ये बहुगुणत्वस्य भावः बाहुगुण्यं तेन ७२ त्रीणीति एषां षण्णां मध्ये आद्यानि
त्रीणि धन्वदुर्गं मृगाणां आश्रयं महीदुर्गं गर्ताश्रमाणां मूषकादीनां यथा अब्दुर्गं जलदुर्गं झषाणां आश्रयं उत्त

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरं ७१ सर्वेण तु प्रयत्नेन गिरिदुर्गं समा
श्रयेत् एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ७२ त्रीण्याद्यान्याश्रितास्त्वेषां दुर्गगर्ताश्रयाप्चराः त्रीण्यु
त्तराणि क्रमशः प्लवंगमनरामराः ७३ यथा दुर्गाश्रितानेतान्नोपहिंसंति शत्रवः तथारयो न हिंसंति नृपं दुर्ग
समाश्रयं ७४ एकः शतं योधयति प्राकारस्थो धनुर्धरः शतं दश सहस्राणि तस्माद्दुर्गं विशिष्यते ७५ मंद
रस्यापि शिखराणि निर्मानुष्यं न सस्पृते मनुष्यदुर्गं दुर्गाणां मनुस्वायंभुवोब्रवीत् ७६ तत्स्यादायुधसंपन्नं धन
धान्येन वाहनैः ब्राह्मणैः शिल्पिभिर्यंत्रैर्यवसेनोदकेधनैः ७७ तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः गुप्तं स

राणि क्रमशः वृक्षदुर्गं प्लवंगानां वानरादीनां नृदुर्गं सेनादुर्गं नराणां आश्रयं गिरिदुर्गं अमराणां आश्रयं यथा कालंजरे
नीलकंठादयः वसंति ७३ यथेति यथा दुर्गाश्रितानेतान् मृगादीन् शत्रवः सिंहादयः न हिंसंति ७४ ७५ मंदरेति
तद्दिति तत् दुर्गं आयुधसंपन्नं स्यात् यवसेतृणादिना संपन्नं कार्यं यथा धान्यादिभिः यंत्रैः क्षेपणादिभिः संपन्नं का
र्यं ७६ तस्येति तस्य दुर्गस्य मध्ये सुपर्याप्तं विस्तीर्णं गृहं आत्मनः कारयेत् जलेन वृक्षैः समृद्धं जलसहितं यो मध्ये

म·स्मृ·टी·
८६

समुद्भवो यस्य तत् प्रभूतं धान्यं सर्वर्तुकं षड्ऋतुषूत्पन्नं रक्षितं ७६ तदिति तद् दुर्गं अध्यास्य वसित्वा भार्यां उद्वहेत हृद्यां मनोहरां ७७ पुरोहितमिति तस्य गृह्याणि कर्माणि स्मार्तानि स्वशाखोक्तानि कर्माणि वैतानिकानि श्रौतानि ७८।७९ सांवत्सरिकेति सांवत्सरिकं वार्षिकं उपहारान् च पुनः आम्नायपरः स्यात् अभ्यासपरः स्यात् सर्वस्य करादेः स्मरणे यत्नं कुर्यात् ८० अध्यक्षानिति विविधान् दुर्गे तत्र तत्र अधिष्ठातॄन् कुर्यात् ८१ आवृत्तानामिति आवृत्तानां स्नातकानां

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्वितां कुले महति संभूतां हृद्यां रूपगुणान्वितां ७७ पुरोहितं च कुर्वीत वृणु-
